ADVAITASABHA GRANTHAMALA No. 10.

# PRAMANAMALA

BY

ANANDABODHACHARYA

ADVAITASABHA GRANTHAMALA No. 10.

# PRAMĀṆAMĀLĀ

BY

ĀNANDABODHĀCHĀRYA

WITH NIBANDHA OF

ANUBHŪTISWARŪPĀCHĀRYA

AND SAMBANDHOKTI OF

CHITSUKHĀCHĀRYA

EDITED CRITICALLY BY

Panditaraja S. SUBRAHMANYA SASTRI, M. A.,

PUBLISHED BY

S. VAIDYANATHAN

*Secretary*, Advaita Sabha, Kumbakonam.

PRINTED AT THE SRI VANI VILAS PRESS,

SRIRANGAM.

1956

अद्वैतसभा ग्रन्थमाला – १०.

# ॥ प्रमाणमाला ॥

आनन्दबोधाचार्यविरचिता

अनुभूतिस्वरूपाचार्यविरचित – निबन्धेन

चित्सुखाचार्यविरचित – संबन्धोक्त्या च

संवलिता ।

न्यायवेदान्तविद्वान् मीमांसकशिरोमणिः

इत्यादिपदभाजा

पण्डितराज S. सुब्रह्मण्यशास्त्रिणा

परिशोधिता ।

प्रकाशकः

S. वैद्यनाथार्यः

अद्वैतसभाकार्यदर्शी, कुम्भघोणम् ।

श्रीरङ्गस्थ श्रीवाणीविलासमुद्रालये

मुद्रिता ।

दुर्मुखसंवत्सरः

# PRAMĀṆAMĀLA.

Pramāṇamāla otherwise called Pramāṇaratnamālā is a small Prakaraṇa on Advaita Vēdānta by Sri Ānandabodhācharya. The following topics are discussed herein :—

(1) Ānanda (bliss) is not the negation of pain but it is a positive entity.

(2) Ātman and Brahman are of the nature of Bliss.

(3) Identity of Jīva with Paramātman.

(4) Difference is illusory. Universe is only a superimposition on pure Brahman.

(5) All cognitions are not valid.

(6) The universe cannot be defined as real or unreal and is a product of Māyā.

(7) Ātman and cognitions are both self-luminous.

(8) Vēdās are valid in respect of existent objects as well as activities.

(9) The Mahāvākyas have an impartite sense.

and (10) Release is of the nature of Bliss and is obtained by knowledge alone.

The whole work is a development of the author's own benedictory verse. Since all these facts are established through anumānas the author has preferred to call his work Pramāṇamāla (a wreath of pramāṇas).

Pramāṇamāla is a standard work on Vēdānta. Many Pramāṇas found here are referred to and amplified by S'ri Madusūdana Sarasvati in his Advaitasiddhi. Rāmakrishna Dikshita refers to it in his commentary on Vēdānta Paribhāṣa. Vyasa Tirtha's attacks on this work in Nyayamrita have been duly answered by Sri Madusudana Sarasvati in his Advaitasiddhi. Sri Anandabodhacharya's other works are (1) Nyāyadīpāvali (2) Nyāyamakaranda and (3) Sābdanirṇayavyākhyā.

## HIS TIME

Anandabodha refers to Vimuktatman (950 to 1050 A. D.) the author of Iṣtasiddhi in his Pramāṇamāla (p. 28). Anandānubhava quotes Anandabodha in Nyayaratnadipavali, Chitsukha quotes from Anandanubhava's work in his Tatvapradipika. Hence these four authors seem to have lived in succession in a short period of 150 years. Sri Chitsukha's date is 1200 A. D.

## COMMENTARIES

We are now issuing along with the text (1) Anubhuti Swarupacharya's Nibandha and (2) Chitsukhacharya's Sambandhokti for the first time. Both of them are by eminent scholars and propounders of new theories in Vedanta. The following works stand in their name.

ANUBHUTI SWARUPACHARYA

1. प्रकटार्थविवरणम् (printed)
2. इष्टसिद्धिविवरणम्
3. गीताभाष्यटिप्पणम्
4. माण्डूक्यभाष्यटिप्पणम
5. न्यायदीपावलीचन्द्रिका
6. खण्डनटीका
7. सारस्वतसूत्रप्रक्रिया

CHITSUKHACHARYA

1. तत्वप्रदीपिका
2. ब्रह्मसूत्रभाष्यटीका
3. नैष्कर्म्यसिद्धिटीका
4. विवरणटीका
5. ब्रह्मसिद्धिटीका
6. वेदान्तसिद्धान्तकारिकामञ्जरी
7. अधिकरणमञ्जरी
8. अधिकरणसंगतिः

## MANUSCRIPT MATERIALS

For Pramāṇamala the printed text was made use of. For the commentaries transcripts of the manuscripts belonging to the Government Oriental Mss. Library duly compared with manuscripts from Sringeri Mutt were utilised. Our thanks are due to the late Dr. T. R. Chintamani who collected the materials.

**S. S. SASTRI**

## ॥ उपोद्घातः ॥

श्रीआनन्दबोधाचार्यविरचितायाः प्रमाणमालायाः टीकाद्वयसंवलितायाः इदंप्रथमोऽयं मुद्रणशालावतारः । इमे हि आचार्यवर्याः अतिप्राचीनाः मार्कि अष्टशतवत्सरेभ्यः पूर्वमिमां भारतभुवमलञ्चक्रुः इति विमर्शका वदन्ति । तत्प्रणीत-ग्रन्थेषु न्यायमकरन्दः, न्यायदीपावलिः, शाब्दनिर्णयव्याख्या, प्रमाणमाला इत्येते चत्वारो ग्रन्थाः विलसन्ति । तत्र न्यायमकरन्दः चित्सुखाचार्यविरचितटीकया सह मुद्रितो वर्तत एव । प्रमाणमाला न्यायदीपावलिश्च टीकां विना पूर्वमेव मुद्रिते । अनयोर्मध्ये प्रमाणमाला इदानीं टीकाद्वयेन सह प्रकाश्यते । एवमेव न्यायदीपावल्यपि अचिरेण प्रकाशं गमिष्यति । अत्र च—

आनन्दमात्मानमसत्यभेदं
प्रणम्य विज्ञानतनुं मुकुन्दम् ।
प्रसाधने तस्य सदोपयुक्तां
प्रमाणमालां रचयामि रम्याम् ॥

इति मङ्गलश्लोकेन ग्रन्थमारभ्य आत्मनः आनन्दरूपता, ब्रह्मरूपता, भेदमिथ्यात्वं, ज्ञानस्वरूपत्वं, ज्ञानान्मोक्षः इत्यादयो विषयाः युक्तिभिः समर्थ्यन्ते । अत एवानुमान-प्रचुरत्वादस्य ग्रन्थस्य प्रमाणमालेत्यन्वर्थं नाम निर्दिष्टमाचार्यैः । एतद्ग्रन्थप्रतिपादितं— विवादाध्यासिता घटादिभेदाः सद्रूपे ब्रह्मणि कल्पिताः प्रत्येकं ब्रह्मणि कल्पितत्वात्— इत्यनुमानं सिद्धिकारैः चन्द्रिकाकारैश्च निष्कृष्योदाहृतं मिथ्यात्वनिरूपणप्रस्तावे । एतदुदा-हृतमेव सद्विलक्षणत्वरूपं मिथ्यात्वं पञ्चममिथ्यात्वेन श्रीमधुसूदनस्वामिभिः सिद्धा-न्तुरटङ्कि— अन्यमानन्दबोधजमिति ब्रुवद्भिः ॥

अस्याः प्रमाणमालायाः टीकाद्वयमुपलभ्यते । एका श्रीमद्भिः अनुभूति-स्वरूपाचार्यैः विरचिता, अन्या च श्रीचित्सुखाचार्यप्रणीता । उभावप्येतावाचार्यौ महतां ग्रन्थरत्नानां प्रणेतारौ वेदान्तप्रक्रियाप्रवर्तकौ च । अनुभूतिस्वरूपा हि प्रकटार्थकारा इति निरणायि Dr. राघवमहोदयेन । ततश्च प्रकटार्थकारोपज्ञाः प्रक्रिया उदाहरन्ति श्रीमदप्पय्यदीक्षितेन्द्राः 'लक्षणत्रयमेवेदं' इत्यादौ । न केवलं प्रकटार्थः; इष्टसिद्धि-विवरणं, गीताभाष्यटिप्पणी, माण्डूक्यभाष्यटिप्पणी, न्यायदीपावलीटीका, खण्डन-टीका, सारस्वतप्रक्रिया, इत्येवमादयो बहवो ग्रन्थाः अनुभूतिस्वरूपाचार्यैः रचिता

उपलभ्यन्ते । चित्सुखाचार्याश्च तत्वप्रदीपिका, ब्रह्मसूत्रभाष्यटीका, विवरणटीका, ब्रह्मसिद्धिटीका, नैष्कर्म्यसिद्धिटीका, वेदान्तसिद्धान्तकारिकामञ्जरी, अधिकरणमञ्जरी, अधिकरणसङ्गतिः इत्येतेषां ग्रन्थरत्नानामपि रचयितार उपलभ्यन्ते । तदेवं महद्भिः स्वीकृतत्वात् महतः शास्त्ररहस्यार्थस्य प्रतिपादकत्वात् महतः मोक्षाख्यप्रयोजनस्य दापयितृत्वाच्चास्य उपादेयत्वं सर्वैरभ्युपगमनीयम् । किमु वक्तव्यं यदा अयं ग्रन्थः

श्रीमदानन्दबोधस्य विबुधानन्ददायिनी ।
स्रवन्त्यमृतधारेव सेव्यतां कृतिभिः कृतिः ॥

इत्युक्तरीत्या स्वयमास्वाद्यमानः अमृतायते । तस्मात् मान्याः मुमुक्षवः वादरसिकाश्च ग्रन्थमिमं स्वीकृत्य अमन्दमानन्दं लभन्तां मुद्रणक्लेशं चाद्वैतसभायाः सफलमातन्वतामित्यभ्यर्थये ॥

विदुषामनुचरः
सुब्रह्मण्यशास्त्री ।

ॐ

श्रीमदानन्दबोधभट्टारकविरचिता

# ॥ प्रमाणमाला ॥

आनन्दमात्मानमसत्यभेदं
प्रणम्य विज्ञानतनुं मुकुन्दम् ।

---

॥ श्रीः ॥

अनुभूतिस्वरूपाचार्यविरचिता

## ॥ प्रमाणमालाव्याख्या ॥

### निबन्धः ।

भूतानां भ्रान्तिभूतिस्थितिहतिभजनं स्याद्यतो भूतयोने-
राराद्ध्येन्द्रोऽध्वरैर्यं सुरपुररमणं सुन्दरं राज्यमाप ।
गन्धर्वैस्सिद्धसाध्यैस्सुरनरनिकरैः किन्नरैरर्च्यमानो
नृत्ताद्यैश्चित्तरामैस्तुरगतनुधरस्सोऽयमव्यान्मुरारिः ॥ १ ॥

श्रीमदानन्दबोधस्य विबुधानन्ददायिनः ।
प्रमाणरत्नमालाया निबन्धः क्रियते मया ॥ २ ॥

॥ श्रीः ॥

चित्सुखाचार्यविरचिता

## ॥ प्रमाणमालाव्याख्या ॥

### संबन्धोक्तिः ।

प्रमाणनखनिर्भिन्नमहामोहामरारये ।
नमोऽस्तु नरसिंहाय सिंहाचलनिवासिने ॥ १ ॥

ज्योतिर्यद्दक्षिणामूर्तिव्याससशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥ २ ॥

प्रसाधने तस्य सदोपयुक्तां
प्रमाणमालां रचयामि रम्याम् ॥

---

निबन्धः ।

प्रमाणमालाख्यं प्रकरणञ्चिकीर्षुराचार्यश्चिकीर्षितप्रकरणस्याविघ्नेन परिसमाप्तिप्रचयपरिपन्थिकल्मषनिवृत्तये विशिष्टदेवताप्रणतिलक्षणमङ्गलाचरणच्छलेन प्रकरणप्रतिपाद्यमर्थं संक्षेपतो दर्शयति— **आनन्दमात्मानमिति** ॥

शास्त्रीयं चेदं प्रकरणमिति तदीयैरेवाधिकार्यादिभिः तद्वत्तासिद्धेः न तानि पृथक्त्वर्ण्यन्ते । अवान्तरप्रयोजनञ्च यान्यनेकत्रास्पष्टानि सूचितानि प्रमाणानि तानीहैकत्र स्पष्टीकृत्य लिख्यन्ते मन्दमध्यमाधिकारिसुखप्रतिपत्त्यर्थमित्यारम्भसिद्धिः । अस्य च श्लोकस्यार्थं स्वयमेव विवरिष्यति ॥

अक्षरान्वयस्तु कथ्यते — प्रमाणमालां रम्यां रचयाम्यहम् । किंकृत्य? मुकुन्दं प्रणम्य । कथंभूतं? आनन्दं भावरूपानन्दस्वभावम् । अनेन यदाहुः वैशेषिकादयः — लोके तावद्दुःखाभाव एवानन्दः । अतो 'विज्ञानमानन्दं ब्रह्म' इत्यादावपि दुःखाभाव एवानन्द इति — तन्निराकरणं सूचितम् । आत्मनः परप्रेमास्पदत्वेनानन्दरूपत्वं सिद्धवत्कृत्य परमात्मन आनन्दरूपत्वे हेतुमाह — **आत्मानमिति** । आत्मत्वात् अपरमात्मवदित्यर्थः । तथानन्दमात्मानमिति सामानाधिकरण्येन जीवपरमात्मनोरेकत्वं च शास्त्रप्रमाणकं दर्शितं, तन्न संभवति संसार्यसंसार्यादिभावेन भेदग्राहिप्रमाणविरोधादित्याशङ्क्याह — **असत्यभेदमिति** । बिम्बप्रतिबिम्बादिवन्मृषा भेदाव-

संबन्धोक्तिः ।

इयं प्रमाणमालायाः संबन्धोक्तिर्विरच्यते ।
मुनिना चित्सुखाख्येन विद्वत्कुमुदचन्द्रिका ॥ ३ ॥

चिकीर्षितस्य ग्रन्थस्य अविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च मुखतः स्वेष्टदेवतानमस्कारलक्षणं मङ्गलाचरणं संपादयन् अर्थात् प्रकरणस्य विषयसंबन्धप्रयोजनानि सूचयन् प्रकरणारम्भं प्रतिजानीते— **आनन्दमात्मानमिति** । मालापक्षे प्रसाधनं अलङ्कारः । प्रमाणमालापक्षे तु प्रकर्षेण साधनम् । प्रकर्षश्च असंभावनाविपरीतभावनादिनिरासः । प्रतीतिमात्रस्यागमत एव सिद्धत्वात्

आनन्दो दुःखाभावो न भवति, तदनिरूप्यत्वात् । यदित्थं तत् तथा, यथा घटः । यद्वा आनन्दो भावरूपः प्रतियोग्यनिरूप्यत्वात् घटवत् । अबाध्ये

---

### निबन्धः ।

भासेन प्रामाणिकाभेदस्य न विरोध इत्यर्थः । अनेनैव च भेदस्यापि मिथ्यात्वं सूचितं दृश्यत्वादिहेतुना । तन्न संभवति आत्मन्यनेकान्तादित्याशङ्कयाह — **विज्ञानतनुमिति** । स्वप्रकाशं संविद्रूपमित्यर्थः । तस्य ज्ञानानन्दाद्वितीयस्य परमात्मनः प्रसाधने प्रतिपादने सदोपयुक्तामिति स्वकृतेः तद्विषयत्वं दर्शितम् ॥

विज्ञानमानन्दं ब्रह्मेत्यादौ भाव एवानन्दशब्दार्थ इति वक्तुं प्रथमं लोके तावद्दुःखाभाव आनन्दो न भवति इत्युपोद्धातमाह — **आनन्द इति । तदनिरूप्यत्वादिति** — दुःखाभावतयाऽगम्यमानत्वादित्यर्थः । परपक्षप्रतिक्षेपार्थः प्रथमः प्रयोगो द्वितीयस्तु सिद्धान्तसिद्धये । नहि परपक्षप्रतिक्षेपमात्रात् सिद्धान्तसिद्धिः जाघटीति । ननु शशविषाणमित्युक्तेऽपि प्रतियोग्यपेक्षा नावभासते । अतोऽनैकान्तः — न, प्रतियोग्यपेक्षया विनाऽपरोक्षतयावभासमानत्वादित्यर्थः ॥

### संबन्धोक्तिः ।

सदोपयुक्तत्वाच्च लौकिकमालावैषम्यम् । लौकिकमालायाः प्रसाधने सदाऽनुपयोगात् । **रम्यामिति** । परिमलादिगुणवत्त्वं कीटाद्युपद्रवराहित्यं च रम्यत्वं मालायाः । अनुकूलतर्कसद्भावः, पक्षधर्मतादिरूपगुणवत्त्वं, प्रतिज्ञापदव्याघातोपाधिसद्भावः, प्रतिकूलतर्कपराहतिप्रमुखदोषराहित्यं च रम्यत्वं प्रमाणमालायाम् इति द्रष्टव्यम् ॥

ननु कथमानन्दो मुकुन्दः, तस्य दुःखाभावरूपत्वात् इत्याशङ्कयाह— **आनन्द इति** । आनन्दशब्दवाच्यत्वं दुःखाभाववृत्ति न भवतीत्यर्थः । अन्यथा आनन्दशब्देन दुःखाभावपक्षीकरणे व्याघातात्, अतिरिक्तपक्षीकरणे चाश्रयासिद्धेः । **तदनिरूप्यत्वादिति** । दुःखानिरूप्यत्वादिति यावत् । अत्र च आनन्दशब्दवाच्यत्वं दुःखाभावे न वर्तते प्रतियोगिनिरूप्यावृत्तित्वात् घटवदिति प्रयोगो मन्तव्यः । अन्यथा आनन्दशब्देन दुःखाभावविवक्षायां दुःखाभावो दुःखाभावो न भवतीति व्याघातात् । दुःखाभावातिरिक्तसुखस्याभिधाने च तदनंगीकारवादिनं प्रत्याश्रयासिद्धेः । न च दुःखाभावत्वनिषेधे दुःखत्वप्राप्तिः, दुःखातिरिक्तत्वेन संमतस्य दुःखाभावातिरिक्तत्वसाधनादिति द्रष्टव्यम् । एवमभावपक्षं निरस्य भावपक्षं साधयति— **यद्वेति** ॥

**सत्यपदवत् आनन्दपदस्य दुःखाभावे प्रवृत्तेः प्रतियोग्यनिरूप्यत्वमसिद्धमिति चेत्; मैवम् । अकस्मादुपनतविपञ्चीस्वरश्रवणादावन्तरेणापि दुःखाभावावमर्शमानन्दसंवेदनात् । आनन्दाभाव एव दुःखमिति पूर्वन्यायेन विपरीतप्रसङ्गाच्च । तत्रानुभवविरोध इति चेत् अत्रापि समं समाधानम्, अन्यत्राभिनिवेशात् । प्रतियोग्यनिरूप्यस्याप्यभावत्वे सत्त्वविप्रसङ्गात् ॥**

---

निबन्धः ।

इदानीं हेतोरसिद्धिं शंकते—**अबाध्य** इति । यथा अबाध्ये त्वया सत्यशब्दः प्रयुज्यते । तत्र बाध्यत्वाभावोऽबाध्यत्वमिति विद्यमानमपि प्रतियोग्यपेक्षत्वं सत्यशब्दप्रयोगोपाधौ न प्रतीयत इत्येतावदेव । तथा दुःखाभावस्य विद्यमानमपि प्रतियोगिसापेक्षत्वमानन्दपदोपाधौ न प्रतीयत इत्येतावदेवातोऽसिद्धिरित्यर्थः । तर्हि यथा प्राप्तबाधाभावावगममन्तरेण न सत्यत्वानुभवः, तथा प्राप्तदुःखाभावावगममन्तरेण सुखानुभवोऽपि न भवेत् । भवति च कदाचित् उदासीनस्याकस्मादुपस्थितवीणाध्वनिश्रवणादौ दुःखाभावावगममन्तरेणापि सुखानुभव इति परिहारार्थः । किञ्च सुखाभाव एव दुःखमिति विपरीतं वा कस्मान्न भवति? प्रतियोग्यनपेक्षत्वादिति चेत्—न, विद्यमानमपि प्रतियोग्यपेक्षत्वं दुःखशब्दप्रयोगोपाधौ न प्रतीयत इत्येतावदेवातस्त्वदुक्तन्यायेन विपरीतमपि स्यादित्यर्थः । निष्प्रतियोगिकस्य दुःखस्याभावरूपत्वाभिधानेऽनुभवविरोधो भवति चेत्, तर्हि प्रतियोगिनिरपेक्षतयानुभूयमानस्य भावरूपानन्दस्याभावरूपत्वाभिधानेऽपि समानमेतद्दूषणमाभिनिवेश एव तवाधिक इत्यर्थः ॥

संबन्धोक्तिः ।

यद्यपि लोके बाधाभावविशिष्टे वस्तुनि सत्यशब्दः प्रसिद्धः तथापि प्राप्ताप्राप्तविवेकेन बाधाभाव एव सत्यशब्दार्थ इति मन्वानः हेत्वसिद्धिमाशङ्कते—**अबाध्य इति** । विनापि दुःखपरामर्शं स्वस्थस्यैव आनन्दानुभवदर्शनात् नासिद्धो हेतुरित्याह—**मैवमिति** । विपञ्ची वीणाविशेषः । एवमपि अनुभवावधीरणेन दुःखाभाव एव सुखमिति यद्यभिनिवेशः, तर्हि सुखाभाव एव दुःखम् इति सत्यपदवदेव च तत्रापि दुःखपदस्य प्रवृत्तिः, प्रतियोग्यनिरूप्यता च तत्राप्यसिद्धा इति उष्ट्रलगुडन्यायापातश्च तव स्यात् इत्याह—**आनन्दाभाव एवेति** । प्रतियोग्यनिरूप्यस्याप्यभावत्वमस्तु, किं विपक्षे बाधकमित्याशङ्क्याह—**प्रतियोगीति** । अतिप्रसङ्गात्, घटादेरप्यभावत्वप्रसङ्गात् इति यावत् ॥

**किञ्च आनन्दो भावरूपः सातिशयत्वात् दुःखवत् । न च निवर्त्य-दुःखोपाधेरतिशय इति युक्तम्; अन्यथापि दर्शनात् । तथाहि — क्लेशावाप्ते हि न तथा प्रतीयते लोकः यथाऽन्तरेण प्रयासं प्राप्ते । व्याप्तिः पुनः उपाधि-निरसनेन समर्थनीयेति ॥**

---

### निबन्धः ।

ननु भाराद्यार्तानां दुःखाभाव एव सुखानुभवगोचरः; न, तैरपि भारादि-दुःखसाधनविगमे प्राप्तदुःखाभावमात्रमनुभूयते, न तु तदेव सुखं, सुखार्थमन्नपानादि-साधनविशेषोपादानात् । अविवेकात्तु कस्यचित् सुखाभिमान इति सन्तोष्टव्यम् । अन्ये तु भाराद्यभावोऽप्यात्मसुखव्यञ्जक आकाशस्येव मूर्तद्रव्याभाव इत्याहुः । तर्हि प्रतियोगि-निरपेक्षत्वमस्तु, भावत्वं च न भविष्यति, को दोषः? तथाच विपक्षबाधकतर्काभावा-दप्रयोजक इत्याशङ्क्याह — **प्रतियोगीति** ॥

एवं चानन्दस्य भावरूपत्वे प्रयोक्तव्यमित्याह — **किंचेति** । ननु निवर्त्यदुःखं यदा बहुतरं भवति तदा तन्निवृत्तिरूपेऽपि सुखे बहुत्वाभिमानः; तद्यदाऽल्पं तदा-ऽल्पत्वाभिमान इत्येतावन्मात्रं, न तु सुखस्य स्वरूपेण सातिशयत्वमस्त्यतोऽसिद्धिरित्या-शङ्क्याह — **न च निवर्त्येति** । निवर्त्यदुःखस्याल्पत्वे सुखातिशयो दृश्यत इत्यर्थः । एतदेव स्पष्टयति — **क्लेशावाप्त इति** । ननु माभूत् स्वरूपासिद्धिः । तथापि सुखेतरत्वो-पाधिहतत्वान्न सातिशयत्वस्य भावरूपत्वेन व्याप्तिरस्तीत्याशङ्क्याह — **व्याप्तिः पुनरिति** ॥

### संबन्धोक्तिः ।

**सातिशयत्वादिति** । यद्यपि आनन्दः निरतिशयात्मस्वरूपतया स्वरूपतो न सातिशयः, तथापि लोकदृष्ट्यनुसारेण 'ते ये शतं मानुषा आनन्दाः' इति श्रुत्यनुसारेण च उपाध्युपहितेऽतिशयसंभवाच्च सातिशयत्वादित्युक्तम् । अभावत्वेऽप्यानन्दस्य प्रति-योगिनो दुःखस्यातिशयवतो निवृत्तौ तदभावेऽपि सातिशयत्वभ्रमः महाप्रलये महत्व-प्रतीतिवत् । अतोऽन्यथासिद्धो हेतुरित्याशङ्क्य परिहरति — **नचेति** । निवर्त्यदुःखमेव उपाधिः निमित्तं यस्य अतिशयस्य सः तथोक्तः । तद्दर्शनमेव प्रपञ्चयति — **क्लेशावाप्ते हीति** । अल्पेऽपि दुःखे महतः सुखस्य, महति च दुःखे सुखस्याल्पस्य दर्शनाच्च न तदुपाधिरयमतिशय इत्यर्थः । सातिशयत्वभावरूपत्वयोः सहचरितत्वेऽपि प्रमेयत्वानित्यत्व-योरिव न व्याप्तिः इत्यत आह — **व्याप्तिरिति** ॥

## निबन्धः।

इदमिहाकूतम् — न सुखेतरत्वं तावदुपाधिः साध्यासमव्याप्तिकत्वात्। तथाहि — यद्भावरूपं तत्सुखेतरं इति यद्यपि साध्यव्यापकत्वमस्ति; तथापि यत्सुखेतरत् तद्भावरूपमिति न व्याप्तिरस्ति, घटाभावादौ व्यभिचारात्। ननु साधनाव्यापकत्वे सति साध्यव्यापक एवोपाधिः; नतु साध्यसमव्याप्तिः — न, तथा सति प्रसिद्धानुमानस्यापि भङ्गप्रसङ्गात्। तथाहि — पर्वतोऽग्निमान् धूमवत्त्वात् महानसवदित्यत्रापि पक्षेतरत्वमुपाधिस्स्यात्। यो धूमवान् स पक्षेतर इति साधनव्यापकत्वं तावदस्य नास्ति, पक्षस्यापि धूमवत्त्वानुभवात्। योऽग्निमान् स पक्षेतर इति साध्यव्यापकत्वञ्चास्ति, पक्षस्याद्याप्यग्निमत्त्वानिश्चयात्। यश्चोपाधिलक्षणविधायी श्लोकः —

एकसाध्याविनाभावे मिथस्संबन्धशून्ययोः।
साध्याभावाविनाभावी स उपाधिर्यदत्ययः॥

स तावदित्थं व्याख्यातः — यदत्ययो यस्याभावः साध्याभावेनाविनाभावी व्याप्तः स उपाधिरुच्यते। यथा स श्यामो मैत्रतनयत्वात् गृहगतमैत्रतनयवत् इत्यत्र

## संबन्धोक्तिः।

निरुपाधिको हि संबन्धो व्याप्तिः। स चोपाधिः दृश्यः अदृश्यो वा? दृश्योऽनुपलम्भादेव निरसितुं शक्यः। अदृश्यः पुनराशङ्क्यमानः सर्वगतः परिच्छिन्नो वा? परिच्छिन्नोऽपि नित्यो वा अनित्यो वा? तत्र सर्वगतत्वे साधनव्यापकता; परिच्छिन्नत्वेऽपि नित्यश्चेत् समव्याप्तिपक्षे साध्यस्यापि सदातनता स्यात्। विषमव्याप्तिपक्षेऽपि साधनव्यापकता; अनित्यत्वेऽपि साध्यसाधनव्यभिचारित्वे अव्यभिचारित्वे वा लक्षणाभावात् नोपाधिः। पूर्वत्र साध्याव्यापकत्वात्। उत्तरत्र साधनव्यापकत्वात्। एकतराव्यभिचारित्वेऽपि साध्याव्यभिचारित्वेऽपि साधनव्यापकत्वात् एकतराव्यभिचारित्वेऽपि साध्याव्यभिचारित्वेऽपि साध्यसाधनव्यभिचारित्वे अव्यभिचारित्वे वा लक्षणाभावात्। सोपाधिपूर्वसाध्यव्याभिचारित्वाददुत्तरत्र साधनव्यापकत्वादेकतराव्यभिचारित्वेऽपि साध्याव्यभिचारित्वे तत्सामग्रीतो व्यतिरेकानिरूपणात् सैव साधनव्यापकता। साधनमात्राव्यभिचारित्वे तु साधनव्यापकत्वादेव अनुपाधित्वम्। इतोऽन्यथाभूतस्याप्युपाधेः शङ्कया अनुमानभङ्गे धूमानुमानेऽपि तत्संभवात् सर्वानुमानभङ्गप्रसङ्ग इति भावः॥

निबन्धः ।

शाकाद्याहारपूर्वकत्वं उपाधिः । साध्यस्य श्यामत्वस्याभावेन अविनाभाव्यत्वात् । ननु तर्हि शब्दोऽनित्यः सामान्यवत्वे सत्यस्मदादिबाह्यप्रत्यक्षत्वात् पटवदित्यत्रापि कृतकत्वमुपाधिस्स्यात् । यदनित्यं न भवति तत्कृतकमपि न भवतीति साध्यस्यानित्यत्वस्याभावेनाविनाभाव्यत्वात् । नच प्रध्वंसे व्यभिचारः, प्रागसत्वे सति सत्तासमवायित्वलक्षणत्वात् कृतकत्वस्य । प्रध्वंसे च तन्नास्तीति भवत्येव कृतकत्वमुपाधिः । तन्निरासायोक्तम् — 'मिथः संबन्धशून्ययोः' इति । परस्परसंबन्धशून्ययोः द्वयोः मध्ये यदत्यय इति संबन्धः । इह च यत्सामान्यवत्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यं तत्कृतकमिति संबन्धस्य अविनाभावस्य सद्भावादनुपाधित्वम् । एकेन परप्रयुक्तहेतुना साध्येन सहाविनाभावे सतीति स्वरूपसङ्कीर्तनं, नतु लक्षणं व्यावर्त्याभावात् । एतदुक्तं भवति — साधनाव्यापकत्वे सति साध्याभावाविनाभावात्यय उपाधिरिति ॥

अत्रोच्यते —नेदमपि लक्षणं सज्जनमनोनुरञ्जकम् , ईश्वरानुमाने शरीरजन्यस्योपाधितापातादतिव्यापकत्वाद्वा । ननु सकर्तृकत्वशरीरजन्यत्वयोः नास्ति व्याप्तिः बाधकतर्काभावात् । अथ बाधकः कथं व्याप्तावुपयुज्यते? किं व्यभिचारशङ्कानिराकरणेन? अथवोपाधिशंकानिराकरणेन? यद्याद्यः तर्ह्युपाधिलक्षणपरीक्षणे न मनः खेदनीयं, व्यभिचारादर्शनमात्रेण व्याप्तिग्रहणसंभवात् । तर्काच्च शङ्कानिरासः । यदि द्वितीयः तदा चक्रकापत्तिः । उपाधिलक्षणे सिद्धे तन्निराकरणेन बाधकस्य व्याप्त्युपयोगित्वं, सति च तस्मिन्निह तदभावादव्याप्तिस्ततश्चोपाधिलक्षणसिद्धिरिति ॥

अन्ये त्वाहुः — निरुपाधिकसाध्यसाधनसंबन्धेऽविनाभावे सिद्धे सत्युपाधिलक्षणं सिध्यति । सिद्धे च तस्मिंस्तदधीननिरूपणो निरुपाधिकसंबन्धोऽविनाभावः सिध्यतीतीतरेतराश्रयम् । यच्चेदं लक्षणद्वयं—साधनाव्यापकत्वे सति साध्येन समव्याप्तिरिति , साध्यसमानवृत्तित्वे सति पक्षावृत्तिरुपाधिरिति च, तदपि असत् , प्रसिद्धानुमानेऽपि सपक्षत्वस्योपाधेः प्रसङ्गात् । यच्चोदाहरणं स श्यामेत्यादि तदप्यसत्, साधनव्यापकत्वात् परिदृश्यमानमैत्रतनयस्तोमे मैत्रतनयत्वस्य शाकाद्याहारपरिणत्या व्याप्तिमुपलभ्य देशान्तरवर्तिन्यपि तदनुमानात् । न चाहारविपर्ययशंकया व्याप्त्यनिश्चयः , तथा सति कार्यत्वस्यापि सकर्तृकत्वेन व्याप्त्यनिश्चयप्रसङ्गादिति । यदा प्रसिद्धोपाधेरपि एतादृशी गतिः तदा शङ्कितोपाधिपरिभाषाया दत्त एव जलाञ्जलिः, सर्वानुमानोच्छेदश्च । निर्बीजोपाधिवज्रस्य सर्वत्र पातसंभवात् । तदेवमुपाधेर्दुर्निरूपकत्वात् अप्रमाणकत्वाच्च लिङ्गलिङ्गिनोस्संबन्धो-

**एवं स्थिते 'विज्ञानमानन्दं ब्रह्म' इति श्रुतौ आनन्दशब्दस्य स एवार्थो लोकानुसारात्। बाधकादन्यथात्वमिति चेत्; न, तदनिरूपणात्।**

---

निबन्धः।

ऽविनाभावो व्याप्तिरिति चोच्यत इति स्थितम्॥

ननु तथापि सातिशयत्वं न भावरूपत्वे प्रयोजकं निरतिशयस्याप्याकाशादेर्भावरूपत्वात् — न, सपक्षैकदेशस्यापि गमकत्वाद्धूमवत्त्वादिवत्। सातिशयत्वस्यापि भावत्वानभ्युपगमेऽभावस्यापि सातिशयत्वापातः। तस्मात्सिद्धं सातिशयत्वेन भावरूपत्वम्। किंच आत्मविशेषगुणवत्त्वं सुखस्याभ्युपगम्याभावतां ब्रुवाणः कथं व्युत्पन्नमतिषु नापत्रपेत? तदेवं लोके भावरूपत्वं प्रसाध्य वेदेऽप्यतिदिशति — **एवं स्थित इत्यादिना**। यद्यपि लोके भावरूपं सुखमानन्दशब्दार्थः, तथापि वेदे अन्यथात्वं दुःखाभावविषयत्वं सुखशब्दस्य भविष्यति, बाधकसंभवात्। तथाहि— लोके कार्यं दुःखसंभिन्नं च सुखं दृष्टं; ब्रह्मण्यपि तथैव इत्यपुरुषार्थत्वप्रसङ्गो मोक्षस्येति चोदयति— **बाधकादन्यथात्वमिति**। परिहरति— **तदनिरूपणादिति**॥

अयं भावः— कार्यत्वे न तावत् सुखस्य प्रमाणमस्ति। साधनोपादानानुपपत्तिः प्रमाणमिति चेत्, न, अभिव्यक्त्यर्थत्वेनाप्युपपत्तेः कूपाकाशकारकव्यापारवत्। न च तद्वदेव स तदवस्थानप्रसङ्गः। शुभकर्मोपस्थापितान्तःकरणवृत्तिविशेषप्रतिबिम्बभावस्याभिव्यक्तेरङ्गीकारात् न च व्यञ्जकापगमे प्रतिबिम्बस्थितिरस्ति। क्वचित्स्वच्छतादिवैचित्र्यादेव च सातिशयत्वप्रतीत्युपपत्तौ सापि न कार्यत्वं गमयति। सुखं कार्यं विभुविशेषगुणत्वात् शब्दवदिति चेत्, न, असिद्धत्वाद्धेतोः। न तावत् सुख्यहमिति प्रतिभासो गुणत्वप्रमाणं, दण्ड्यादौ व्यभिचारात्। नापि सुखं गुणः पदार्थपञ्चकव्यतिरिक्तत्वे सति द्रव्यपरतन्त्रत्वाद्रूपादिवदिति प्रयोगोऽङ्गभागी हेत्वसिद्धेः। साधयिष्यति ह्यात्मनस्सुखत्वं पारतन्त्र्यप्रतिभासस्यामुख्यसुखविषयत्वेनोपपत्तेः, व्यधिकरणासिद्धेश्च॥

संबन्धोक्तिः।

अथ भवतु भावरूपानन्दसद्भावो लोके; तथापि न ब्रह्मणि तत्संभव इत्याशङ्क्याह — **एवं स्थिते इति**। तत्र हेतुः — **लोकानुसारादिति**। 'लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः' इति न्यायादित्यर्थः। मुख्यार्थत्वस्य औत्सर्गिकत्वेऽपि शब्दानामपवादात् अन्यथात्वं गङ्गादिशब्दवत् इति शङ्कते — **बाधकादन्यथात्व-**

ब्रह्मात्मभावरूपे मोक्षे तदानन्दरागात् प्रवर्तमानस्य संसारप्रसङ्गो बाधकः स्यात्। रागनिबन्धना च प्रवृत्तिः संसारबीजमिति हि शास्त्रस्थितिरिति चेत्। मैवम्, अस्य परमानन्दगोचरत्वे तत्प्रवृत्तिविरोधित्वात्। परमो हि ब्रह्मानन्दः,

---

निबन्धः।

किंच कल्पितकार्यत्वादिसाधने साधारणकार्यत्वादिसाधने वा सिद्धसाधनम्। वास्तवकार्यत्वादिसाधने साध्यवैकल्यम्। तस्मात् कार्यत्वे प्रमाणाभावात् सुखं मे जातमित्यादिप्रतिभासस्य घटाकाशादिजन्मादिप्रतिभासवत् भ्रान्त्युपपत्तौ सुखस्याकार्यत्वं लोकेऽपि सिद्धम्। यच्च दुःखसंभिन्नत्वमुक्तं तदपि न, 'न लिप्यते लोकदुःखेन बाह्यः' इत्यादिश्रुतेः। तस्मात् बाधकानिरूपणात् ब्रह्मण्यपि भावरूप एवानन्द इति। बाधकान्तरं शंकते— **ब्रह्मात्मेत्यादिना**। रागनिबन्धनप्रवृत्तिरनर्थमूलमिति न व्याप्तिः। किंतु यद्रागनिबन्धना या पुष्कलप्रवृत्तिस्सा तत्प्राप्तये हेतुर्भवति। क्वचित्तु निषिद्ध-गोचरत्वमेवानर्थमूलत्वे प्रयोजकम्। तथा च ब्रह्मानन्दरागादपि प्रवृत्तिः तत्प्राप्तये हेतुर्भवति, न संसाराय। प्रत्युत संसारप्रवृत्तिविरोधित्वमेव मुमुक्षुरागस्येति परिहरति— **मैवमिति**। ननु ब्रह्मानन्दस्य परमत्वे प्रमाणाभावात् परमानन्दकामोऽपि सांसारिक एव सुखविशेषे प्रवर्तते इत्याशङ्क्याह— **परमो हीति**। तादृश एवेत्यतः प्राक्तनः स्पष्टार्थः॥

संबन्धोक्तिः।

**मिति**। गूढाभिसन्धिराह सिद्धान्ती— **न तदिति**। मुक्त्यनुपपत्तिर्बाधिका इति स्वाभि-प्रायमाविष्करोति पूर्ववादी— **ब्रह्मेति**। कुत इत्यत आह— **रागेति**। 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' इति, 'इति नु कामयमानः', 'कामबन्धनमेवेदं नान्यदस्तीह बन्धनम्' इत्यादिशास्त्रेभ्यो राग-निबन्धना प्रवृत्तिः संसारबीजतया अवगम्यत इत्यर्थः॥

यद्विषयः कामो भवति स तत्साधने प्रवर्तयन् तत्फलसंपादनद्वारेण संसार-हेतुरिति शास्त्रस्य हृदयम्। 'यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते' इति वचनात्। अस्य च ब्रह्मानन्दरागस्य तत्संप्राप्तिसाधन एव प्रवृत्तिहेतुतया संसारप्रवृत्तिविरोधित्वात्। प्रत्युत मुमुक्षोरेव मोक्षसाधनश्रवणादावधिकृतत्वात् मोक्षं प्रति तद्रागस्यानुकूलतैव। अतः शास्त्रहृदयानभिज्ञो भवान् इति परिहरति— **मैवमिति**। एतदेव प्रपञ्चयति— **परमो हीति**॥

'सोऽस्य परम आनन्दः', 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः। तथा च तद्गोचरो रागः कथमल्पीयसि अनेकदुःखसंभिन्ने सांसारिके सुखे प्रवर्तयेत्? तदलाभे कदाचिदन्यत्र प्रवृत्तिर्भवेत्,

'अलाभे मत्तकाशिन्या दृष्टा तिर्यक्षु काम्यता'

इति न्यायादिति चेत्, भवत्वेवं कस्यचित्, न तु सर्वस्य। महारम्भस्याव्यग्रमनसो वशीकृतेन्द्रियग्रामस्य प्रकृत एवार्थे प्रवृत्तिसंभवात् तादृश

---

निबन्धः।

ननु मनोरथमात्रमेतत्। नास्त्येव साधनचतुष्टयसंपन्नोऽधिकारिविशेषः। तथाहि — नित्यानित्यवस्तुविवेकस्तावत् न संभवति, तत्कारणाभावात्। वैराग्यादिकमपि सर्वथा चेत्, न कस्यचिद्दृष्टम्। ईषच्चेत् सर्वस्यास्तीति सर्वेषामधिकारप्रसङ्गः। अथ निरधिकारस्य मोक्षशास्त्रस्य वैयर्थ्यप्रसङ्गाद्विशिष्टाधिकारिलाभः; न, सर्वाधिकारत्वस्य संभवादित्यत आह — तादृश एवेति। साधनचतुष्टयसंपन्न एवाधिकारी मोक्षशास्त्रे

संबन्धोक्तिः।

विशिष्टविषयेण रागेण विशेष्यस्यापि विषयीकरणात् विशेषणालाभे विशेष्यमात्रेऽपि स प्रवर्तयति; तथा लोके दृष्टत्वात्। तथा च परमानन्दगोचरोऽपि रागः तदलाभे अल्पीयस्यपि सांसारिके सुखे प्रवर्तयेत्। ततश्च मोक्ष एव प्रवर्तयेत् इति न नियन्तुं शक्यते इति शङ्के — तदलाभ इति। मत्तकाशिनी वराङ्गना। तत्र यथा लोके फलरागादन्य एव साधनविषयो रागः तत्प्रवृत्तिहेतुः, तथा विशिष्टविषयाद्रागादन्य एव केवलविशेष्यादिविषयः तत्प्रवृत्तिहेतुः। तेन परमानन्दगोचरात् रागात् अन्य एव विषयसुखरागः संसारप्रवृत्तिहेतुरित्यविरोधो यद्यपि, तथापि अङ्गीकृत्य परिहरति — भवत्वेवमिति। परमानन्दालाभेऽपि न सर्वेषां विषयानन्दाभिलाषनियमः। उक्तविशेषणविशिष्टानां विषयेषु रागासंभवात्। तथा हि — महति पुरुषार्थे राज्यादौ प्रवर्तन्ते; ततो विप्रकृष्टफलेपूपनतेष्वपि न प्रवर्तन्ते। न भवन्ति च कार्यदलाभेपि कार्यस्य व्यग्रमनसः। न भवन्ति च तत्प्राप्तिपरिपन्थिषु व्यसनादिषु प्रसक्तेन्द्रियाः।

'आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च।
महारम्भाः कृतधियः तिष्ठन्ति हि निराकुलाः॥'

इत्यादिदर्शनादित्यर्थः।

निबन्धः ।

अभिप्रेतः । न सर्वाधिकारं मोक्षशास्त्रं, रागाद्याक्षिप्तचित्तस्य मोक्षशास्त्रे प्रवृत्त्यनुपपत्तेः । तथाच श्रुतौ 'तद्यथेह कर्मचितः' इत्यादिना नित्यानित्यवस्तुविवेको दर्शितः । 'परीक्ष्य लोकान्' इति वैराग्यमुक्तम् । 'शान्तो दान्तः' इति शमादयो दर्शिताः । सर्वत्र च फलश्रुतयः कामनोद्बोधद्वारेण मुमुक्षोरधिकारप्रदर्शनार्थाः ॥

तत्र नित्यानित्यवस्तुविवेको नाम मानुषानन्दादारभ्य ब्रह्मलोकपर्यन्तानन्दानां मनुष्यत्वादिस्थावरपर्यन्तानर्थरूपाणां च साधनोपकरणतदाधारचतुर्दशभुवनसहितानां सावयवत्वविभक्तत्वादिहेतुना कार्यत्वावधारणपूर्वकमनित्यत्वज्ञानम् । कार्यस्य कारणत्वानुपपत्तेः अविभक्तं निरवयवं नित्यमेकं कारणमस्ति इति । अहमपि निरवयवत्वाद्देहद्वयव्यतिरिक्तत्वेन स्वयंप्रकाशत्वेन चैतन्यैकस्वभावः, प्रतीयमानभेदस्य बुद्ध्याद्युपाध्यन्वयव्यतिरेकित्वात् स्वतः परतश्च भेदासिध्ययोगात् अनित्यत्वे अकृताभ्यागमादिदोषप्रसङ्गाच्च नित्य एव कार्यपक्षाद्व्यावृत्तः, कारणस्यासर्वज्ञासर्वशक्तित्वाभावात् नवेति संशयशिरस्कं नित्यानित्यवस्तुविषयम् ॥

इहामुत्रार्थभोगविरागो नाम मनुष्यत्वादिस्थावरान्तेषु स्वभावत एव विरक्तत्वात् तदादिब्रह्मलोकान्तेषु आनन्देष्वनित्यत्वात्तत्प्राप्त्यर्थसाधनानुष्ठानजनितायाससंभेदाद्भोगाक्षिप्तकायादिव्यापारजनितदुःखमिश्रितत्वात् भोगोत्तरकालं च दुःखहेतुत्वात् परिच्छिन्नत्वाच्च दुःखप्राप्यत्वात् नारकदुःखित्ववदर्थित्वयोगो न भवतीति निश्चयपूर्वकं वर्तमानशरीरस्थितिहेतुभूताप्रतिषिद्धान्नपानादिव्यतिरिक्तविषयप्रवृत्तिकारणेच्छाविरुद्धो निश्चलचेतोविशेषः । अहं च साधनसाध्यसकलसुखव्यतिरिक्तोऽपि सुखस्य व्यवस्थापकत्वात् सुषुप्तौ च सुखस्वरूपानुभवाद्दुःखस्यापि स्वच्छस्य मुखस्य कृपाणादाविव कार्ष्ण्यधर्मोपहितमलिष्ठविषयोपाधावेवावभासमानत्वान्निरुपाधिकसुषुप्ते चानवभासात् चैतन्यवान्नित्यानन्दस्वभावः साधनान्तरसाध्यानन्दान्तरस्वभावो वेत्येवंरूपसंशयशिरस्कः ॥

शमो नामान्तःकरणव्यापाराणां प्रतिषिद्धानामप्रतिषिद्धानामपि लौकिकानां स्वाधिकारनिष्पत्त्यनुपयोगिनां निष्फलत्वावधारणपूर्वकः परित्यागः । दम इति च बहिष्करण-

संबन्धोक्तिः ।

'शान्तो दान्त उपरतः' इत्यादिनापि विगतविषयरागप्रतिबन्धस्यैवात्मदर्शनाधिकारित्वश्रवणात् इत्थमेवाभ्युपगन्तव्यमित्याह— तादृश एवेति । आब्रह्मस्तम्ब-

एवाधिकारी मोक्षशास्त्रे विवक्षितः। न च सर्वाधिकारं किमपि शास्त्रं संभवतीति॥

### निबन्धः।

व्यापारागामुक्तलक्षणानां परित्यागः। उपरतिरिति च वैराग्यादेव कामाभावात् काम्यकर्माधिकारनिवृत्तौ परिशेषाणां नित्यानां कर्मणां विधितः प्राप्तानां सत्वशुद्धिद्वारेण विविदिषाफलसिद्धौ कृतप्रयोजनकृष्णविषाणस्येव विधित एव परित्यागः। तितिक्षुत्वं नाम शीतोष्णादिकद्वन्द्वानां स्वाधिकारनिर्वृत्यपेक्षितजीवनाविच्छेदहेतुव्यतिरिक्तानां सहिष्णुता। समाधानं नामोक्तप्रकारेण सर्वव्यापारोपरमे प्राप्तेऽपि स्वभावबलप्राप्तमनोराज्यविधित्सितश्रवणादिविषयमनस्कारप्रतिकूलनिद्रालस्यादिविरोधेन चेतसोऽवस्थानम्। एतैस्संपन्नत्वं शमदमादिसाधनसंपत्। अहं च सकलमनःकायव्यापाराणां परोपाधावेवानुभूयमानत्वात् कूटस्थैकस्वभावः किंवा विकारान्तरवानिति संशयपर्यन्तत्वं शमदमादिसंपत्तेरपि अस्ति॥

विद्यमानपदार्थस्य स्वसत्ताप्रयुक्तव्यवहारकार्योपरोधको बन्धः। यथा वत्सादीनां पाशादिः। तद्वियोगो मोक्षः। एवमात्मन्यपि देहद्वयव्यतिरिक्ते सत्यज्ञानस्वरूपे ब्रह्मस्वभावव्यवहारकार्यप्रतिबन्धकाध्यात्माधिभूताधिदैवतात्मको बन्धः। तस्य सनिदानस्य निवृत्तिः मोक्षः। तद्विषयेच्छा मुमुक्षा, तद्भावो मुमुक्षुत्वम्। आत्मन्यध्यात्मादिपदार्थविविक्ततया सुषुप्तेऽनुभवात् किमेतद्वियुक्तस्वभाव एवाहं किं वैतत्कारणेन केनचिदन्वित इति संशयशिरस्कत्वं मुमुक्षुत्वस्याप्यस्ति। तस्माद्विशिष्टाधिकारिसंभवान्न सर्वाधिकारं मोक्षशास्त्रमिति भावः॥

किंच स्थूलार्थविषयमपि तावच्छास्त्रं न सर्वाधिकारम्। नहि चिकित्साज्ञानकामो व्याकरणे प्रवर्तते। नापि साधुशब्दज्ञानार्थी चिकित्साशास्त्रे। किमङ्ग पुनरिदमतिसूक्ष्मार्थविषयं न सर्वाधिकारमित्यभिप्रेत्याह — नचेति॥

तस्मात् मोक्षशास्त्रस्य विशिष्टाधिकारिमत्वात्तस्य च स्वकामितमोक्षसाधन एव

### संबन्धोक्तिः।

पर्यन्तैः सर्वप्राणिभिः सर्वप्रकारस्यापि दुःखस्य स्वरसत एव जिहासितत्वात् तन्निवृत्त्यर्था प्रवृत्तिः स्वरसत एव। 'शमाय शास्त्रं जगतो जगाद' इति च सर्वेषामधिकारो दर्शित इति तत्राह— **न चेति**। तत्रापि विषयरागादिप्रतिबन्धशून्य एव सर्वः फलपर्यन्तप्रवृत्तावधिकृतो विवक्षितः। अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः अधिक्रियते इति न्यायादित्यर्थः॥

यस्त्वेवमपि दर्शनकथंतासंबोधरहितः यथादर्शनपूजकः प्राह—रागनिबन्धनत्वादेवेयं प्रवृत्तिः संसारबीजं, इतरप्रवृत्तिवदिति । तस्य च दुःखोच्छेदमात्रेऽपि मोक्षे तद्द्वेषनिबन्धना प्रवृत्तिः द्वेषनिबन्धनेत्येव कथं न संसारबीजं भवेत्, तथाभूतेतरप्रवृत्तिवत् । न तत्र द्वेषात् प्रवृत्तिः किन्तु संसारासारतातत्त्वदर्शननिष्पन्नादुद्वेगात्, मिथ्याज्ञाननिदानो हि द्वेष इति चेत्—अत्रापि तर्हि न रागात् प्रवृत्तिः, अपि तु परमार्थदर्शननिदानायाः परमानन्दश्रद्धाया एव । नहि इच्छामात्रं रागः, किं तर्हि? मिथ्याज्ञान-

---

निबन्धः ।

प्रवृत्तेः तद्विरुद्धसंसारप्रवृत्तिर्विरुद्धैव । नो खलु शैत्यकामो ग्रीष्मे दहनमुपसर्पति । ततो ब्रह्मणि भावरूपानन्दाभ्युपगमेऽपि न संसारप्रसङ्गो बाधक इति स्वपक्षे दोषं परिहृत्य परपक्षेऽपि प्रसञ्जयितुं परोक्तमनुवदति—यस्त्वेवमपीति । कथमित्यस्य भावः कथन्ता । कथन्नु नाम दर्शनस्थितिरिति सम्बोधरहितः स्वपरपक्षरहस्यानभिज्ञ इत्यर्थः । यथादर्शनपूजको यथास्थितग्रन्थमात्रदर्शीत्यर्थः । विमता प्रवृत्तिः संसारबीजं द्वेषनिबन्धनप्रवृत्तित्वात् ब्राह्मणहननादिप्रवृत्तिवत् इत्युक्ते हेत्वसिद्धिं शंकते — न तत्र द्वेषादिति । षट्पदार्थसाधर्म्यवैधर्म्यपरिभावनाजनितसंसारानित्यत्वादिज्ञानमुद्वेगः, मिथ्याज्ञानहेतुकोऽनिष्टतत्साधनविषयस्तु द्वेष इति विभागः । अत असिद्धो हेतुरित्यर्थः । रागनिबन्धनप्रवृत्तित्वात् इत्यप्यसिद्ध एव तर्हि हेतुरित्याह — अत्रापि तर्हीति । हिरण्यगर्भपर्यन्तकर्मसाध्यानन्दस्यानित्यत्वादिदोषदर्शनं परमार्थदर्शनम् । तन्निदानं कारणं यस्याः । ननु परमानन्दश्रद्धायाः प्रवृत्तिरित्युक्तरागादेव प्रवृत्तिरित्युक्तं भवति, तयोरैक्यादित्याशंक्य

संबन्धोक्तिः ।

स्थूलदर्शिनां मतमुपन्यस्य दूषयति—यस्त्वित्यादिना । कथंतासंबोधरहितः; कथमो भावः कथंता । केन कारणविशेषेण इत्थं दर्शनमुपपन्नमिति विचाररहित इति यावत् । दर्शनोपपादकोपपत्तिज्ञानरहित इत्यर्थः । यथादर्शनपूजकः आपातदर्शनमेवाद्रियमाणः । आभाससमानयोगक्षेमत्वात् नेदं प्रामाणिकमित्यर्थः । द्वेषनिबन्धनत्वमसिद्धम्, द्वेषोद्वेगयोः कारणभेदात् भेद इति शङ्कते— न तत्रेति । संसारासारताविषयं तत्वदर्शनं सम्यग्ज्ञानं तस्मादिति यावत् । द्वेषस्य तु तत्त्वदर्शनविपरीतमिथ्याज्ञाननिबन्धनत्वात् ततोऽयमित्याह— मिथ्येति । अस्मन्मतेऽप्येतत् समानमित्याह—अत्रापीति । रागाद्वैलक्षण्यं ज्ञापयितुं कारणभेदेन श्रद्धां विशिनष्टि— परमार्थेति ।

**निदानैव सा । अत एव भगवान् पतञ्जलिः अविद्याक्षेत्रत्वमाह स्म परेषां क्लेशानाम् 'अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्' इति । तस्मात् मुख्यार्थे बाधकाभावात् ब्रह्मण्यानन्दश्रुतिः न दुःखाभावपरतयोपचरणीयेति सिद्धम् ॥**

---

निबन्धः ।

आह— न हीच्छामात्रमिति । प्रमाणानुसारिणी इष्टतत्साधनविषया चेतोवृत्तिरिच्छा । मिथ्याज्ञानहेतुका सैव चेतोवृत्तिः राग इत्यर्थः ॥

रागस्य मिथ्याज्ञानहेतुकत्वमाप्तोक्त्या द्रढयति — **अत एवेति** । 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः' इत्यभिहितम् । 'अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां' इति । अस्य च सूत्रस्यायमर्थः संक्षेपतः— अविद्या क्षेत्रं प्रसवभूमिरुत्तरेषां अस्मितादीनां । प्रसुप्ताश्च ते तनवश्च ते विच्छिन्नाश्च ते उदाराश्च तेषामिति

संबन्धोक्तिः ।

ननु श्रद्धाशब्देन इच्छा उच्यते; इच्छा च राग एव इति; तत्राह— **न हीति** । कुत इति कारणभेदात् इत्याह— **किं तर्हीति** । इच्छात्वाविशेषेऽपि सम्यङ्मिथ्याज्ञानकार्यतया तयोर्भेद एवेत्यर्थः ॥

उक्तेऽर्थे अभियुक्तवाक्यं प्रमाणयति — **अत एवेति** । तत्र अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः । 'अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मबुद्धिरविद्या । दृग्दर्शनशक्त्योरेकात्मतेवास्मिता । सुखानुशायी रागः । दुःखानुशायी द्वेषः । विदुषोऽपि स्वरसवाही तथारूढोऽभिनिवेशः ।' इति निर्दिष्टानां क्लेशानां मध्ये प्रथमनिर्दिष्टा अविद्यैव उत्तरेषां चतुर्णां क्षेत्रं प्रसवभूमिः । तानेव चतुरः क्लेशान् विशिनष्टि — **प्रसुप्तेति** ॥

'प्रसुप्तास्तत्त्वलीनानां तनुदग्धाश्च योगिनाम् ।
विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम् ॥'

इति यावत् । तेन मिथ्याज्ञाननिदान एव राग इत्यर्थः । तदेवं रागस्य संसारप्रवृत्तिहेतुत्वेऽपि परमानन्देच्छायाः रागत्वाभावात् ब्रह्मणः परमानन्दरूपत्वेऽपि न संसारप्रवृत्तिः बाधिका । तेन प्रबलबाधकाभावात् आनन्दशब्दस्य मुख्यार्थत्वं सिद्धमित्युपसंहरति — **तस्मादिति** ॥

ब्रह्मेति च तत्र तत्र परमात्मोच्यते। तथा चायं आनन्दस्वभावः स्यात्, आत्मत्वात् अपरात्मवत्। 'तत्त्वमसि' इत्यसकृदैकात्म्यश्रुतेश्च। न

---

निबन्धः ।

विग्रहः। तत्र प्रसुप्तिर्नाम चेतसि शक्तिमात्रप्रतिष्ठो भावः। प्रसंख्यानवतो हि दग्ध-क्लेशबीजस्य संमुखीभूतेऽपि विषये नैषामभिव्यक्तिरस्ति। दग्धबीजानां प्रबोध-स्तनुत्वमुच्यते। प्रतिपक्षभावनोपहता हि क्लेशास्तनवो भवन्ति। तथा विच्छिद्य विच्छिद्य ते न समुदाचरन्तीति विच्छिन्नाः उच्छिन्ने रागादिकाले क्रोधाद्यदर्शनात्। विषये यो लब्धवृत्तिस्स उदारः। सर्व एवामी क्लेशाः अविद्यादिभेदा एव, विपर्ययकाल एवो-पलंभादिति। एषां च स्वरूपमुक्तम्—अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्म-ख्यातिरविद्या। बुध्यात्मनोः तप्तायःपिण्डवत् संश्लेष इवावभासोऽस्मिता। सुखतत्साधन-लोभो रागः। दुःखतत्साधनजिहासा द्वेषः। सर्वस्य चात्माऽहं मा न भूवं भूयासमिति सोऽभिनिवेश इति। यस्माद्रागनिबन्धनप्रवृत्तित्वादित्यस्य असिद्धत्वात् भावरूपानन्दाभ्यु-पगमेऽपि न संसारप्रसङ्गस्तस्मादित्युपसंहारः॥

एवमानन्दपदं व्याख्याय आत्मानमिति द्वितीयपदं व्याख्यातुं पातनिकां करोति—**ब्रह्मेति चेति**। किंच आनन्दरूपप्रत्यगात्माभिन्नत्वाच्चायं परमानन्दस्वभावः।

संबन्धोक्तिः ।

ब्रह्मण आत्मत्वेन आनन्दस्वरूपतां साधयितुं 'आत्मानम्' इति श्लोके विशेषणमुपात्तम्। तस्य हेतोः पक्षधर्मतामाह—**ब्रह्मेति चेति**। न च जीवत्व-मुपाधिः। यस्तु जीवो न भवति, असावानन्दस्वभावो न भवति, यथा घटः इति व्यतिरेके अनात्मत्वस्य उपाधित्वात् इति भावः। अप्रसिद्धविशेषणता चिरन्तनतार्किक-मतानुसारेण परिहरणीया। आनन्दत्वं परत्र नातिवर्तते, आनन्दवृत्तित्वात्, प्रमेयत्ववत् इत्यादिमहाविद्यानुमानैर्वा प्रसिद्धिरूहनीया। न च घटत्वादिकमेतादृशे वर्तते, घटादि-वृत्तित्वात् इत्याभाससमानयोगक्षेमता; तत्र विपक्षबाधकतर्काभावेन अप्रयोजकत्वात्। प्रकृते च प्रेमगोचरताभावस्यैव विपक्षे बाधकत्वात् इति द्रष्टव्यम्। न केवलं विपक्षादेः बाधकाभावात् अनुपचरितार्था आनन्दश्रुतिः, अनुकूलतर्कसद्भावादिति भावः॥

इदानीमनुमिनोति—**तथा चेति**। एकत्वादपि जीवपरयोः जीवस्य आनन्दात्मत्वात् परमात्मनोऽपि तत्सिद्धमित्याह—**तत्त्वमसीति**। तदेव उपपादयति—

खल्वानन्दात्मनो जीवादभिन्नः परमात्मा तद्विपरीतो भवितुमुत्सहते विरोधात् । जीवश्च परमानन्दस्वभावः परप्रेमास्पदत्वात् । य उक्तसाध्यो न भवति नासावुक्तसाधनः यथा घटः । न चायमुक्तसाधनो न भवति । तस्मान्न नोक्त-

---

निबन्धः ।

कुतोऽभेद इत्याह — तत्त्वमसीति । प्रत्यगात्माभिन्नोऽपि परमानन्दस्वभावो न भवतु । यथा शुद्धबिम्बाभिन्नमपि प्रतिबिम्बं न शुद्धं, तत्राह — न खल्वानन्दात्मन इति । एतस्यैवानन्दरूपत्वात् **विरोधात्** आनन्दरूपत्वविरोधात् । प्रतिबिम्बमपि स्वरूपेण शुद्धमेवाशुद्धिस्तूपाधिगता भ्रमादेवावभास इति भावः । ननु जीवस्यानन्दात्मकत्वे सिद्धे सतीदं सर्वं सिध्यति; तदेव त्वसिद्धमित्याशंक्याह — **जीवश्चेत्यादिना** ॥

किमिह आनन्दजात्यभेदः साध्यते, किंवा व्यक्त्यभेदः इति वाच्यम् । ननु न प्रतिज्ञा विकल्पमर्हति जातिमात्रत्वात् । तथोक्तं — 'साधर्म्यवैधर्म्याभ्यामवधारितेऽर्थे प्रतिज्ञानमवलंब्य प्रत्यवस्थानं जातिः' इति; न, प्रतिज्ञार्थस्य संभावनायाः अप्यपेक्षितत्वात् । तदुक्तम् —

संभावितः प्रतिज्ञायां पक्षस्साध्येत हेतुना ।
न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः ॥ इति ।

तत्र न तावदाद्यः, जातिव्यक्त्योः भेदाभ्युपगमात् । नापि पश्चिमः कार्यत्वगुणत्वाभ्याम् । अत्रोच्यते—व्यक्त्यभेद एव साध्यते । नच कार्यत्वं गुणत्वं वा सुखस्येति प्रागेवाभ्यधायि । किंच यस्यैकरसं चैतन्यमेव सुखं विज्ञानमानन्दमित्यादिश्रुतिसिद्धम्, कथं तं प्रति सिद्धवत्सामान्यविशेषभावमुररीकृत्य विकल्प्य कथकालापावलेपोऽवकल्प्यते ॥

ननु सिद्धो लोके जातिव्यक्तिभावः पुत्रसुखं मित्रसुखं कलत्रसुखमित्येकाकारप्रत्यवमर्शात् । गौर्गौरित्यादिवन्निरुपाधिकव्यक्तिभेदासिद्धेः । एकाकारप्रत्यवमर्शस्याकाशादावप्याकृत्यैक्यनिबन्धनत्वेनाप्युपपत्तेः । इतरथा घटाकाशो मठाकाश इत्याद्येकाकारप्रत्यवमर्शाज्जातिव्यक्तिभावप्रसङ्गात् । नास्तीह व्यक्त्यैक्ये मानम्, येन दिशादिवदेकाकारपरामर्शो व्यक्त्यैक्यनिबन्धनः स्यादिति चेदुच्यते — अस्त्येव इहापि व्यक्त्यैक्ये

संबन्धोक्तिः ।

**न खल्विति** । दृष्टान्तोऽपि साध्यविकल इत्यत आह— **जीवश्चेति** । पर इत्यस्यैव

साध्य इति । न चायमसिद्धो हेतुः । परो हि निरतिशयः स्वात्मनि प्रेमा दृश्यते । कथमपरथा तादर्थ्येनैव अपरः सर्वोऽपि प्रेमगोचरः स्यात् । नो खल्वानन्दमपि लौकिकं रूपतो रोचयन्ते । किन्त्वात्मार्थम् । अन्यथा रूपाभेदेन स्वपरानन्दयोरविशेषापत्तेः । यदा त्वानन्दस्यापीदृशी दशा, तदा

---

निबन्धः ।

मानमनुमानं — 'विमतं सुखं स्वतोऽद्वितीयमवच्छेदकोपरागमन्तरेणाप्रकाशभेदत्वात् , यदेवं तदेवं, यथा आकाशं, तथा चेदं, ततः तथा' इति । तस्मात् सुखव्यक्त्यभेदस्य साध्यमानत्वात् संभवत्येव प्रतिज्ञार्थः ॥

ननु तथापि परप्रीतिविषयत्वे प्रमाणाभावादसिद्धो हेतुरित्याशंक्याह — **न चायमसिद्ध इत्यादिना** । न केवलं लोकानुभव एव प्रमाणमात्मनः प्रीतिविषयत्वे । अर्थापत्तिरपि स्वशेषत्वेन पुत्रपित्रादेरुपादानानुपपत्तिरित्याह — **कथमपरथेति** । नन्वानन्दार्थं लौकिकाः पुत्रपित्रादिकमुपाददते, न त्वात्मार्थम् । ततो नात्मा प्रीतिगोचर इत्याशंक्याह — **नो खल्वानन्दमपीति** । शुभकर्मोपस्थापितविषयविशेषसंपर्कजनिता आत्मसुखाभिव्यञ्जकत्वेन तच्छायानुहारिणी प्रीतिशब्दपर्याया चेतोवृत्तिः लौकिक आनन्द उच्यते । तमपि न स्वरूपतः प्रार्थयन्ते; किंतु स्वशेषत्वेन । **अन्यथा** स्वशेषत्वाभावे । सुखस्य स्वरूपतो विशेषाभावेन स्वपरानन्दयोः अविशेषः प्रसज्येत । यदा चानन्दस्यापि आत्मशेषत्वेन प्रियत्वं, तदा किं वक्तव्यं तत्साधने पुत्रादौ । तस्मात्सर्वस्यात्मार्थतयैव प्रियत्वादात्मनः पुनरनन्यशेषत्वान्निरतिशयप्रीत्यास्पदत्वं सिद्धम् । उक्तेऽर्थे श्रुतिं

संबन्धोक्तिः ।

व्याख्यानम् — **निरतिशय इति** । एवं अनुभवेन परमप्रेमास्पदत्वं प्रसाध्य युक्तितोऽपि साधयति — **कथमपरथेति** । तदपि कथमित्यत आह — **नो खल्विति** । आत्मानन्दव्यावृत्त्यर्थं लौकिकमिति विशेषणम् । रूपतः; स्वरूपेण इति यावत् । कथमेतदवगम्यत इत्यत आह — **अन्यथेति** । स्वार्थतामवधीर्य आनन्दत्वोपाधावेव काम्यता चेत् शत्रोरपि सुखं स्यादिति कामना भवेदित्यर्थः ॥

यदैवमानन्दस्यापि अशेषवस्तुशेषिणः आत्मशेषतया प्रियत्वं, तदाऽन्येषामात्मार्थत्वेन प्रियत्वमिति किमु वक्तव्यमित्याह — **यदेति** । तादर्थ्येन सर्वस्य प्रियत्वे

किमन्यत्र वक्तव्यमिति । भवति चात्र श्रुतिः --'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति । यच्च यदर्थं प्रियं भवति स ततोऽप्यतिशयेन प्रिय इति लोके दृष्टम् । यथा पुत्रार्थतया प्रियात् तन्मित्रादेः पुत्रः इति ॥

भवत्वेवं परमप्रेमगोचर आत्मा । तथापि परमानन्दस्वभावो माभूत् । किं बाधकमिति चेत् । उच्यते । न तावत् ससाधनस्य दुःखस्योपेक्षणीयस्य वा प्रेमगोचरता युक्ता, द्वेषात्, उपेक्षणाच्च । दुःखाभावस्य तु यद्यपि सा युक्ता, तथापि न तद्रूपत्वेनात्मनि सा संभवेत् । तस्य भावरूपत्वात् । यद्यपि च सुखसाधने प्रेमास्ति, तथापि सुखगोचरान्न्यूनः सातिशयश्च ।

---

निबन्धः ।

प्रमाणयति-- भवति चात्रेति । श्रुत्या आत्मार्थत्वेन सर्वस्य प्रियत्वमुक्तम्, न त्वात्मनो निरतिशयप्रियत्वं; तत्राह -- यच्च यदर्थमिति ॥

एवं स्वरूपासिद्धिं परिहृत्याप्रयोजकत्वं शङ्कते-- भवत्वेवमित्यादिना । परमानन्दस्वरूपत्वाभावे परप्रीतिगोचरत्वमेव न स्यान्नरकादिवत् इति विपक्षबाधकं वक्तुमारभते-- उच्यते न तावदित्यादिना । आत्मनः प्रियत्वं दुःखतत्साधनत्वे-

संबन्धोक्तिः ।

श्रुतिरपि प्रमाणमित्याह -- भवति चेति । भवत्वेवं प्रेमास्पदत्वम्; तथापि परत्वविशेषणसिद्धिः कथमिति तत्राह -- यच्चेति ॥

व्याप्तिसिद्धये विपक्षबाधकतर्कोऽपि वक्तव्य इति शङ्कते-- भवत्वेवमिति । यद्ययं परमानन्दस्वभावो न स्यात् तर्हि परमप्रेमविषयोऽपि न स्यादिति परिहरति-- उच्यत इति । आत्मनो दुःखसाधनत्वेन दुःखरूपत्वेन उपेक्षणीयत्वेन दुःखाभावत्वेन सुखसाधनत्वेन वा प्रेमगोचरत्वासंभवात् परिशेषात् सुखरूपत्वमभ्युपेयमिति दर्शयति-- न तावदित्यादिना । तस्य भावरूपत्वादिति । न च वाच्यं तस्य भावरूपत्वेऽपि दुःखाभावविशिष्टतया प्रेमगोचरता स्यात् इति; दुःखावस्थायामपि तस्य प्रेमगोचरत्वात् । अन्यथा दुःखजिहासया प्रवृत्त्यनुपपत्तेरिति भावः । सातिशय इति । स्वव्यतिरिक्तातिशयवदविनाभूत इत्यर्थः । यद्यपि सुखगोचरान्न्यूनत्वकथनेनैव सुखसाधनप्रेम्णः सातिशयत्वं सिद्धम्; तथापि निरतिशयप्रेमास्पदत्वस्य परमानन्दरूपत्वसाधकहेतोरत्नाभाव-

**स्वात्मनि तु सुखगोचरादप्यधिको निरतिशय एवायमीक्ष्यते । सुखगोचराच्च प्रेम्णोऽयमतिशयानः सुखातिशयानुशयी दृश्यते सार्वभौमोपक्रमेषु उत्तरोत्तरशतगुणेष्वानन्देषु इति सकललौकिकसुखप्रेमातिशायी निरतिशयोऽयमात्मनि प्रेमा सर्वानन्दातिशायित्वेन अनतिशयानन्दरूप एवावभासमाने तस्मिन्नवकल्पते इत्यनिच्छताप्यच्छमतिनाप्यभ्युपेतव्यम् । तदेवमपरात्मनि परानन्दस्वभावे सिद्धे तदभिन्नः परमात्मापि तद्रूप एव भवितुं युक्त इत्यभिप्रायेणोक्तं— 'आनन्दमात्मानम्' इति ॥**

---

निबन्धः ।

नोपेक्षणीयत्वेन दुःखाभावतया सुखसाधनतया वा माभूत्, तथापि सुखमात्रत्वेन भवतु। कुतोऽस्य परमानन्दस्वरूपत्वमित्याशङ्क्याह-- **सुखगोचराच्च प्रेम्ण इति** । लौकिकसुखविषयात् प्रेम्णस्सकाशात् योऽयमतिशयोपेतः प्रेमा स सुखाधिक्यव्याप्तो दृश्यते सार्वभौमादिस्थानेष्विति यतोऽतो निरतिशयोऽयमात्मनि प्रेमा अनतिशयानन्दस्वरूपे तस्मिन्नात्मन्यवभासमाने कल्पत इत्यभ्युपेतव्यमित्यन्वयः । कथमात्मविषयप्रेम्णो निरतिशयत्वमित्यतो विशिनष्टि— **सकललौकिकसुखप्रेमातिशायीति** । सकललौकिकसुखप्रेमा तमतिशेते— अतिक्रम्य वर्तते— इति तथोक्तः । सर्वस्य सोपाधिकत्वात् आत्मविषयस्य च प्रेम्णो निरुपाधिकत्वादित्यर्थः । आत्मा वा कथमतिशयानन्दरूप इत्याह— **सर्वानन्दातिशायित्वेनेति** । सर्वानन्दानतिशेतेऽतिक्रम्य वर्तते इति तथोक्तः, तस्य भावः तेन । न कोऽप्यानन्द आत्मन उत्कृष्ट इत्यर्थः ॥

संबन्धोक्तिः ।

द्योतनाय सातिशयश्चेत्युक्तम् । अनेनैव न्यायेन आत्मनः आनन्दरूपतामात्रमेव न, किन्तु परमानन्दरूपतापि सिद्ध्येदित्याह -- **सुखगोचराच्चेति** । अधस्तनानन्दानवधीर्योत्तरोत्तरशतगुणानन्दप्रेप्सया पुंसां प्रवृत्तिदर्शनात् तत्र तत्र ततोऽधिकः प्रेमेति निश्चीयत इत्यर्थः ॥

एवं विपक्षबाधकतर्कोपन्यासेन व्याप्तिं प्रदर्श्य इदानीं निगमयति— **इति सकलेति** । प्रतीत एवानन्दे पुंसां प्रेमोपलम्भात् परमानन्दस्वरूपस्यापि स्वतोऽपरोक्षत्वमभ्युपेयम्, जातमात्रस्य जन्तोः प्रवृत्तौ प्रतीयमानत्वात्, स्वर्गाद्यानन्दवत् शास्त्रादिना प्रतिपत्त्यनुपपत्तेः, सुषुप्तादावनुभूयमानस्य मानसगोचरतानुपपत्तेश्चेत्याह--

**कथं पुनर्जीवपरमात्मनोरभेदे संसार्यसंसार्यादिभावेन तयोर्भेदः सङ्गच्छते। कथं वा जीवानामपि च परस्परं पण्डितमूर्खादिभावेनेत्यत इदमुक्तं—‘असत्यभेदं’ इति। नायं तादात्म्यश्रुतिबाधितत्वात् सत्यो भेदः, किं तर्हि बिम्बप्रतिबिम्बयोः प्रतिबिम्बानामिव च परस्परमलीकनिर्भास एवोपपद्यत इत्यर्थः॥**

**किञ्च जीवाः परमात्मनस्तत्वतो न भिद्यन्ते, आत्मत्वात् परमात्म-**

---

निबन्धः।

एतदुक्तं भवति— यत्र यत्र सातिशयः प्रेमा तत्र तत्र सुखातिशयः; निरतिशयोऽयं प्रेमा निरतिशयानन्दस्वभाव एवोपपद्यते इति। ननु स्वोच्छेदमपि कामयमानः कश्चिदुपलभ्यते; अतः प्रियत्वं कुतः? कुतस्तरां प्रियतमत्वेनानतिशयानन्दरूपतेति। उच्यते — तदपि प्रियत्वस्यैव साधकम्। नहि कश्चिदप्रियेऽपि दुःखं सहते। आत्मनः प्रियत्वादेव तत्र दुःखमसहमान उद्विजते इति सन्तोष्टव्यम्। **तदेवमित्यारभ्य किंच जीवाः** इत्यतः प्राक्तनः स्पष्टार्थः॥

जीवाः परमात्मनो भिन्नाः तद्विरुद्धधर्माक्रान्तत्वात्; यो यद्विरुद्धधर्माक्रान्तः स ततो भिन्नः; यथा तुहिनमिव दहनादित्यत्र व्यावहारिकभेदसाधने सिद्धसाधनम्। पारमार्थिकभेदसाधने ‘अयमात्मा ब्रह्म’ इत्यभेदश्रुतिविरुद्धकालात्ययापदिष्टत्वं प्रति-

संबन्धोक्तिः।

**अवभासमान इति**। इत्थमर्थमुपवर्ण्य उक्तेऽर्थे श्लोकपदमवतारयति— **तदेवमिति**॥

तदभिन्नत्वं परमात्मनो न युक्तमिति शङ्कते— **कथं पुनरिति**। तदुत्तरत्वेन उत्तरपदमवतारयति— **असत्यमिति**। अत्र आदिशब्देन सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिकं संगृह्यते। एकस्मादभिन्नानां परस्परमपि भेदो न स्यादित्याह— **कथं वेति**। दुःखादिभावेन भेद इत्यनुषङ्गः। **नायमिति**। ‘तत्त्वमसि’, ‘अयमात्मा’ इत्यादिभिः श्रुतिभिः तत्पराभिः एकत्वं बोधयन्तीभिः तद्विरुद्ध औपाधिकतया व्युत्पाद्यमानो भेदो बाधितत्वान्मिथ्येत्यर्थः॥

एवं श्रुतितो जीवपरयोः अभेदं प्रसाध्य इदानीं अनुमानतोऽपि साधयति— **किञ्चेति**। औपाधिकभेदनिरासे अपसिद्धान्तः, तस्य स्वयमभ्युपगमात्। परमार्थ-

**वत् । परस्परं च भेदनिरासायोच्यते — विवादास्पदीभूतानि भोगायतनानि उभयवाद्यविवादास्पदस्यैव भोगायतनानि भोगायतनत्वात् प्रतिवादिभोगायतनवत् । यद्वा विवादास्पदानीन्द्रियाणि उभयासिद्धस्यैव भोगसाधनानि भोगसाधनत्वात् इन्द्रियत्वाद्वा प्रतिवादीन्द्रियवत् । एवं प्रत्येकं चक्षुरादिकमपि**

---

### निबन्धः ।

बिम्बादिष्वनेकान्तिकत्वाद्वोक्तम् । इदानीं प्रत्यनुमानं चाह— **किंच जीवाः परमात्मन इति** । नन्वनुमानं ते श्रुत्यनुग्राहकस्तर्कविशेष इत्यश्रौषम् । श्रुतिस्तु द्वासुपर्णेत्याद्या भेदमेवावेदयति । सत्यम्; अनाद्यविद्यासिद्धभेदानुवादेनाभेद एव तात्पर्यात्, तत्र पुरुषार्थाभावात्, 'द्वितीयाद्वै भयम्' इति च साक्षादपुरुषार्थताभिधानात्, 'अथ योऽन्यां देवतामुपास्ते' इति निन्दनाच्च भेदे तात्पर्याभावान्न श्रुतिविरोधः । ननु यद्यपीश्वरादभिन्नास्तथापि परस्परं विलक्षणस्वभावा एवेति पूर्वोक्तमेवेत्याशंक्य आह— **परस्परं चेति** ॥

**एवं प्रत्येकमित्यस्यायमर्थः**— विमतं सर्वं चक्षुरविवादास्पदस्यैव रूपग्रहणसाधनं चक्षुष्ट्वाद्यदेवं तदेवं यथोभयवाद्यविवादं रसनेन्द्रियमित्यादि प्रयोक्तव्यमिति । नात्र तत्कर्मोपार्जितत्वमुपाधिरिति वर्णितमन्यत्र । ननु भोगायतनत्वमिन्द्रियत्वञ्चास्तु । वास्तवभेदभिन्नान् प्रत्येव भोगसाधनत्वं च भविष्यति विपक्षबाधकाभावादप्रयोजक

### संबन्धोक्तिः ।

भेदनिरासे पुनः अप्रसिद्धविशेषणता, मायावादिमते प्रतियोगिनः पारमार्थिकभेदस्य अप्रसिद्धत्वात् इति न वाच्यम्; ब्रह्मप्रतियोगिकभेदस्य घटादिषु प्रसिद्धत्वेन जीवे तदभावसाधने प्रतिवादिनं प्रति सत्यभेदनिराकरणप्रसिद्धेः, व्यावहारिकस्वीकारात् । मायावादिनोऽपि घटादिषु ब्रह्मप्रतियोगिकानौपाधिकव्यावहारिकभेदस्य प्रसिद्धत्वेन जीवे तदभावसाधनेऽप्यविरोधात् । प्रतिवादिप्रसिद्धस्यैव च धर्म्यादेः मायावादिभिः अनुमानाङ्गताङ्गीकारात् । एवं परेण नित्यत्वाभ्युपगमात् इति द्रष्टव्यम् ॥

परस्परभिन्नानां एकस्मादभेदो न युक्त इत्यत्राह — **परस्परं चेति । अंशे सिद्धसाधनता, दृष्टान्ताभावश्च मा भूदिति** विवादाध्यासितग्रहणम् । विपक्षे

**पक्षीकृत्य प्रयोक्तव्यम् । विपर्यये तु एकेनैवोपपत्तौ आकाशादाविव कल्पना-गौरवमुन्नेयम् । अननुसन्धानं तु जीवान्तरे जीवस्य शिरोवच्छिन्न इवात्मभागे**

---

निबन्धः ।

इत्याशंक्याह— **विपर्यये त्विति** ॥

अयमाशयः — न तावदयमणुः, सकलशरीरव्यापिवेदनानुसन्धानानुपपत्ति-प्रसङ्गात् । नापि मध्यमपरिमाणो निरवयवद्रव्यत्वात् गगनवत् । परिशेषाद्व्यापकोऽभ्युपेयः आकाशवत् । 'सर्वगतश्च नित्यः' इत्यादिश्रुतेश्च । स चैकः परस्यापि संमतः, यो हि बहून् कल्पयति कल्पयत्यसावेकमिति न्यायात् । तेन चैकेन सर्वेषां भोगायतनत्वाद्युपपत्तौ वास्तवात्मभेदपरिकल्पने गौरवमेव बाधकम् । यथा आकाशस्यैकत्वेऽपि कर्णशष्कुली-भेदोपाधिकभेदाच्छब्दोपलंभकानुपलंभकव्यवस्था । यथा वा दिश एकत्वेऽपि प्राच्या-दिव्यवस्था आदित्यसंयोगोपाधिकभेदादेव । यथा वा कालस्यैकत्वेऽपि मुहूर्तयामा-होरात्रादिव्यवस्था कल्पितभेदादव्याहताऽभ्युपेयते तार्किकैः, तद्वदिहापि भविष्यतीति ॥

ननु सर्वशरीरेष्वात्मन एकत्वेऽनुसन्धानेन भवितव्यम् । न चोपलभ्यतेऽतो भिन्न एव प्रतिशरीरमात्मा इत्याशङ्क्याह— **अननुसन्धानं त्विति** । जीवस्य जीवान्तरगतवेदनाननुसन्धानमौपाधिकभेदवशेनैवोपपन्नं भविष्यति । न तावद्वास्तवात्म-भेदसाधकम् । यथैकस्मिन्च्छरीरे भोक्तुरेकत्वेऽपि शिरोवच्छिन्नात्मप्रदेशगतवेदनानु-सन्धानं पादावच्छिन्नात्मप्रदेशस्य न भवति, विशिष्टानां भिन्नत्वात्तद्वदित्यर्थः ॥

संबन्धोक्तिः ।

बाधकतर्काभावात् अप्रयोजको हेतुरित्यत आह— **विपर्यये त्विति । आकाशादा-विवेति** । आदिशब्देन दिक्कालयोर्ग्रहणम् । यथा उपाधिपरिच्छेदेन बधिराबधिरपूर्वापर-विक्षिप्तत्वादिस्वस्वकार्योपपत्तौ अनेककारणकल्पनायां गौरवप्रसङ्गात् एक एव आकाशः दिक्कालश्च स्वीकृतः । तथा एकस्यैवात्मनः शरीराद्युपाधिपरिच्छेदादेव तत्र लब्धजीव-भेदस्य व्यवस्थोपपत्तेः किमनेकात्मकल्पनेनेति ॥

प्रतिशरीरमेकस्यैवात्मनः उपाधिभेदेन भिन्नत्वे यथा एकस्मिन् देहे 'पादे मे वेदना, शिरसि मे सुखम्' इत्यनुसन्धानं तथाऽत्राप्यनुसन्धानात् चरणतललग्नकण्ट-कोद्धरणाय पाणितलव्यापारवच्चैत्रगात्रगतवेदनापरिहाराय मैत्रगात्रव्यापारप्रसङ्गः इत्या-शङ्क्याह — **अननुसन्धानं त्विति** । एकस्मिन्नपि शरीरे न प्रदेशान्तरावच्छिन्नः

**पादावच्छिन्नस्यौपाधिकभेदप्रयुक्त्यैवोपपत्स्यते । परमेश्वरस्य तु अभोक्तुरनुसन्धानेऽपि न प्रवृत्तिसङ्करप्रसङ्गः शरीराणामिति प्रपञ्चितमन्यत्र ॥**

---

### निबन्धः ।

ननु यथैकस्मिन् शरीरे स्वरूपस्यैकत्वात् पादे मे वेदना, शिरसि मे वेदनेत्यनुसन्धानं दृश्यते, तथेहापि विशिष्टानामनुसन्धानाभावेऽपि स्वरूपं चेदेकं तर्ह्यनुसन्धानेन भवितव्यमेव । अस्त्येव स्वरूपस्यानुसन्धानं सर्वसाक्षित्वाद्ब्रह्मण इति चेत्तर्हि पादतललग्नकण्टकस्फोटनाय यथा करतलव्यापारो दृष्टस्तथेहापि देवदत्तवेदनापरिहाराय यज्ञदत्तशरीराणां प्रवृत्तिसांकर्यं स्यादित्याशंक्याह-- **परमेश्वरस्य त्विति** । एकस्मिन् शरीरे स्वरूपस्यानुसन्धातुः भोक्तृत्वाद्युक्तो भोगार्थवेदनापरिहारे प्रयत्नः । परमेश्वरस्य तु सर्वाध्यक्षस्याभोक्तृत्वान्न वेदनापरिहाराय प्रवृत्तिसाङ्कर्यमित्यर्थः ॥

ननु पूर्वं सर्वाणि शरीराण्येकस्य भोगायतनानि इति प्रतिज्ञातम्; किमिदमुच्यते नैकस्यानुसन्धातुः भोगोऽस्तीति ? नायं दोषः, तत्रापि सुखदुःखाद्यन्वयिविशिष्टभोक्तॄणां स्वरूप एकस्यैव प्रधानत्वात्तस्य चाविक्रियस्याभोक्तृत्वात् । तथा च श्रुतिः--'एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्च ॥' इति सर्वभूतान्तरात्मनः साक्षित्वं केवलं दर्शयति । ननु विरुद्धमिदं भोक्तॄणां स्वरूपं; नच तद्भोक्तृ भवति इति । न, स्वतः तरुमुखरूपाणामपि प्रतिबिम्बानां कृपाणादौ मलीमसत्ववदभोक्तृब्रह्मस्वरूपाणामपि जीवानामन्तःकरणाद्युपाधौ भोक्तृत्वं भविष्यतीति । यदपि विशिष्टद्वारा स्वरूपस्यैव भोग इति मतं, तदपि न दोषः । एकशरीरसमाश्रितत्वेनैकमनोधिष्ठेयत्वेन च तान्त्रिकव्यापारोपपत्तेः । नान्यत्र तदभावात् । अनाद्यनेकलिङ्गसन्ततिवैशिष्ट्यद्वारकप्रातिनियतानेककर्मत्वाच्च न साङ्कर्यप्रसङ्गः ॥

### संबन्धोक्तिः ।

प्रदेशान्तरावच्छिन्नस्य भोगमनुसन्धत्ते, चक्षुरवच्छिन्नस्य शब्दग्रहणाभावात् । पादावच्छिन्नस्य च शिरोऽवच्छिन्नवेदनाननुसन्धानात्; एवमत्राप्यन्तःकरणावच्छिन्नस्य अन्तःकरणान्तरावच्छिन्नभोगाननुसन्धानं न विरुध्यते । सर्वोपाध्यनुगतस्यानुसन्धानमभ्युपगम्यत एवास्माभिरपि । परमात्मनः प्रवृत्तिसाङ्कर्याभावस्तु अनुसन्धातुरभोक्तृत्वादेवोपपद्यते 'अनश्नन्नन्यो अभिचाकशीति' इति श्रुतेः इति **न्यायमकरन्दे** दर्शितमित्यर्थः ॥

किंच विवादाध्यासिता जीवाः प्रतिवादिनस्तत्त्वतो न व्यतिरिच्यन्ते जीवत्वात् आत्मत्वाद्वा, प्रतिवादिवत् । न चामुष्मात् चेष्टाद्यनुमितात् प्रयतमानात् अप्रयतमानोऽहं भिन्न इत्यादिप्रत्यक्षविरोधः, परात्मनां प्रत्यक्षत्वानभ्युपगमात् । प्रत्यक्षाप्रत्यक्षयुगधर्मस्य च भेदस्य प्रत्यक्षत्वानुपपत्तेः

---

निबन्धः।

इदानीं प्रतिभासमानभोक्तृभेदस्य तात्त्विकांशं परिहरति— **किंचेत्यादिना** । ननु स्वशरीरसमवेतचेष्टासमानचेष्टान्तरदर्शनात् परशरीरे प्रयत्नवांस्तावदनुमीयते स च यतमानो नाहमिति । अनुमीयमानोऽर्थः यद्यात्मतया नानुमीयते तदा निरात्मकानि देहान्तराणि स्युः । यद्यनुमानसंविदि ग्राहकतया नानुमीयते तथाप्यग्राहकत्वमपि नानुमातुं शक्यते, चेष्टायाः आत्ममात्रलिङ्गत्वेन विपरीतानुमापकत्वायोगात् । अथ भेदेनानुमीयते— न, भेदेऽनुमानस्योदासीनत्वात् । नचानुमेयत्वादेव भेदः, व्यतिरिक्तानुमानादौ व्यभिचारात् । नन्वनुमानेन प्रतियोगिसिद्धौ प्रत्यक्ष एव ततो भेदः, तथापि भेदानवगमात् न विरोध इत्याह — **नचामुष्मादिति** । शरीरान्तरस्थस्यात्मनः परप्रत्यक्षं नास्ति । प्रत्यक्षाप्रत्यक्षयुगलधर्मस्य भेदस्य प्रत्यक्षत्वं नोपपद्यते इत्युक्तम् । इदानीं प्रत्यक्षत्व-

संबन्धोक्तिः।

पूर्वं शरीरादिकं पक्षीकृत्य भेदो निराकृतः । संप्रति जीवान् पक्षीकृत्य आत्मभेदं निरसितुमनुमिनोति — **किञ्चेति** । अनुभवविरोधपरिहाराय तत्त्वत इति विशेषणम् । कालात्ययापदिष्टत्वमाशङ्क्य परिहरति — **न चामुष्मादिति** । अस्य प्रयतमानत्वं कुतस्तव सिद्धमित्याशङ्क्य प्रवृत्तिलिङ्गादित्याह — **चेष्टाद्यनुमितादिति** । आदिशब्देन वचनं गृह्यते । अन्यतरस्य अप्रत्यक्षत्वेन भेदस्य अप्रत्यक्षत्वं कुतः ? एकतरप्रत्यक्षतया प्रत्यक्षत्वं किं न स्यात् इत्याशङ्क्याह —**प्रत्यक्षाप्रत्यक्षेति** ॥

ननु कथं युगधर्मत्वं भेदस्य ? भावत्वे ह्रस्वत्वादिवत् एकाश्रयत्वात् ; अभावत्वेऽपि घटाभाववत् एकनिष्ठत्वात् । सत्यम् ; द्वित्वादिवत् उभयधर्मत्वाभावेऽपि उभयनिरूप्यतामात्रेण उभयधर्मत्वमुपचारादुक्तम् । अथवा संयोगविभागद्वित्वद्विपृथक्त्वा- द्योऽनेकाश्रिताः इति मतमनुसृत्य द्विपृथक्त्वं भेद इत्यभ्युपगम्य युगधर्मस्येत्युक्तम् । प्रत्यक्षेषु त्र्यणुकेषु अप्रत्यक्षेषु द्व्यणुकादिषु समवेतचतुरणुकादिवत् प्रत्यक्षं किं न

वायुवनस्पतिसंयोगवत् । उपपत्तौ वा शाश्वतिकबाधाभावलक्षणस्य तात्त्विकत्वस्य प्रत्यक्षीकर्तुमशक्यतया प्रकृताप्रतिपक्षत्वात् । नच कालान्तरवर्ती बाधः संप्रति योग्यः, येन तदनुपलम्भात् तदभावो निश्चीयेत । नच स्वरूपमेव भावानां भेद इति विवक्षितयुगधर्मत्वासिद्धिः । तथा सति प्रतियोग्यनपेक्षत्व-

निबन्धः ।

मङ्गीकृत्याह— उपपत्ताविति । प्रत्यक्षाप्रत्यक्षयुगलधर्मस्यापि भेदस्य प्रत्यक्षत्वोपपत्तावपि प्रकृतानुमानाप्रतिपक्षत्वान्न विरोधः । प्रकृताप्रतिपक्षत्वमेव कुतः ? सार्वकालिकबाधाभावलक्षणस्य तात्त्विकत्वस्य प्रत्यक्षीकर्तुमशक्यत्वात् । वर्तमानसंप्रयुक्तमात्रग्राहित्वात् प्रत्यक्षस्य । एतदुक्तं भवति— यदि प्रत्यक्षेण सार्वकालिकबाधवैधुर्यं नाम तात्त्विकत्वमात्मभेदस्य गृह्येत, तदा तन्निषेधेऽनुमानस्य तद्विरोधात् भवेदप्रामाण्यं; न च तदस्तीति ॥

ननु प्रतीयमाने भेदे यदि कदाचित् बाधस्स्यात् तर्ह्युपलभ्येत । न चोपलभ्यते । ततस्तदभावोऽवसीयत इत्याशङ्क्याह— न च कालान्तरवर्तीति । न तावदनुपलब्धिमात्रादभावनिश्चयोऽतिप्रसङ्गात्; किंतु योग्यत्वे सति अनुपलंभात् । न च कालान्तरभावी बाध इदानीमुपलब्धुं योग्यः । येन योग्यत्वे सत्यनुपलम्भात् प्रतीयमाने भेदे सार्वकालिकबाधाभावो निश्चीयत इत्यर्थः । तस्मात्प्रत्यक्षेणाभावप्रमाणेन वा तात्त्विकभेदाग्रहणान्न तद्विरुद्धानुमानम् ॥

ननु यदुक्तम् विषययोर्भेदः प्रत्यक्षो न भवति प्रत्यक्षाप्रत्यक्षयुगलधर्मत्वाद्वायुवनस्पतिसंयोगवदिति, तत्रासिद्धो हेतुः । स्वरूपमेव भावानां भेदः, पदार्थग्रह एव च ग्रह इति प्राभाकराः, तत्राह— न च स्वरूपमेवेति । सापेक्षस्याश्रयान्यत्वे सत्वा-

संबन्धोक्तिः ।

स्यादित्यत आह— उपपत्तौ वेति । तत्त्वतो न भिद्यत इति साध्यस्य विशेषितत्वात् तात्त्विको भेदो न प्रत्यक्ष इत्यर्थः । इदानीं बाधस्यानुपलम्भात् अबाध्यत्वं निश्चीयत इत्यत आह— न चेति ॥

भेदस्य धर्मत्वमभ्युपगम्य अप्रत्यक्षत्वमुक्तम् । इदानीं धर्मत्वमेवासिद्धमिति स्वरूपभेदवादिनो मतमाशङ्क्याह— न चेति । जीवास्तत्त्वतः प्रतिवादिनो न व्यतिरिच्यन्त इति प्रतिज्ञायां धर्मिप्रतियोगिनोर्विवक्षितयुगधर्मत्वासिद्धिरिति यावत् । उक्तं

प्रसङ्गात् । नहि पटादिस्वरूपं प्रतियोग्यपेक्षं प्रतिभासते । घटाद्यप्रतिभासेऽपि पट इत्यादिप्रतीतिदर्शनात् । भेदस्तु नियमेन प्रतियोग्यपेक्षः प्रतिभाति घटात् पटो भिन्न इति । तस्मादपेक्षानपेक्षालक्षणविरुद्धधर्माध्यासान्नानयोरैक्यं संभवति ॥

किञ्चास्मिन् मते स्वरूपाणामानन्त्यात् कथं तेष्वेकं भिन्नपदं प्रवर्तेत ?

---

निबन्धः ।

कांक्षापूर्वकं प्रतियोगिस्वरूपत्वे च तन्नैरपेक्ष्यं प्रसज्येत इत्युक्तं स्पष्टयति — न हीत्यादिना । अन्यनिरपेक्षं स्वरूपमुच्यते । भेदस्तु नियमेन अन्यसापेक्षं प्रतीयते । अतो विरुद्धधर्माक्रान्तत्वात् न भेदस्वरूपयोः ऐक्यं संभवतीत्युक्तम् ॥

हेत्वन्तरमाह — किंचास्मिन्मत इत्यादिना । अनन्तेष्वप्यर्थेषु एकं पदं सामान्ययोगात् प्रवर्तते ; यथा — गवादिपदं । विशेषणयोगाद्वा; यथा — दण्ड्यादिपदं । उपलक्षणयोगाद्वा ; यथा — पाचकादिपदं । न तावत्स्वरूपभेदवादिमतेऽनन्तेष्वर्थेष्वेकस्य भिन्नपदस्य प्रवृत्तौ सामान्यनिमित्तमस्ति, परस्परव्यावृत्तत्वात्स्वरूपाणाम् । नाप्युपलक्षणं

संबन्धोक्तिः ।

प्रसङ्गमनुभवमवलम्ब्य उपपादयति — न हीति । विप्रतिपन्नं प्रति प्रतीतिमुपपादयति— पटादीति । तर्हि भेदोऽपि तथाविध इत्यत आह— भेदश्चेति । प्रतिभानमभिनयति— घटादिति । एवं दहनतुहिनवत् विरुद्धधर्मकत्वात् स्वरूपभेदयोः नाभेद इत्यनुमिनोति — तस्मादिति । यथा प्रादेशमात्रपरिमाणमनपेक्षदृष्टिदृष्टम् 'ह्रस्वमिदम्, न दीर्घम्' इति व्यवहारे प्रतियोगिसापेक्षं भवति, तद्वत् स्वरूपेणानपेक्षत्वेऽपि भिन्न इति व्यवहारे प्रतियोग्यपेक्षत्वं किं न स्यात् इति चेत्, नैवम्; तत्रापि प्रादेशमात्रपरिमाणस्य स्वरूपग्रहणेऽन्यानपेक्षत्वात् स्वतो न्यूनाधिकपरिमाणाभ्यामेकद्रव्यसमवायविरोधिधर्मवद्विशिष्टतया धर्मद्वयविशिष्टतया व्यवहार एव तत्र प्रतियोग्यपेक्षा; तेन प्रमेयभेदात् स्वरूपस्य प्रतियोग्यनपेक्षत्वे नेदमुदाहरणमिति द्रष्टव्यम् ॥

स्वरूपभेदवादे भिन्नपदस्यैकस्य एकनिमित्ताभावात् अनेकत्र प्रवृत्तिरनुपपन्ना इत्याह — किञ्चेति उपलक्षणं चैतत् । स्वरूपभेदवादे भेदवैशिष्ट्यप्रतिपादकभिन्नशब्दप्रयोगोऽनुपपन्नः, स्वरूपातिरिक्तभेदाभावात् इति द्रष्टव्यम् । जात्यभावेऽपि

इतरेतरोपाधिनेति चेत्, स एव तर्हि प्राप्ताप्राप्तविवेकेन भेदः स्यात्। तथा सति 'घटो भिन्नः' 'घटस्य भेदः' इति च विशेषणविशेष्यभावसंबन्धावभासौ आञ्जस्येनोपपादितौ भवेताम्। न चात्र लौकिकानामुपचाराभिमान इति सर्वं समञ्जसम् ॥

अथवा सर्वभेदनिराकरणायेदमुक्तं — 'असत्यभेदं' इति। सर्वोऽपि

---

निबन्धः।

विशेषणं वा निरुपाधिकस्वभावत्वाभ्युपगमादित्यर्थः। इदानीमुपाधिं शंकते — **इतरेतरेति**। यो यस्य व्यवहारप्रवर्तकः स तस्योपाधिः। इहापीतरेतराभावोपाधिवशेन भिन्नपदस्य प्रवृत्तिर्भविष्यतीत्यर्थः ॥

एवं तर्हि न निरुपाधिकवस्तुस्वरूपं भेद इत्यायातम्। तथा च सतीतरेतराभावे सत्येव भेदव्यवहारप्राप्तेः तदभावे त्वप्राप्तेरन्वयव्यतिरेकाभ्यामितरेतराभाव एव भेदः। न च सोऽपि, स्वभावत एव परस्परापेक्षया प्रतीतेः। न च भावस्वभावस्तथा भाति; ततो नैकैकस्वभावः। नाप्येक इतरेतराभावोऽनेकेषां स्वभाव इति समीचीनं वचः। तस्मादस्वभावभूत इतरेतराभावो भेद इत्यास्थेयम्। एवं च सत्यपरोऽपि लाभो भविष्यति इत्याह— **तथासतीत्यादिना**। ननु राहोश्शिर इतिवत् स्वभावभेदेऽपि विशेषणविशेष्यभावसंबन्धावभासावौपचारिकौ भविष्यत इत्याशंक्याह— **न चात्रेति**। तस्माद्भेदस्य स्वभावानुपपत्तेः प्रत्यक्षाप्रत्यक्षयुगलधर्मत्वं नासिद्धमिति प्रत्यक्षत्वानुपपत्तिरिति सूक्तमित्याह — **इति सर्वं समञ्जसमिति** ॥

पूर्वमात्मभेदनिराकरणपरतया असत्यभेदमितिपदं व्याख्यायेदानीं सजातीयविजातीयस्वगतसर्वप्रकारभेदनिराकरणपरतया तदेव व्याचष्टे— **अथवेत्यादिना**।

संबन्धोक्तिः।

उपाधिनिमित्तं भवतु इत्याशङ्क्य — **इतरेतरेति**। तर्हि तदतिरिक्तभेदकल्पना अनर्थिकेति परिहरति — **स एव तर्हीति**। अस्मिन् पक्षे लाभान्तरमाह — **तथा सतीति**। विशेषणविशेष्यभावस्तन्मूलसंबन्धावभासश्च निरुपचरितौ लभ्येते इत्यर्थः। 'घटस्य स्वरूपम्' इतिवत् औपचारिकमेव किं न स्यात् इत्यत आह — **न चेति** ॥

पूर्वमात्मभेदनिरासपरत्वेन तृतीयपादं व्याख्याय इदानीं आत्मनामनात्म-

हि भेदः श्रुत्या बाध्यते — 'एकमेवाद्वितीयं ब्रह्म' 'नेह नानास्ति किञ्चन' इति। न च ब्रह्माधिकरणस्य नानाभूतस्य निषेधेऽपि ततोऽन्यत्र तद्भवेदिति शङ्कनीयम्, कारणादन्यत्र कार्यानुपपत्तेः। ब्रह्मणश्चाकाशादिकारणताया अशेषोपनिषत्प्रसिद्धत्वात्। एतदेवोक्तं गुरुभिः—

'नान्यत्र कारणात्कार्यं न चेत्तत्र क्व तद्भवेत्।'

---

निबन्धः।

ननु यथेह भूतले घटो नास्तीति निषेधेऽन्यत्र घटोऽस्तीति परिशिष्यति, तथा ब्रह्मणि नानाभूतं निषिद्धमन्यत्रास्तीति न सर्वभेदनिराससिद्धिरित्याशंक्याह — **न च ब्रह्माधिकरणस्येति**। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति प्रागुत्पत्तेः सद्वस्त्वेकमवधार्य 'तदैक्षत बहु स्यां प्रजायेय' इति तस्यैवेक्षणपूर्वकं बहुरूपापत्तिं दर्शयति। अतस्ततोऽन्यत्र सद्भावानुपपत्तेः तत्र निषिद्धं कथमन्यत्र भवेत्। नो खलु स्वप्नावबुद्धनभोभक्षणादि स्वप्नद्रष्टरि निषिद्धमन्यत्रास्तीति भावः। 'नेह नानास्ति' इति जगत्कारणे नानात्वं निषिध्यते, न ब्रह्मणि नानाभूतं कार्यं; नैतत्सारम्, इहेति प्रकृतब्रह्मण एवाकर्षणात्। किंच न तावज्जगत्कारणसामान्ये नानात्वप्राप्तिः, तस्यैकत्वात्। नापि तद्विशेषे परमेश्वरे, येन तत्प्रतिषेधो भागी। तस्मादप्राप्तविप्रतिषेधप्रसङ्गान्नानेत्यविशेषश्रुतिव्याकोपप्रसङ्गाच्च प्रतिपन्नद्वैतप्रपञ्चतत्वांशप्रविलयपरत्वमेव समाश्रयणीयम्॥

ननु पृथिव्यादेः कार्यत्वमसंभाव्यमानं श्रुत्या वा कथं प्रतिपाद्यते? ब्रह्मणस्समस्तजगत्कारणतया अशेषोपनिषत्प्रसिद्धत्वादित्यसंबद्धम्; न, प्रमाणेनापि संभाव्यमानत्वात्। तथाहि— पृथिव्यादिकं कार्यं सावयवत्वात्, यदेवं तदेवं यथा घटादि। सावयवत्वमप्रयोजकमिति चेन्न, विकल्पानुपपत्तेः। तथाहि— किमिद-

संबन्धोक्तिः।

नामात्मानात्मनोश्च परस्परभेदनिरासपरतया योजयति— **अथवेति**। ननु कथं निरासः असति प्रमाण इत्यत आह— **सर्वो हीति**। **एकमिति**। पदत्रयेण सजातीयविजातीयस्वगतभेदानां निराकरणात् 'नेह नानास्ति किञ्चन' इति समस्तभेदानामविशेषेण निरासाच्चेत्यर्थः। 'इह' इति विशेषणात् अधिकरणान्तरे भेदसद्भावः श्रुतेरभिप्रेत इत्याशङ्क्याह— **न चेति**। कारणत्वमेवासिद्धमित्याशङ्क्याह— **ब्रह्मणश्चेति**। उक्तमर्थमिष्टसिद्धिकारवचनेन द्रढयति — **एतदेवेति**॥

प्रतिष्ठितप्रामाण्यप्राचीनप्रत्यक्षादिविरोधात् तदपेक्षं पराचीनमागम-

---

### निबन्धः ।

मप्रयोजकत्वं नाम ? किं सपक्षैकदेशवृत्तित्वं ? आहोस्वित् परव्याप्त्युपजीवकत्वं, किं वा विपक्षबाधकशून्यत्वं ? तत्र न तावत्सपक्षैकदेशवृत्तित्वं, धूमादेरपि सपक्षैकदेशवृत्ते-रप्रयोजकत्वप्रसङ्गात । अथाशेषसपक्षव्यापकहेतोरप्रयोजकत्वम्; एतदपि परिभाषामात्रं, व्यापकवदव्यापकस्यापि साध्याविनाभावित्वेन प्रयोजकत्वात् । न च वादिनोऽविद्यायां सावयवत्वं कार्यत्वं व्यभिचरतीति वाच्यं; तस्याः सावयवत्वेन निर्वक्तुमशक्यत्वात । अन्यथा तस्यापि कार्यत्वप्रसङ्गात् ॥

अथ परव्याप्त्युपजीवकत्वमप्रयोजकत्वमिति; तदपि न सुव्याहृतम्, परस्येव स्वस्यापि साध्येन व्याप्त्युपपत्तेः । यस्य हि परव्याप्त्यधीना व्याप्तिः तदेव परव्याप्त्युप-जीवकत्वमुच्यते; यथा धूमशकलवत्वम् । नहि तस्य धूमनैरपेक्ष्येण वह्निना व्याप्तिरस्ति । न चैवं सावयवत्वम् । तस्य कादाचित्कनिरपेक्षस्यापि कार्यत्वेन व्याप्तेः निरूपयितुं शक्यत्वात् । परेणापि सावयवत्वं कार्यत्वानुमापकमभ्युपगन्तव्यम् । इतरथा ह्यदृष्टपूर्वापरभावस्य चिरसमुपजातस्य जीर्णविहारादेः कार्यत्वनिश्चयो न स्यात् । नहि पूर्वापरग्रहणमन्तरेण कादाचित्कत्वं परिच्छेत्तुं पार्यते । तस्मात् सावयवत्वादेवावगमः । यद्येतदेवं तदा प्रकृतेऽपि कथमप्रयोजकं सावयवत्वमिति । अथ विपक्षबाधकशून्यत्वमप्रयोजकत्वं, तदपि न, प्रकृते कार्यत्वाभावे सावयवत्वस्यैवानुपपत्तेरात्मवदिति । सावयवत्वं च यथा घटादेः तथैव क्षित्यादेरप्यनुभवसिद्धमिति न विशेषविकल्पावकाशः । इतश्च कार्यं क्षित्यादि द्रव्यत्वे सति परममहत्वपरमाणुत्वयोरनधिकरणत्वाद्यदेवं तदेवं यथा घटादि । सिद्धे च क्षित्यादेः महाभूतचतुष्टयस्य कार्यत्वे तद्वन्महाभूतत्वादाकाशस्यापि तत्सिध्यति ॥

किंचाकाशो जायते गुणाश्रयत्वाद्यदेवं तदेवं यथा घटादि । नन्वसिद्धं शब्दस्य गुणत्वं, शब्दो द्रव्यं साक्षादिन्द्रियसंबन्धेनोपलभ्यमानत्वात् पटवदित्यनुमानात्; न, रूपादिष्वनेकान्ताद्योग्यतालक्षणप्राचीनसंबन्धाभ्युपगमात् । शब्दो गुणः सामान्य-वत्वे सति अस्पर्शवत्वे सति बाह्यैकेन्द्रियग्राह्यत्वात् रूपादिवत् । तदेवं संभाविते मानान्तरैः आकाशादेः कार्यत्वे शक्यत एव श्रुत्यादिभिः ब्रह्मणः समस्तजगत्कारणत्वं ज्ञापयितुमित्यलम् ॥

### संबन्धोक्तिः ।

प्रत्यक्षादिप्रमाणान्तरविरोधात् अनुपपद्यमानप्रामाण्या श्रुतिः कथं भेदं बाधे-

वाक्यं कथं तद्गोचरं भेदं बाधत इति चेत् — नैवम् ;

तत्परत्वात् परत्वाच्च निर्दोषत्वाच्च वैदिकम् ।
पूर्वस्य बाधकं नायं सर्प इत्याप्तवाक्यवत् ॥

तत्परत्वं चोपक्रमादिषड्विधतात्पर्यलिङ्गावगम्यम् । अवगमितं चान्यत्रास्माभिरिति नेह प्रपञ्च्यते, संग्रहाधिकारात् ॥

---

निबन्धः ।

पूर्ववादी स्वाभिप्रायमाह— प्रतिष्ठितेति । प्रतिष्ठितं प्रामाण्यं यस्य प्राचीनस्य प्रत्यक्षादेः तद्विरोधात् पराचीनं प्रत्यक्षसापेक्षं यदागमवाक्यं तत्कथं प्रत्यक्षादिगोचरं भेदं बाधेत, न कथंचिदित्यर्थः । श्लोकेन परिहरति— तत्परत्वादित्यादिना । आगमवाक्यस्याभेदसत्यत्वप्रतिपादनपरत्वात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यम्' इति पुनः पुनः अभ्यासात् , प्रत्यक्षभेदस्य व्यावहारिकभेदमात्रविषयत्वेन चरितार्थस्य तत्सत्यतायां तात्पर्याभावात्तत्परातत्परविरोधे च तत्परं बलवदित्यर्थः । तथा यद्यपि प्रत्यक्षादिसिद्धपदपदार्थतत्संबन्धसापेक्षमागमवाक्यमुत्पत्तौ, तथापि प्रमितौ नैरपेक्ष्ये सति परत्वाच्च पूर्वबाधकं । यथा नायं सर्प इत्याप्तवाक्यस्य प्रसक्तप्रतिषेधरूपतया प्रसञ्जकपूर्वप्रत्ययसापेक्षत्वेऽप्युत्पत्तौ, प्रमितौ नैरपेक्ष्ये सति परत्वाद्बाधकत्वम् । तदुक्तं 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इति, 'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति' इति च । किं च प्रत्यक्षादेः पुरुषाश्रयतया संभावितविचित्रदोषाशंकत्वादागमवाक्यस्य चापौरुषेयतया निरस्तसमस्तदोषाशंकत्वादबाधितत्वं युक्तमित्यर्थः ॥

संबन्धोक्तिः ।

तेति शङ्कते — प्रतिष्ठितेति । आगमप्रामाण्ये सन्दिग्धेऽपि प्रमाणत्वेन निश्चिताः प्रत्यक्षादयः । प्राचीनाश्चागमात्, आगमव्युत्पत्तेः प्रागपि जातमात्रस्य जन्तोः प्रत्यक्षादिव्यवहारदर्शनात् । एतच्च उपलक्षणम्, आगमेन स्वरूपसिद्धये अपेक्ष्यमाणत्वान्यत्रानवकाशत्वाव्याकुलत्वादृष्टव्यभिचारित्वादीनाम् । तदपेक्षं पराचीनमिति । एतच्च दृष्टव्यभिचारित्वव्याकुलत्वान्यत्रसावकाशत्वसञ्जातविरोधित्वानाम् ॥

तत्परत्वात् परत्वादिति उत्तरम् । निरपेक्षत्वे सत्युत्तरभाविप्रमाणत्वात् निर्दोषत्वादपौरुषेयतया निरस्तसमस्तवक्तृदोषशङ्कत्वाद्वैदिकमेतद्विपरीतस्य प्रत्यक्षादेर्बाधक-

निबन्धः ।

नन्वागमवाक्यानां अद्वैतपरत्वमेवेति कुतोऽवसीयते? उपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलार्थवादोपपत्तिलक्षणतात्पर्यलिङ्गादिति ब्रूमः । तथाहि — छान्दोक्ये 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' इत्यद्वैतप्रतिपादनेनैवोपक्रमः । 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि' इत्यद्वैतप्रतिपादनेनैवोपसंहारः । तथा 'ऐतदात्म्यमिदं सर्वम्' इति नवकृत्वोऽभ्यस्यते । प्रमाणान्तरानधिगतमेव च सत्यज्ञानानन्दप्रत्यग्भूतब्रह्माद्वैतं प्रतिपाद्यते । 'तरति शोकमात्मवित्' इति फलं च तस्मिन् अवगम्यते । सृष्ट्याद्यर्थवादश्चोपादीयते । तज्जलादियुक्तयश्च । एवं सर्वोपनिषत्सु तात्पर्यलिङ्गानि द्रष्टव्यानि ॥

तात्पर्यं नाम अनेन भवितव्यमित्यप्रतीतग्राहकत्वव्यतिरिक्तश्शब्दधर्मः । तत् द्विविधं प्रधानबुद्धिफलत्वाविरोधेनार्थान्तरबुद्धिफलत्वं अवान्तरतात्पर्यम् । यथा गोदोहनवाक्यस्य दर्शपूर्णमासकर्तव्यताफलाविरोधेन गोदोहनकर्तव्यताफलत्वम् । निरुपाधिकशेषिबुद्धिफलत्वं महातात्पर्यं । यथा— दर्शपूर्णमासफलं गोदोहनवाक्यस्य । यथा वा सगुणोपासनवाक्यानामद्वितीयप्रतिपत्तिपरत्वम् । नन्वेवं तात्पर्यभेदे अर्थभेदाद्वाक्यभेदः स्यात् । न, एकार्थस्य वाक्यस्य पुरुषभेदे प्रयोजनभेदात्तात्पर्यभेदोपपत्तेः । तथाहि—'निधिमानेष भूभागः' इति । निधिद्रव्यं भूभाग इति संबन्धज्ञानाद्विरक्तालसकामिषु परित्यागोपेक्षाप्रवृत्तिफलभेदात्तात्पर्यभेदो लोके, एवं वेदेऽपि न विरुद्ध्यते वस्तुस्वभावस्य तथात्वादिति ॥

संबन्धोक्तिः ।

मित्यर्थः । चशब्देन निरूप्यमाणे अव्याकुलत्वान्यत्रानवकाशत्वादि गृह्यते । तत्परत्वमसिद्धमित्यत आह — तत्परत्वं चेति । तदेव कथमित्यत आह — अवगमितमिति ।

तथाहि — 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' इत्युपक्रम्य 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इति नवकृत्वः अभ्यासात्, एवंभूतस्य चात्मनः प्रत्यक्षादिभिरनधिगततया अपूर्वत्वात्, 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' इति फलश्रवणात्, 'अनेन जीवेनात्मनानुप्रविश्य' इत्याद्यर्थवादोपादानात 'यथैकेन मृत्पिण्डेन' इत्यादिना समस्तस्य द्वैतजातस्य कारणतावन्मात्रत्वोपपादनाच्च छान्दोग्योपनिषदस्तावदद्वैतपरत्वमवसितम् । एवं प्रतिवेदान्तं षड्विधतात्पर्यलिङ्गान्यभ्यूहनीयानि ॥

अत्राद्वैतसाधनश्लोकः —

विमतं तात्त्विकस्वान्तर्भेदहीनं मितत्वतः ।
यदित्थं तत्तथा यद्वत् खं तथेदं ततस्तथा ॥

विमतं विप्रतिपन्नं। मितत्वतः ज्ञातत्वात् । यद्वत् खं यथा आकाशमित्यर्थः । अत्र च समुदायस्य सन्दिग्धसाध्यतया पक्षत्वेऽपि तदेकदेशस्याप्याकाशस्य भङ्ग्यन्तरेण निश्चितसाध्यतया व्याप्तिग्रहणस्य सत्त्वात् दृष्टान्ततायां न काचिदप्यनुपपत्तिरिति गमयितव्यम् ॥

---

निबन्धः ।

पूर्वावष्टंभेन भेदमात्रस्य तत्त्वांशं प्रतिषिद्ध्येदानीं अनुमानतोऽपि तत्साधनं सुकरमित्याह— **अत्राद्वैतेति** । विश्वस्य तात्त्विकस्वगतभेदशून्यत्वमेवात्राद्वैतशब्देनोच्यते, न त्वैक्यं, प्रातिभासिकभेदापह्नवायोगात् । ननु विश्वाद्वैतसाधनाय प्रवृत्तेन सर्वस्य पक्षनिक्षेपाभ्युपगमात् कथं तदेकदेशस्याकाशस्य दृष्टान्तत्वेनोपपादनमित्याशङ्क्याह— **अत्र च समुदायस्येति** । **सन्दिग्धसाध्यतयेति** । विश्वात्मनस्तात्त्विकस्वगतभिन्नत्वं किंवा नेति । **भङ्ग्यन्तरेण**; प्रकारान्तरेणोभयवादिसंमतया । संमतं हि नभसो घटाद्युपाधिकभेदं विहाय स्वगततात्त्विकभेदशून्यत्वमेकव्यक्तित्वाभ्युपगमादित्यर्थः । यदुक्तम्— 'यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं स दृष्टान्तः' इति । यथा

संबन्धोक्तिः ।

**विमतमिति** । भेदहीनमित्युक्ते दृष्टान्तस्य साध्यवैकल्यं स्यात्; ततो विशिनष्टि- **स्वान्तरिति** । घटाकाशो मठाकाश इति स्वान्तरपि भेदोऽवभासत इत्यत आह — **तात्त्विकेति** । तात्त्विकभेदहीनमित्युक्तेऽपि साध्यवैकल्यमाशङ्क्य परिहरति — **स्वान्तरिति** ॥

**विमतमिति** । समस्तस्य जगतः पक्षत्वेन उपादानात् तदन्तर्गतमाकाशं कथमुदाहरणं स्यात्? न हि एकस्यैव सन्दिग्धसाध्यतया पक्षत्वं निश्चितसाध्यतया च सपक्षत्वमुपपद्यत इत्यत आह— **अत्र चेति** । यद्यप्याकाशस्य पवनादिभ्यः भेदहीनत्वं सन्दिग्धं, तथापि निश्चितमेव घटाकाशो मठाकाश इत्यादिस्वान्तर्गततात्त्विकभेदशून्यत्वम् । अतस्तेनाकारेण दृष्टान्ततात्युपपद्यत इत्यर्थः ॥

**भेदस्य तु तात्त्विकत्वे न तावदयं वस्तुनः स्वभाव इत्युदितम् । अस्वभावत्वे तु न तावदयं स्वतन्त्रः प्रतिभाति । 'इदमस्माद्भिन्नं' इति, 'अयमनयोर्भेदः' इति वा वस्तुविशेषणत्वेन विशेष्यत्वेन वा प्रतिभासनियमात् । विशेषणविशेष्यभावेन तु प्रतिभासो भेदान्तरग्रहणपूर्वक एव स्यात्, दण्ड्यादौ तद्भावप्रतिभासस्य भेदग्रहणपूर्वकत्वनियमात् । तस्य च संबन्धगर्भत्वात् ।**

---

निबन्धः ।

पृथिव्यादेरसादित्वे विप्रतिपन्नं मीमांसकं प्रति तदेकदेशस्य जन्मविनाशवत्त्वेनोभयसंप्रतिपत्तेरिति तस्यापि तद्दृष्टान्तावष्टंभेन पृथिव्यादिबुद्धिगोचरत्वात् सादित्वं साध्यते नैयायिकादिभिः । यथा वा महाभूतैकदेशस्य नभसो नित्यत्वेन संप्रतिपत्तेः दृष्टान्तावष्टंभत एव पृथिव्यादेरपि महाभूतत्वेनैव नित्यत्वं साध्यते मीमांसकैः, तथेहापीति भावः ॥

इदानीं विपक्षबाधकतर्कमनुमानसहकारित्वेनोपन्यस्यति— **भेदस्य त्वित्यादिना** । वास्तवभेदं वदन् वाच्यः किमयं वस्तुनः स्वभावः, उतास्वभावः, किंवा स्वभावास्वभावसमुच्चयात्मा, आहोस्वित् तद्विलक्षण इति पृष्टो भवान् व्याचष्टाम् । न तावत् तस्य प्रथमः, तस्य प्रतियोगिनिरपेक्षत्वप्रसङ्गादिहेतुभिः निरस्तत्वात् । नापि द्वितीय इत्याह — **अस्वभावत्वे इत्यादिना** । ननु विशेषणविशेष्यभावेन ग्रहणनियमान्माभूत् स्वतन्त्रस्तथापि परतन्त्र एव वास्तवो धर्मो भविष्यति इत्याशंक्य विशेषणविशेष्यभावोऽपि वास्तवत्वपक्षे निरूपयितुं न शक्यत इत्यभिप्रेत्याह — **विशेषण-**

संबन्धोक्तिः ।

[1] विपक्षे बाधकाभावात् हेतोरप्रयोजकत्वमाशङ्क्य बाधकतर्कं दर्शयितुमाह— **भेदस्य त्विति** । अस्वभावपक्षेऽपि स्वतन्त्रः परतन्त्रो वेति विकल्प्य नाद्य इत्याह— **अस्वभावत्व इति** । अत्र 'इदमस्मात् भिन्नम्' इति विशेषणत्वेन प्रतिभासः, 'अयमनयोर्भेदः' इति विशेष्यत्वेन । अस्तु तर्हि परतन्त्र एव भेदः प्रतिभासानुसारात् इति; मैवम्, अनवस्थाप्रसङ्गात् इत्यभिप्रेत्याह — **विशेषणेति** । तत्र हेतुमाह — **दण्ड्यादाविति** । न केवलं विशेषणविशेष्यभावस्य भेदगर्भत्वात् अनवस्था; किन्तु संबन्ध-

---

1. स्वान्तर्भेदहीनमित्येतच्च चिरन्तनसत्याभिहितामिति मन्तव्यम् । स्वशब्दस्य दृष्टान्तदार्ष्टान्तिकयोरेकार्थत्वाभावेन व्याप्तिविरहात् । विमतमाकाशप्रतियोगिकतात्त्विकभेदवन्न भवति प्रमेयत्वादाकाशवदित्यनुमानमवगन्तव्यम् । अप्रसिद्धविशेषणता च पूर्ववत्परिहरणीया ।

संबन्धस्य च भिन्नाधिष्ठानत्वेनैव प्रतीतिसंभवात् । अनाकलितभेदसंबन्धयोश्च दूरस्थयोर्वनस्पत्योः कदाचिदपि विशेषणविशेष्यभावेनानिश्चयात् । प्रत्युत एकत्वेन प्रतिभासात सन्देहाद्वा । विशेषणविशेष्यभावस्य च गुणप्रधानभावगर्भत्वेनानुभवात्, तस्य च नियमेन भिन्नाधिष्ठानतयैव प्रतिभासात । भवतु तर्हि भेदग्रहणस्य भेदान्तरग्रहणपूर्वकत्वनियमः; तथापि किमायातमिति चेत; इदमायातं—तस्यापि भेदस्य भेदान्तरग्रहणपूर्वकत्वं, तस्यापि तस्यापीत्यनवस्था मूलक्षयकरी इति ॥

स्वभावास्वभावसमुच्चयः पुनः अस्वभावभागप्रयुक्तानवस्थितेरेवायुक्तः ।

---

निबन्धः ।

विशेष्यभावेन त्विति । भेदभेदिनोः विशेषणविशेष्यभाव इत्याह — तस्य चेति । विशेषणविशेष्यभावस्य संबन्धपूर्वकत्वात्, संबन्धस्य च भिन्नाश्रयत्वेनैवावगमादवश्यं प्रागेव भेदो ग्राह्यः इत्यर्थः ॥

इदानीं विशेषणविशेष्यभावस्य भेदग्रहपूर्वकत्वे च साधारणं हेत्वन्तरमाह — अनाकलितेत्यादिना । अगृहीतसंबन्धयोरपि अभावसमवाययोः विशेषणत्वन्तु नास्मत्सम्मतम् । विशेषणविशेष्यभावस्य भेदग्रहणपूर्वकत्वं उपपाद्यानवस्थादोषं स्फुटीकर्तुं चोद्यमुद्भावयति — भवतु तर्हीति । विशेषणविशेष्यभावहेतोः पूर्वपूर्वभेदग्रहणस्यासिद्धौ तदसिद्धेः मौलिकभेदासिद्धिः मूलक्षतिरित्यर्थः ॥

तृतीयं पराकरोति—स्वभावास्वभावसमुच्चयः पुनरिति । एकैकसंभावनासंबन्धोक्तिः ।

गर्भत्वाच्च इत्याह — तस्य चेति । तावता कथमनवस्था इत्यत आह — संबन्धस्य चेति । अस्तु तर्हि भेदसंबन्धयोः सत्ता विशेषणविशेष्यभावोपयोगिनी, तथापि कथमनवस्था दोषाय, तत्प्रतीतेः अनावश्यकत्वात् । अनन्तभेदस्वीकारेऽपि मूलक्षतेरभावात् इत्यत आह—अनाकलितेति । न केवलं निश्चयाभाव एव, विपरीतकार्यमपि दृश्यत इत्याह ... प्रत्युतेति । नन्वेककालविभ्रमो भवत्येवेति न नियम इत्यत आह—संदेहाद्वेति । प्रकारान्तरेणापि अनवस्था आपततीत्याह — विशेषणेति । तथापि कथमनवस्थेत्याकाङ्क्षापुरस्सरं तामाह — भवत्विति ॥

**परस्परप्रतिषेधात्मकयोः विधिनिषेधयोरेकत्वविरोधाच्च । अविरोधे वा जगति विरोधोच्छेदप्रसङ्गात् । भावाभावयोः साक्षाद्विरोधः तदनुषङ्गादन्यत्रेति स्थितिः । असमुच्चयात्मनोऽपि प्रकारस्य अनयोः प्रतिस्पर्धिनोरसंभव एव । स खलु स्वभावादतिरिक्तश्चेत् अस्वभाव एव स्यात् । तस्य तन्मात्रलक्षणत्वात् । अनतिरेके स्वभाव एवेति कथमयं तृतीयः स्यात्? । स्वभावास्वभाव-**

---

निबन्धः ।

वगमपूर्वको हि समुच्चयः दृष्टः । पूर्वोक्तनीत्या च नैकैकसंभावनेत्यर्थः । नन्वेकैकपक्षोक्त-दोषभीत्या समुच्चयः स्वीक्रियते इत्याशङ्क्याह — **परस्परेति** । नहि घटस्य भाव-प्रध्वंसौ युगपत् भूतले स्तः इत्यर्थः । अथ भावाभावरूपयोरपि स्वभावास्वभावयोरेकत्रा-विरोधस्तत्राह — **अविरोधे चेति** ॥

चतुर्थं दूषयति—**असमुच्चयात्मनोऽपीति** । कथमसंभव इत्याकाङ्क्षायामाह—**स खल्विति** । परस्परविरुद्धयोः स्वभावास्वभावयोरसमुच्चयप्रकारो नाम समुचित-

संबन्धोक्तिः ।

तदेवं भेदस्य अस्वभावपक्षं निरस्य इदानीं स्वभावास्वभावपक्षं निराकरोति—**स्वभावेति** । अत्र एवकारोऽयुक्त एव इति अयोगव्यवच्छेदार्थः । स्वभावपक्षेऽपि दर्शितस्यानपेक्षत्वलक्षणदोषस्यावर्जनीयतया प्रसक्तेः पक्ष एवायमनुपपन्न इत्याह — **परस्परेति** । ननु समुच्चयमङ्गीकुर्वता विरोधोऽपि नाङ्गीक्रियत इत्यत आह — **अविरोधे वेति** । सर्वस्य विरोधस्य भावाभावाधीनत्वात् तयोरपि विरोधाभावे तदधीनो विरोधः कुत्र स्यात् इत्याह — **भावेति** ॥

समुच्चयो न संभवति चेत् असमुच्चयोऽस्त्विति, तत्राह— **असमुच्चय इति** । समुच्चयो हि नाम द्वयोः समप्रधानभावेन वा गुणप्रधानभावेन वा एककार्यसाधनत्वम् , यथा — दर्शपूर्णमासयोः दर्शपूर्णमासप्रयाजादीनां च । इह पुनः स्वभावाकारः स्वोचितं व्यवहारं स्वयमेव जनयति, तद्वदस्वभावाकारोऽपि । तेन अनयोराकारयोः युगपदेक-निष्ठत्वेऽपि पृथक् पृथक् कार्यजननात् असमुच्चयः, चित्रासाङ्ग्रहणीसाध्यापूर्वयोः युगपदेकपुरुषसमवेतयोः पृथक्फलसाधनत्वेऽपि असमुच्चयवदिति शङ्कासमुद्भवेऽप्यनयोः भावाभावरूपतया भावरूपापूर्ववैलक्षण्यादसमुच्चयोऽपि न संभवतीत्यर्थः । असंभवमेव विकल्प्य दर्शयति — **स खल्विति** । उभयोर्विधिसमुच्चयो न संभवति चेत् निषध-

विलक्षणात्मा अयमस्त्विति चेत्; मैवम् —

परस्परविरुद्धानां निषेधेऽपि विधाविव ।
समुच्चयविरोधस्य गीर्वाणैरप्यवारणात् ॥

एतेन चतुष्कोटिविनिर्मुक्तो भेद इति परास्तम्। चतुष्कोट्यात्मनोऽपि

---

निबन्धः।

रूपरहितः प्रकारः। सोऽस्वभावो वा स्वभावो वेति द्वयी गतिः। न तृतीयः कश्चिदस्तीत्याह — **कथमयं तृतीयः स्यादिति**। स्वभावो न भवतीति स्वभाववैलक्षण्यं नामैकं रूपम्। तथाऽस्वभावो न भवतीत्यस्वभाववैलक्षण्यञ्चापरं रूपम्। तदुभयवैलक्षण्यात्माऽयमसमुच्चयात्मा प्रकारोऽस्त्विति शङ्कते — **स्वभावास्वभावेति** ॥

**मैवमिति** चोद्यं निरस्य श्लोकेन हेतुमाह— **परस्परविरुद्धानामित्यादिना**। परस्परविरुद्धानां भावाभावरूपाणां धर्मिणां यथा स्वभावो भवति अस्वभावोऽपि भवतीति विधौ समुच्चयविरोधः, तथा स्वभावो न भवत्यस्वभावोऽपि न भवतीति निषेधेऽपि द्वयसमुच्चयविरोधस्य गीर्वाणैर्देवैरप्यवारणात्। यतः परस्परप्रतिस्पर्धिनोरन्यतरनिषेधोऽन्यतरविधिरेव। यथा नित्यो न भवतीत्युक्तौ अनित्य एव। अनित्यो न भवतीत्युक्तेऽपि नित्य एव परिशिष्यते न वस्त्वन्तरम्। तथेहापि स्वभाववैलक्षण्यमस्वभाव एवास्वभाववैलक्षण्यं च स्वभावः। तयोर्वैलक्षण्ययोरपि समुच्चयो विरुद्ध इति भावः ॥

तर्हि चतुष्कोटिविनिर्मुक्तो भेद इत्यपि निरस्तं भवति। चतुष्कोटिविनिर्मुक्तेऽपि वैलक्षण्यचतुष्टयस्य परस्परविरुद्धस्य समुच्चयानुपपत्तेरित्यर्थः। यदि परस्परविरुद्धमपि

संबन्धोक्तिः।

समुच्चयोऽस्तु इति शङ्कते — **स्वभावेति**। तत्रापि स्वभावो न संभवतीत्युक्त्यैव अस्वभावतायाः प्रतिपादितत्वात् पुनरस्वभावतानिषेधोऽशक्यः स्ववचनव्याघातापत्तेः इत्याह — **मैवमिति** ॥

उक्तं न्यायं पक्षान्तरेऽप्यतिदिशति — **एतेनेति**। विरोधस्य दुष्परिहरत्वेनेत्यर्थः। तत्र चतस्रः कोटयो नाम स्वभावकोटिः, अस्वभावकोटिः, उभयकोटिः, अनुभयकोटिः इति। स्वभावास्वभावसमुच्चयकोटेः स्वभावास्वभावपक्षेऽन्तर्भावात्

प्रसक्तेर्विरोधस्योभयत्राविशेषात् । न च तर्हि चतुष्कोट्यात्मा अस्त्विति वाच्यम् । एकैककोटिनियमस्य तात्त्विकत्वातात्त्विकत्वयोस्तदनुपपत्तेः । यदि खल्वेकैककोटीनां तदात्मकत्वनियमस्तात्त्विकः कथमेकश्चतुष्कोट्यात्मा भवेत् । अनियमेऽपि न चतस्रः कोटय इति कथं चतुष्कोट्यात्मा एकः स्यात् ? ॥

---

निबन्धः ।

वैलक्षण्यचतुष्टयमेकस्मिन् भेदे स्वीक्रियते, तर्हि चतुष्कोट्यात्मनोऽपि भेदस्य प्रसक्तौ वैलक्षण्यप्रयासो व्यर्थस्स्यात् । तत्र हेतुमाह— **विरोधस्योभयत्राविशेषादिति । उभयत्र** चतुष्कोट्यात्मकत्वे तद्विलक्षणत्वे च । एतदुक्तं भवति— स्वभावास्वभावतत्समुच्चया-समुच्चयलक्षणस्कन्धचतुष्टयात्मकत्वमेकस्य विरोधादेव न स्वीक्रियते । यदि विरुद्धमपि वैलक्षण्यचतुष्टयात्मकत्वमेकस्याभ्युपगम्यते, तर्हि चतुष्कोट्यात्मकत्वमेवास्त्विति । तर्हि तथैवास्तु, केनापि प्रकारेण वास्तवभेदोऽस्माकं सिषाधयिषित इत्याशंक्याह— **न च तर्हीति** । अनुपपत्तिमेव प्रकटयति— **यदि खल्वित्यादिना** । एकैककोटिना भेदस्य तदात्मकत्वनियमे, एकैककोट्यात्मनियमो यदि तात्त्विकः स्यात, तदा कथमेको भेदः चतुष्कोट्यात्मा स्यात्, न कथंचित् । यत एककोट्यात्मकस्य न कोट्यन्तरात्मकत्वं

संबन्धोक्तिः ।

दूषणान्तरम्— **चतुष्कोट्यात्मनोऽपीति** । स्वभावतानिषेधेऽस्वभावता तावदवश्यं-भाविनी; तस्याः पूर्वोदितन्यायेन तन्मात्रलक्षणत्वात् । एवमस्वभावतानिषेधे स्वभावता; स्वभावास्वभावसमुच्चयनिषेधे स्वभावास्वभावविलक्षणता; तद्विलक्षणतानिषेधे च तत्समुच्चयलक्षणाविरोधिता इति चतुष्कोटिविनिर्मुक्तम्, अथापि चतुष्कोट्यात्मकमिति विरुद्धमित्यत आह— **विरोधस्येति । उभयत्रेति** । चतुष्कोट्यात्मकत्व इव चतुष्कोटिविनिर्मुक्तत्वेऽपि परस्परविरुद्धसमुच्चयलक्षणो विरोधः तुल्य इत्यर्थः ॥

ननु चतुष्कोट्यात्मकत्वस्येष्टत्वात् नास्माकमयमनिष्टप्रसङ्ग इत्यत आह— **न चेति** । उक्तमर्थं स्पष्टयति— **यदीति** । स्वभावकोटिः स्वभावकोटिरेव, नास्व-भावकोटिः । एवमस्वभावकोटिः अस्वभावकोटिरेव नेतरकोटय इति नियमे कोटेरेकैकस्या एकैककोट्यात्मकत्वमेवेति चतुष्कोट्यात्मकत्वं तत्रैव व्यभिचरितम् । अनियमपक्षे तु एकैकस्याः कोटेः तदात्मकत्वाभावात् मृषात्वमेवेति न कोटीनामपि स्वरूपसिद्धिः, तत्र कुतो वस्तुनः तदात्मकतेत्यर्थः ॥

निबन्धः ।

संभाव्यते तथा तस्यैव कोटेरित्यर्थः । अथवा यद्येककोटीनां भेदात्मकत्वनियमः एकैकात्मकत्वनियमो वा तात्विकः स्यात्, तदा कथमेकं वस्तु चतुष्कोट्यात्मा स्यात्? न कथांचित् । किन्तु परस्परव्यावृत्तं कोटिचतुष्टयमेव स्यादित्यर्थः । अनियमपक्षे दूषणमाह— **अनियमेति** । भेदस्य एकैककोट्यात्मकत्वनियमाभावे कोटीनां वा तदात्मकत्वनियमाभावे न चतस्रः कोटयः सन्ति भेदस्य, एकैकात्मकत्वपूर्वकत्वात् कोटिचतुष्टयात्मकत्वस्येत्यर्थः ॥

**अत्राशाम्बरो** वल्गति—सर्वस्य वस्तुनोऽनेकान्तात्मकत्वात् न भेदस्य चतुष्कोट्यात्मकत्वं विकल्पमर्हति । तेन तत्र प्रमाणं वाच्यम् । **ननु** प्रत्यक्षमेत्र प्रमाणम् । तथाहि — प्रत्यक्षेण स्वदेशकालादिषु घटस्य सत्वं गृह्यते, देशान्तरादौ चासत्वमिति सदसदात्मकत्वसिद्धिः । अनुमानमपि— विमतं सर्वमनेकात्मकं प्रमेयत्वात् सामान्यविशेषवद्वेरम्बनरसिंहवदिति च ॥

**अत्रोच्यते**— न तावदिह प्रत्यक्षलक्षणं प्रमाणं, तस्य स्वप्रमेयसत्तामात्रग्राहित्वात् । यदि स्वदेशादिष्वप्यसत्यत्वं परिच्छिन्द्यात्, भवेत् तदा प्रत्यक्षादनेकात्मकत्वम् । नच तदस्तीति । **ननु** घटादेः मृद्रूपेण नित्यत्वं घटादिरूपेण चानित्यत्वं दृश्यते; न, घटादेः मृद्रूपता हि मृदन्वितता । न चान्वय्यन्वितयोरनुवृत्तयोरैक्यं संभाव्यते । अस्माभिरपि इष्यत एव यथाप्रतिभासं भेदः । परमार्थतस्तु न भिन्नो नापि भिन्नाभिन्नः, किन्त्वनिर्वचनीय एव कार्याकार इत्यस्मद्रहस्यम् । ततो मृद्रूपस्यानित्यत्वमेव घटादेस्त्वनित्यत्वमेवार्थान्तरत्वात् ॥

यच्चानुमानमुपन्यस्तं, तदपीन्द्रियव्यापारसमासादितबोधबाधविधुरीकृततनुतया न प्रामाण्यसंपदमधिगच्छति । तथाहि— प्रत्यक्षेण यावतामुपलंभो भावानां तावतां नियत एव स्वभावः उपलभ्यते नानियत इत्यध्यक्षबाधः । किंचानेकान्ते अनैकान्तिको हेतुरनैकान्तिकोऽपि प्रमेयो भवतीति, न चानेकान्त इति । अथानेकान्तोऽप्यनेकात्मकोऽभ्युपगम्यते तर्हि कुतः प्रमाणादिति वक्तव्यम । न तावत्प्रकृतावेव । तद्धि प्रमाणान्तराप्रसिद्धसकलपदार्थानेकान्तप्रसाधकम् । न चायमनेकान्तः पूर्वं प्रमाणान्तराधिगत इति कथं तस्यानेकात्मकत्वमनुसंशास्ति । पूर्वसिद्धौ च व्यर्थं तत्रानुमानम् । अथ प्रमाणान्तरात्तर्हि योऽसौ द्वितीयोऽनेकान्तस्यानेकान्तस्तेन व्यभिचारः स्यात् । अथ तस्याप्यनेकान्तत्वं तर्हि

सदसद्विलक्षणताद्यभ्युपगमोऽप्येवमेव जडस्यानुपपन्न इति चेत्—

---

निबन्धः ।

तत्रापि प्रमाणान्तरमित्यनवस्था स्यात् । ततश्चोत्तरोत्तरानेकान्तप्रसाधनेनोपक्षीणशक्ते-राशाम्बरमन्वन्तरशतान्तरितस्यापि न विवक्षितपदार्थानेकान्तप्रसिद्धिः ॥

किंच यत् तदनेकान्ते प्रमाणमुपन्यस्तं तत्किं प्रमाणमेवोताप्रमाणमपि । प्रथमे तत्रैव व्यभिचारः । चरमे न ततः सर्वभावानामनेकान्तप्रसिद्धिरप्रमाणत्वात् । अथ प्रामाण्यस्याभ्युपगमात्तत्सिद्धिः, तर्ह्यप्रामाण्यस्य अभ्युपगमात्तत्सिद्धिरिति च प्राप्तम् । किंच दिगम्बरैः यद्भुज्यते, तद्भोज्यमेवोताभोज्यमपि ? प्रथमे तत्रैव व्यभिचारः । चरमे यत्नेनोपभुज्यमानत्वं व्याहन्यते ; किन्तु विष्ठादिवदभोज्यत्वेन त्याज्यं विद्यात् ॥

यश्चायं दृष्टान्तः सामान्यविशेषवदिति, सोऽपि साध्यविकलः; तथाहि— सामान्यविशेषशब्देनातिरिक्तद्रव्यत्वादिसामान्यमुच्यते । तच्च सामान्यमेवाश्रयान्तरा-द्व्यावृत्तप्रत्ययान्तरस्यापि हेतुत्वादुपचारतो विशेषणशब्देनोच्यते । न साक्षादेकस्यानेक-रूपत्वानुपपत्तेः ॥

यच्चेदमुदाहरणान्तरं हेरम्बनरसिंहवदिति, तदपि साध्यविकलत्वात् नोदाहरणम् । तथाहि — हेरम्बो नाम नरावयवैः गजावयवैश्च समुच्चयारब्धः कश्चिदवयवी । तस्य चैकत्वान्न द्वैरूप्यसम्भवः । नच वाच्यं नास्त्यवयवरूपातिरिक्तमवयविरूपमेकम्, अचाक्षुषत्वप्रसङ्गात् । द्रव्यरूपत एव चाक्षुषत्वनियमात् । रूपसंयोगाच्चाक्षुषत्वे वायोरपि प्रसङ्गात् । एवं नरसिंहेऽपि द्रष्टव्यम् ॥

नन्वेकस्य धर्मिणो नरत्वसिंहत्वव्यतिरेकेण कथं नरशब्देन सिंहशब्देन चाभिधीयमानत्वम् ? तदवयवारब्धत्वेन तच्छब्दवाच्यत्वोपपत्तेः । तथाहि— नरावय-वारब्धत्वेन नर इत्युच्यते, सिंहावयवारब्धत्वेन सिंह इति । न पुनः नरत्वसिंहत्व-धर्मवशात्, एकत्र विरुद्धजातिसमावेशायोगादिति । तस्मादेकस्य वस्तुनः एकरूपत्व-नियमात् भेदस्यापि वस्तुत्वेन चतुष्कोटयात्मकत्वं सूक्तम् ॥

संबन्धोक्तिः ।

'यस्तूभयोः समो दोषः परिहारोऽपि वा समः' इति न्यायमवलम्ब्य

सत्यं, तात्विकत्वे तथैव । अत एव तत्त्वतो युक्त्या निश्चित्य वक्तुमशक्यत्वात् अनिर्वचनीयमेव जडमुच्यते । सदसद्वैलक्षण्यादिवाचोयुक्तिरपि तत्तद्रूपनिरूपणासहिष्णुत्वमात्रप्रकटनाय । न तु तत्तद्विरहसमुच्चयात्मनो रूपान्तरस्य तात्विकत्वप्रकटनाय इति न किञ्चनास्माकं दुष्यति । तस्मादस्मन्मतमेवानुसृत्य भेदोऽपि वस्तुस्वभावादिविकल्पानुपपत्तेश्च अनिर्वाच्य एवाभ्युपगन्तव्यो न तात्विक इति सिद्धम् ॥

किञ्च अस्मादिदं भिन्नं इत्यवध्यवधिमद्रूपावच्छिन्नो भेदः

---

निबन्धः ।

इदानीं साम्योपादानाभिप्रायेण शङ्कते— सदसद्विलक्षणतादीति । यथा वैलक्षण्यस्वरूपाणां समुच्चयविरोधात् न चतुष्कोटिविनिर्मुक्तो भेदः स्वीक्रियते, तथा जडस्य सदसद्वैलक्षण्याभ्युपगमोऽपि तव नोपपद्यते, परस्परविरुद्धानां वैलक्षण्यादिसमुच्चयविरोधोऽस्तीति विशेषादित्यर्थः । सत्यमित्यादिः स्पष्टार्थः ॥

पूर्वं स्वभावादिविकल्पासहत्वात् भेदस्य तात्विकांशः खण्डितः । इदानीमितरेतराश्रयप्रसञ्जनेनापि तत्वांशमेव प्रतिषेधति— किंचास्मादिदं भिन्नं इत्यादिना एतेनेदमपास्तं इत्यतः प्राक्तनेन । अस्मादिति निर्दिष्टो विधिः प्रतियोगी, इदमिति

संबन्धोक्तिः ।

शङ्कते — सदसदिति । मैवम्; सदसद्वैलक्षण्यस्य अस्माभिः भवद्भिरिव तात्त्विकत्वानङ्गीकारात् । सदसद्रूपयोः दुर्निरूपतामात्रेण तद्विलक्षणवाचोयुक्त्या केनापि प्रकारेण दुर्निरूपताया एव प्रतिपादनात् इति परिहरति — सत्यमिति । तर्ह्यपसिद्धान्तापात इत्यत आह — अत एवेति । यतो न तात्त्विकत्वमिष्यते अत एवेत्यर्थः । वैलक्षण्यमप्यतात्त्विकं चेत् सदसद्रूपतापत्तिरित्यपि न वक्तव्यमित्याह — सदसद्वैलक्षण्येति । तस्मात् गत्यन्तराभावात् भेदस्यानिर्वाच्यत्वं सर्वैरभ्युपगन्तव्यम् । उपसंहरति — तस्मादिति ॥

पूर्वं अर्थस्वभावपर्यालोचनया भेदस्य मिथ्यात्वमुक्तम् । इदानीं प्रतीत्यनुपपत्त्या च तन्मिथ्यात्वं प्रदर्शयति — किञ्चेति । भवतु, किमायातामित्यत आह —

प्रतिभासते । विशेषणप्रतिभासपूर्वकश्च विशिष्टप्रतिभासः, तयोः कार्यकारणभावनियमात् । न च वस्तुमात्रमविभागं दृश्यमानं अवधित्वेन अवधिमत्त्वेन वाऽध्यवसातुं शक्यम् । तत्खलु अवधित्वेनावसीयमानं तथैव पर्यवस्येत् अवधिमत्त्वेनापि तथैव । न त्वखण्डमेकमन्योन्याभावाविनाभूतत्वेन अन्योन्यविरुद्धावध्यवधिमद्रूपद्वयावच्छिन्नमधिगन्तुं शक्यम् । तथा चादौ आधारभेदे प्रतिपन्ने भिन्नाधारमसङ्कीर्णमेवावध्यवधिमत्त्वं चाधिगन्तव्यम् । अवध्यवधिमद्रूपावच्छिन्नश्च भेदोऽनुभूयत इत्युक्तम् । तथा चावध्यवधिमद्भावप्रतिभासे भेदप्रतिभासः तत्प्रतिभासे चावध्यवधिमद्भावप्रतिभासः इतीतरेतराश्रयप्रसङ्गः ॥

---

## निबन्धः ।

निर्दिष्टमवधिरूपं धर्मिरूपं, ताभ्यामवच्छिन्नो विशिष्ट इत्यर्थः । ततः किमित्यत आह— **विशेषणेति** । तयोः विशिष्टविशेषणप्रतिभासयोः कार्यकारणभावनियमात् धर्मिप्रतियोगिलक्षणविशेषणप्रतिभासः कारणभूतः प्रथमं वक्तव्य इत्यर्थः । ननु तर्हि प्रथमाक्षसन्निपाताद्दृश्यमव्यावृत्तं वस्तुमात्रं प्रतियोगित्वेन चावगम्य तद्विशिष्टो भेदोऽवगम्यतामित्याशंक्याह— **नच वस्तुमात्रमिति** । तत्र हेतुमाह— **तत्खल्विति** । न त्वखण्डमेकं वस्त्वन्योन्यविरुद्धं यदवध्यवधिमद्रूपद्वयं तद्विशिष्टमधिगन्तुं शक्यं इत्यन्वयः । विरुद्धत्वे हेतुमाह— **अन्योन्याभावाविनाभूतत्वेनेति** । ययोरवध्यवधिमद्भावः तयोरन्योन्याभावस्यापि सर्वत्र दृष्टत्वात् परस्परानात्मताविरोधः प्रतियोगिधर्मिरूपयोरित्यर्थः । नन्वेकस्य धर्मित्वं प्रतियोगित्वञ्चावगन्तुं न शक्यते चेत् कथं तर्हि तदवगम इत्याशंक्याह—

## संबन्धोक्तिः ।

**विशेषणेति** । तथापि किमायातम् इत्याशङ्क्य इतरेतराश्रयत्वम्, स्वरूपमात्रग्रहस्य भेदप्रतीतिहेतुत्वानुपपत्तेः इत्याह— **न च वस्त्विति** । कथं तर्हि ग्रहीतव्यमित्यन्योन्यविरुद्धावध्यवधिमद्भावेन इत्याह— **तत्खल्विति** । **तथैवेति** । अवधिः अवधिमद्विरुद्धत्वेन, अवधिमानप्यवधिविरुद्धत्वेनैव व्यवतिष्ठत इत्यर्थः । एतदेव व्यतिरेकमुखेन दर्शयति— **न त्विति** । एकस्याप्यम्भोनिधेः वीचीतरङ्गादिभिः अनेकात्मकत्वं दृश्यत इत्यत आह— **अखण्डमिति** । अन्योन्याभावाविनाभूतत्वेऽपि एकाधिकरणत्वं रूपरसवत् किं न स्यात् इत्यत आह— **अन्योन्यविरुद्धेति** । प्रतीयतां तर्हि भिन्नाधिकरणत्वमित्यत आह— **तथाचेति** । भिन्नाधारत्वादसङ्कीर्णम् । भेदप्रतीत्यधीनत्वे-

एतेनेदमपास्तं—यदाहुः एकं नीलं नीलतया पीतं पीततया च विदित्वा अस्मादिदं भिन्नमिति प्रत्येष्यत इति। नहि नीलं नीलतयैव पीतं पीततयैव भेदमवच्छिनत्ति। किं तर्हि? अवधित्वेन अवधिमत्त्वेन च। नहि अवधित्वमवधिमत्त्वं चाविभागेन प्रत्येतुं शक्यमित्युक्तम्। तथाच कथं प्रागुक्तः परस्पराश्रयप्रसङ्गो न भवेत्॥

किञ्च नीलं नीलतया पीतं पीततयेति निर्विकल्पकं वा नीलादिरूपमुपलक्ष्यते? किंवा अनीलताद्यवच्छिन्नं शब्दानुविद्धं सविकल्पकम्? पूर्वस्मिन् कल्पे न शब्दानुव्याधवति संसर्गप्रत्यये तयोरवच्छेद्यावच्छेदकभावेन प्रतिभासो

---

निबन्धः।

**तथाचेति**। तर्हि तथैव भवत्वित्याशंक्याह—**अवध्यवधिमद्रूपावच्छिन्नश्चेति**॥

उक्तं दोषमन्यत्रातिदिशति — **एतेनेति**। कथमेतेन इतरेतराश्रयप्रसङ्गेनेदञ्चोद्यञ्चूर्णितम्, तत्राह—**नहि नीलमित्यादिना**। इदानीं दूषणान्तराभिधित्सया विकल्पयति—**किञ्च नीलमित्यादिना**। नीलं नीलतया पीतं पीततया इत्यनया वाचोयुक्त्या व्यावृत्तं शब्दास्पृष्टं च नीलादिरूपमुपलक्ष्यत इति पूर्वस्मिन् कल्पे न शब्दसंसर्गवति भिन्नमिदमस्मादिति संसर्गप्रत्यये तयोः नीलादिभेदयोः

संबन्धोक्तिः।

ऽवध्यवधिमद्भावस्य तदधीनता कथं भेदप्रतिपत्तेः इत्यत आह—**अवधीति**। फलितमाह—**तथाचेति**॥

विरुद्धस्वभावयोः स्वरूपप्रतिपत्त्यैव भेदप्रतीत्युपपत्तेः किमवध्यवधिमद्भावग्रहणेन इति, तत्राह — **एतेनेति**। **एतेन** भेदग्रहणस्य अवध्यवधिमद्भावग्रहणपूर्वकत्वनियमप्रतिपादनेन। एतदेव स्पष्टयति — **न हीति**। नीलपीताद्याकारयोः व्यभिचारित्वात् सर्वत्रानुगतावध्यवधिमद्भाव एव भेदग्रहणहेतुरित्यर्थः। अस्तु, का क्षतिः इति, तत्राह — **न हीति**। तथापि का क्षतिरित्यत आह — **तथा चेति**॥

प्रकारान्तरेण विकल्प्य नीलपीताकारेण भेदावच्छेदकत्वमयुक्तम् इत्याह — **किञ्चेति**। अनीलत्वाद्यवच्छिन्नम्, अत एव शब्दानुविद्धम्। **अवच्छेद्यावच्छेदकत्वेन** धर्मिप्रतियोगित्वेन। **संसर्गप्रत्यये** इदमस्माद्भिन्नमिति अनेकपदार्थसंसर्गलक्षण-

भवेत् । नहि निर्विकल्पकाः पदार्थाः प्रतिभान्ति । वाक्यार्थस्तु सविकल्पक इति दृष्टचरम् । उत्तरस्मिंस्तु नीलत्वादियोगादतद्व्यावृत्तिमुखेन परस्परमपि व्यावृत्तयोरेव तयोः प्रतिभाससंभवः । तत्प्रतिभासश्च अवध्यवधिमद्भाव-प्रतिपत्तिपूर्वक इति कथं स एव दुरुत्तरात्मा परस्पराश्रयो न प्राप्नुयादिति । अनयैव दिशाऽपरोऽप्यत्रानुकूलस्तर्को ज्ञेयः ॥

---

## निबन्धः ।

विशेषणविशेष्यभावेन प्रतिभासस्संभवेत् । काऽनुपपत्तिरित्यत आह— **नहि निर्विकल्पका इति** । भिन्नेषु पदार्थेषु पदावगतेषु सत्सु योग्यतानिबन्धः संसर्गबोधो दृश्यते । अव्यावृत्त-वस्तुमात्रप्रतिपत्तौ तु कस्य केन संसर्गोऽवगम्यत इति भावः । द्वितीयं दूषयति— **उत्तरस्मिंस्त्विति** । नीलत्वादिसामान्यसम्बन्धादनीलत्वादिव्यावृत्तिद्वारेणेतरेभ्यः परस्पर-मपि व्यावृत्तयोरेव नीलपीतयोः प्रतिभास इति वक्तव्यम् । तर्हि तथैव भवत्वित्याशंक्याह — **तत्प्रतिभासश्चेति** । एवं तावदद्वैतानुमाने विपक्षबाधकतर्कनिकरमत्रतीयपरस्यापि सद्भावं सूचयन्नाह— **अनयैवेति** ॥

**अयं भावः**— किं नीलं नीलतया पीतं पीततया विदित्वा तेनैव वेदने-नेदमस्माद्भिन्नमिति, भेदो वेद्यते, किंवा वेदनान्तरेण? न तावत्तेनैव, क्षणध्वंसिनो वेदनस्याक्रमवद्व्यापारद्वयायोगात् । उक्तं हि— 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्'

## संबन्धोक्तिः ।

वाक्यार्थप्रत्यये । तत्र हेतुमाह –– **न हीति** । पदार्थानामेव संसृष्टानां वाक्यार्थत्वात् तेषां निर्विकल्पकत्वे सति सविकल्पकसंसर्गप्रत्यये हेत्वभावात् क्वापि न दृष्टपूर्व इत्यर्थः । अस्तु तथा इत्यत आह — **तत्प्रतिभासश्चेति** । **अनयैव दिशेति** । किं भेदप्रतिभासो भेदमेव गोचरयेत्, उत वस्त्वपि? यदि वस्त्वपि तदा भेदपूर्वकं वा तद्गोचरयेत् तत्पूर्वकं वा भेदम्, अपर्यायेण वा उभयम्? नाद्यः, अनधिगतधर्मि-प्रतियोगिस्वभावस्य भेदानुपलम्भात् । अत एव न वस्तुग्रहोऽपि भेदग्रहपूर्वकः, नापि तत्पूर्वको भेदग्रहः, बुद्धेः विरम्यव्यापाराभावात्, जन्मैव हि बुद्धेः व्यापारः अर्थावग्रहरूपाया इति चोक्तत्वात् । नापि अपर्यायेण उभयग्रहः धर्मिप्रतियोगिज्ञानजन्यस्य भेदज्ञानस्य तेन सह यौगपद्याभावात् । हेतुहेतुमतोश्च क्रमभावनियमात् इत्येवमादि-लक्षणोऽपि न्यायोऽभ्यूहनीय इत्यर्थः ॥

यद्वा विवादाध्यासितो भेदो मिथ्या भेदत्वात् दर्पणादिगत-मुखादिभेदवत् इति। विपर्यये तु बाधकमुक्तम्। यद्वा विवादपदं भेदसंवेदनं मिथ्या भेदसंवेदनत्वात् स्वप्नभेदसंवेदनवदिति। सत्यत्वे तु भेदसंवेदनस्य लब्धरूप इत्यादिशास्त्रीयन्यायानुगृहीतान्वयव्यतिरेकपरिकलिपततद्वर्गनिष्ठ-कारणदोषनिदानतानुपपत्तेः आकस्मिकत्वप्रसक्तिर्बाधिका॥

---

निबन्धः।

इति। द्वित्रिक्षणसंबन्धेऽपि जन्मातिरिक्तव्यापाराभावात्तस्य चार्थावबोधात्मनैव सिद्धेः न भेदाग्रहे व्यापारान्तरसंभवः। नापि युगपदुभयावेदकत्वं, विशेषणविशिष्टप्रतिभासयोः कार्यकारणभावेन पूर्वोत्तरभावित्वाभिधानात्। नापि वेदनान्तरं वस्त्वसंस्पृशद्भेदमवगाहते। तथा सति भेद इत्येव भायात्। न त्वयमनयोः भेद इति। नच पूर्ववेदनसिद्धं वस्तु अभिलक्ष्य तद्विशिष्टं भेदं ग्राहयिष्यति इति सांप्रतं, परस्परवार्तानभिज्ञत्वात् बोधानां इत्याद्यद्वैतमानानुकूलस्तर्क ऊह्य इति॥

प्रकारान्तरेण भेदमिथ्यात्वसिद्धये प्रयुज्यते — **यद्वेत्यादिना**। भेदत्वं भवतु मिथ्यात्वं च न भविष्यति; किं बाधकमित्याशङ्क्याह— **विपर्यये तु बाधकमुक्त-मिति**। स्वभावादिविकल्पासहिष्णुत्वमित्यर्थः। भेदसंवेदनस्य सत्यत्वात् कथन्तद्विषयस्य मिथ्यात्वविधानमन्तरेण ततो निषेधस्य संभव इत्यनेनाद्वैतशास्त्रानुग्राहको न्यायो दर्शितः। क्वचित् प्रतिपन्ने धर्मिणि किंचित्प्रतिपन्नमेव निषिध्यते। यथा — गौरश्वो न भवतीति प्रतिपन्नमेव गोत्वं प्रतिपन्नायामश्वव्यक्तौ निषिध्यते। ततो वस्तुविधिमन्तरेणायमयं न

संबन्धोक्तिः।

इदानीं भेदं पक्षीकृत्य मिथ्यात्वं साधयति — **यद्वेति**। भेदज्ञानं पक्षीकृत्य प्रयुङ्क्ते — **यद्वा विवादास्पदमिति**। विपक्षे बाधकमाह — **सत्यत्व इति**। सत्यत्वे तु आकस्मिकत्वप्रसक्तिः बाधिका इत्यन्वयः। कुतः आकस्मिकत्वप्रसक्तिरित्यत आह — **कारणदोषेति**। किंनिष्ठाः कारणदोषाः निदानम् इत्यत आह — **तद्वर्गेति**। तस्य संवेदनस्य वर्गाः कर्तृकरणविषयलक्षणा हेतवः; तन्निष्ठाः तद्गता ये दोषाः रागतिमिरप्रतिबिम्बितत्वादयः ते तथोक्ताः। तेषां निदानत्वं कुतोऽवगम्यत इत्यत आह — **अन्वयव्यतिरेकेति**। ननु भेदसंवेदनस्य प्रत्यक्षादिप्रमाणजन्यत्वात् न कारणदोषनिदानता इति तत्राह — **लब्धरूप इति**॥

अथैवं भेदप्रपञ्चस्यालीकनिर्भासत्वे तदपबाधे शून्यमेवावशिष्यते किं वा सल्लक्षणं ब्रह्मेति किमत्र विनिगमने कारणमिति ?

---

निबन्धः ।

भवतीति प्रत्यक्षस्य वस्तुबोधन एव पर्यवसितत्वान्न भेदग्रहणे व्यापारसंभव इत्येवंरूपः । तेनानुगृहीतौ यावन्वयव्यतिरेकौ – विपर्ययावस्थायामेव भेदः प्रतीयते, तदभावे तु न प्रतीयते इति – ताभ्यां परिकल्पितद्वैतपतितः कारणस्य जडावभासे चैतन्यस्य दोषः अविद्यालक्षणः तस्य निदानस्यानुपपत्तेरित्यर्थः । **अयमत्र संक्षेपार्थः** — सत्यत्वे भेदसंवेदनस्य न तावत्प्रत्यक्षादिभ्यो जन्म, तस्य वस्तुमात्रोपक्षयात् । नापि कारणदोषात् सत्यत्वादेव । तत आकस्मिकत्वमेवापद्यत इति ॥

संबन्धोक्तिः ।

" लब्धरूपे क्वचित् किञ्चित् तादृगेव निषिध्यते ।
विधानमन्तरेणातो न निषेधस्य संभवः ॥

क्रमः संगच्छते युक्त्या नैकविज्ञानकर्मणोः ।
न सन्निहितजं तच्च तदन्यामर्शि जायते ॥

विधानमेव नैकस्य व्यवच्छेदोऽन्यगोचरः ।
मास्म भूदविशेषेण मा न भूदेकधीजुषाम् ॥

अर्थक्रियाकृते भेदे रूपभेदो न लभ्यते ।
दाहपाकविशेषेण कृशानुर्न हि भेदवान् ॥

अन्योन्यसंश्रयात् भेदः न प्रमान्तरसाधनम् ।
नास्मिन्निदं नायमिदं इति भेदाद्विनाऽनयोः ॥ " (ब्र. सि. १० )

इत्यादिश्लोकैः भेदजन्यस्य संवेदनस्य प्रत्यक्षादिप्रमाणजन्यत्वासंभवस्य दर्शितत्वात् भ्रान्तित्वेन कारणदोषनिदानत्वमपि नाभ्युपगम्यते चेत् आकस्मिकत्वप्रसक्तिः बाधिकेत्यर्थः । लब्धरूप इत्यादिशास्त्रीयेण न्यायेन अनुगृहीतौ यावन्वयव्यतिरेकौ ताभ्यां परिकल्पिता येयं तद्वर्गनिष्ठकारणनिदानता तस्या अनुपपत्तेः आकस्मिकत्वप्रसक्तिर्बाधिकेति योजना ॥

**उच्यते** । विवादाध्यासिता घटादिभेदाः सद्रूपे परिकल्पिताः प्रत्येकं तदनुविद्धत्वात् । ये येन प्रत्येकमनुविद्धाः ते तत्र परिकल्पिताः, यथा प्रत्येकं चन्द्ररूपानुविद्धाः तत्र परिकल्पिताः जलतरङ्गचन्द्रमसः । तथाचामी घटादिभेदाः सद्रूपानुविद्धाः । तस्मात् तत्र परिकल्पिताः । तदनुविद्धत्वं च तदनुरागेणैव विधीयमानत्वम् । न चेदंतदादिवाच्यताद्यपेक्ष-

---

**निबन्धः ।**

अथैवमित्यादिः स्पष्टार्थः । ननु तदनुविद्धत्वं नाम तदन्वितत्वम् । तावन्मात्रेण चेत्तत्र परिकल्पितत्वं, तर्हि व्यक्तीनामपि सामान्यान्वितानां तत्र परिकल्पितत्वमापद्यते । तदा सर्वपदार्थानामिदन्तदादिशब्दवाच्यत्वावरुद्धत्वात् तत्र परिकल्पितत्वमापद्यते । तत्र चेन्न परिकल्पिताः तर्हि सत्यपि न स्याद्विशेषाभावात् इत्याशंक्याह — **तदनुविद्धत्वश्चेति** । तदनुविद्धत्वं नाम तदन्वितत्वं न भवति; येन सामान्यादिषु परिकल्पितत्वप्रसङ्गः । किन्तु तद्रूपेणावगम्यमानत्वम् । नच सामान्यादिरूपेण व्यक्त्यवगमोऽस्ति । यद्यपि चेदन्तदादिशब्दवाच्यानुविद्धत्वमास्ति तथापि न तदपेक्षं वस्तुभानं

**संबन्धोक्तिः ।**

एवं भेदजातस्य मिथ्यात्वं साधितम्; तत् शून्यवादिनोऽपि समानम् इति स्वमते विशेषं दर्शयितुमाह-- **अथेति** [1] । वाच्यत्वज्ञेयत्वाद्यनुविद्धानामपि भावानां न तत्र परिकल्पितत्वं दृष्टमित्यत आह -- **तदनुविद्धत्वं चेति** । तदनुरागेणैव विधीयमानत्वं नाम तत्समानाधिकृततया बोध्यमानत्वम्; सन् घटः, सन् पटः इति तदनुरागेणैव च विधीयमानत्वमत्र विवक्षितम् । वाच्यो घटः ज्ञेयो घटः, इति कदाचित्तदनुरागेण विधीयमानत्वेऽपि तदनुरागेणैव विधीयमानत्वं इह नास्ति, विनापि वाच्यत्वादिप्रतीतिं, घटादिप्रतीतेर्भावात्; सत्तया तु विना घटादिप्रतीतिः नास्तीति तदनुरागेणैव

---

तदनुविद्धत्वादिति । चिरंतनरीत्याऽन्वयव्यतिरेकिशब्दानां दृष्टान्तदार्ष्टान्तिकयोरेकार्थत्वाभावेन व्याप्त्यसिद्धेः । निष्कर्षे तु विमतं सद्रूपे परिकल्पितं सत्सामानाधिकरण्येन प्रतीयमानत्वात् सद्व्यतिरेकत्वाद्वा सति परिकल्पितासत्ववदिति प्रयोगः । नचाप्रसिद्धविशेषणता व्यावहारिकसद्रूपस्य शून्यवादिनाप्यंगीकरणात् । तत्र विश्वस्य परिकल्पितत्वसाधने तस्यैव सर्वभ्रमाधिष्ठानत्वेन पारमार्थिकत्वपर्यवसानादिति द्रष्टव्यम् ।

मप्यस्तीति विशेषः । दूरात् तरवो निरन्तराः वनाकारानुविद्धाः प्रतिभासन्ते । न च ते तत्र परिकल्पिताः इति तद्व्यवच्छेदार्थं प्रत्येकमित्युक्तम् । नहि प्रत्येकं तरुषु वनमिति मतिः । किन्तु मिलितेष्विति ॥

विपर्यये तु निरधिष्ठानो भ्रमो निरवधिकश्च बाधो भवेत् । तथाच तयोरधिष्ठानावभासतदवधिकप्रमाणलक्षणप्रसिद्धनिमित्तासंभवात् अनिमित्तत्व-

---

निबन्धः ।

सन्मात्रग्राहित्वात् निर्विकल्पकस्य तावन्मात्रापेक्षणादिति विद्यत एव विशेष इत्यर्थः । इदानीं प्रत्येकविशेषणस्य कृत्यमाह — दूरात्तरव इति ॥

ननु तथापि साध्यविकलो दृष्टान्तः । नहि चन्द्रभेदास्सद्रूपचन्द्रमसि कल्पिताः । तर्हि किं ते तत्रैव सन्तः ? तथा सति बिम्बापगमेऽपि तथैव स्युः । नहि निमित्तापगममात्रान्नैमित्तिकापगमो भागी । नाप्यन्यत्र सन्तः, क्वापि तद्भेदानुपलंभात् । कल्पितत्वेऽपि तर्हि जले कल्पिताः; न, तस्य प्रतिभासमानत्वात् न तावत्तदज्ञानजो भेदभ्रम । नाप्यौपाधिकः, तददर्शनात् । चन्द्र एवेति चेन्न, तस्योपाधिलक्षणाभावात् । परमार्थतोऽतथाभूते स्वदेशकालार्थक्रियाप्रसञ्जक उपाधिरिति हि तल्लक्षणम् । जपाकुसुमादेश्च अव्यवहिते स्वच्छद्रव्ये स्वगुणसमानगुणाध्यारोपनिमित्तमात्रत्वम् । तस्माज्जलतरङ्गभेदोपाधिना सद्रूपेण चन्द्रमसि भेदः कल्पितो भातीति वक्तव्यम् । सोपाधिकभ्रमेषु चोपाधिरेवात्माश्रयाविद्यापरिणामे पुष्कलकारणमिति दृष्टेऽपि चन्द्रे तदनुवृत्तिः न विरुद्ध्यते । बाधेन तु प्रतिभासमानभेदस्य तत्वांश एव निषिध्यते, सद्रूपता चन्द्रस्य सिद्धैवेति न साध्यविकलो दृष्टान्तः ॥

इदानीं स्वरूपे परिकल्पितत्वानभ्युपगमे दोषमाह — विपर्यये त्विति । ततो वा को दोष इत्यत्राह — तथाचेति । निरपेक्षाधिष्ठानभ्रमे निरवधिकबाधेऽपि तयोः

संबन्धोक्तिः ।

विधीयमानत्वसिद्धिः । प्रत्येकमिति विशेषणस्य व्यावर्त्यं दर्शयति — दूरादिति । कथं तर्हि तद्व्यवच्छेद इति, तत्राह — न हीति ॥

विपक्षे बाधकतर्कमाह — विपर्यये त्विति । अस्तु को दोष इत्यत आह — तथा चेति । भ्रमेऽधिष्ठानावभासो निमित्तम्, अनधिगताधिष्ठानस्य

प्रसक्तिर्बाधिका । न च शून्यमेवाधिष्ठानमवधिश्च स्यात् । यदनुविद्धं ह्यारोपितं प्रतिभासते तदधिष्ठानम् । स एवावधिस्तस्य; यथा शुक्तीदमंशे रूप्यस्य । न कदाचित् शून्यानुविद्धमारोपितं प्रतिभातीति कथं तत् तथा स्यात्? नहीद-मित्यपि शून्यं क्वचिद्भवति। किं तर्हि? शुक्त्यादिकम् । अन्यथा भ्रान्तस्य तदुपादानानुपपत्तेरिति ॥

---

## निबन्धः ।

भ्रमबाधयोर्निर्निमित्तत्वप्रसक्तिः बाधिका इत्यन्वयः । मध्यग्रन्थेन हेतूपन्यासः । सामान्येना-धिष्ठानावभासो भ्रमे निमित्तं प्रसिद्धम् । इदमिति सामान्यांशदर्शने हि रजतभ्रमो दृश्यते, तदभावे त्वन्धादेः न दृश्यते । निरधिष्ठानभ्रमपक्षे तदभावात् भ्रमस्य निर्निमित्तत्वं स्यात् । तदवधिकमिति । अधिष्ठानात्मावधिकं; भ्रान्तिप्रतिपन्नसत्य-मिथ्यावस्तुसंभेदलक्षणेऽर्थेऽन्यतरांशपर्यवसितं प्रमाणरूपं ज्ञानं बाधे प्रसिद्धं निमित्तम् । तदभावान्निरवधिकबाधपक्षे निर्निमित्तत्वं बाधस्यापि स्यादित्यर्थः । ननु नायं प्रसङ्गः शून्यमेवाधिष्ठानमवधिश्च भविष्यतीत्याशंक्याह — न च शून्यमेवेति । कुत इत्याकां-क्षायामाह — यदनुविद्धं हीति । उपाध्यन्यत्वे सति नियमेन यदनुविद्धो भ्रमावभासः तदधिष्ठानं सोपाधिकभ्रमे । निरुपाधिके तु यदज्ञाननिर्मितमध्यस्तं भाति तदधिष्ठानम् । भ्रान्तिप्रतिपन्नस्य प्रतिषेधे यः परिशिष्यते सोऽवधिरिति विवेक्तव्यम् । नन्विदमि-त्याकारेण शून्यमेवाभाति, ततश्शून्याकारान्वितमारोप्यं न भाति इति न शक्यं वक्तुमित्या-शंक्याह — नहीदमित्यपीति ॥

## संबन्धोक्तिः ।

भ्रमासंभवात्, न हि कश्चिदपि इदमित्यनधिगम्य रजतमिति भ्राम्यति । तथापि बाधकस्य शुक्तिकाद्यवधिविषयं प्रमाणज्ञाननिमित्तमधिष्ठानज्ञानम् विना बाधानुपलब्धेः । अतो निमित्ताभावात् नैमित्तिकयोः भ्रान्तिबाधयोः सकललोकप्रसिद्धयोः अपलापः प्रसज्येत इत्यर्थः । अन्तरेणापि सत्तामधिष्ठानावधिः संभवतीत्याशङ्क्याह — न चेति । कुत इति अधिष्ठानावधिलक्षणस्य शून्ये असंभवादित्याह — यदनुविद्धं हीति । भ्रान्तिसमये शून्यं रजतमिति अप्रतीतेः, बाधदशायां च इयं शुक्तिरित्येव बाधो-पलम्भादित्यर्थः । ननु इदमिति शून्यमेवावभासत इति नेत्याह — नहीदमित्यपीति । क्रियानुपपत्तेः तदवसीयत इत्याह — अन्यथेति । अङ्गुलीयकादिकरणार्थिनो रजतादि-

अथवा विवादाध्यासिता भावाः स्वानुगतप्रतिभासे वस्तुनि कल्पिताः विभक्तत्वात्, यदित्थं तत्तथा, यथा सर्पधारादण्डमालाबलीवर्दमूत्रितत्वादीनि स्वानुगतप्रतिभासे रज्ज्वा इदमंशे परिकल्पितानि इति । विपर्यये तु बाधकमुक्तम् ॥

अत्राह कश्चित् — स्यादेतदेवं यदि सर्पादयः परिकल्पिताः स्युः; न त्वेवम्, तत्प्रत्ययानामपि यथार्थत्वात् । तथाहि — विवादाध्यासिताः प्रत्यया यथार्थाः प्रत्ययत्वात्, उभयवादिसिद्धप्रत्ययवत् । न च सर्वो-

---

निबन्धः ।

प्रकारान्तरेण सदधिष्ठानत्वं साधयति — अथवेत्यादिना । कल्पिता इत्युक्ते शून्यवादिनं प्रति सिद्धसाधनं स्यात्, तदर्थमाह — वस्तुनीति । वस्तुशब्देन च सद्रूपत्वं विवक्षितम् । क्षणिकज्ञानेन परिकल्पिता इति वदन्तं प्रति सिद्धसाधनत्वव्युदासायाह — स्वानुगतप्रतिभाम इति । विभक्तत्वं भवतु, स्वस्मिन् अनुवृत्तप्रतिभासे वस्तुनि कल्पितत्वञ्च न भविष्यति; किं बाधकमित्याशंक्याह — विपर्यये तु बाधकमुक्तमिति । निरधिष्ठानभ्रमप्रसङ्गादिकमित्यर्थः ॥

दृष्टान्तस्य साध्यवैकल्यं मन्वानः प्राभाकरः प्रत्यवतिष्ठते इत्याह — अत्राहेत्यादिना । ग्रन्थस्तु स्पष्टार्थः ॥

संबन्धोक्तिः ।

बुद्ध्या शुक्त्याद्युपादानं न स्यात्, यदि शुक्तिः इदमात्मना रजतरूपेण न प्रतीयेतेत्यर्थः ॥

अनुमानान्तरमाह — अथवेति । स्वस्मिन्ननुगततया प्रतिभासो यस्य वस्तुनः तत् स्वानुगतप्रतिभासं तस्मिन्निति यावत् । शून्ये सिद्धसाधनव्यावृत्त्यर्थं वस्तुनीति । इदमधिष्ठानस्य एकत्वसिद्ध्यर्थं स्वानुगतत्वविशेषणम् । अनुगतस्य सद्भावसाधनार्थं प्रतिभासपदम् । अत्रापि भ्रान्तिबाधयोः आकस्मिकत्वप्रसक्तिः विपक्षे बाधिकेत्याह— विपर्यये त्विति ॥

अत्र प्राभाकरो दृष्टान्तस्य साध्यवैकल्यमाशङ्कते — अत्राहेति । तदेव साधयति — तथा हीति । सुगतमतानुसारेण साध्यवैकल्यं दृष्टान्तस्याशङ्क्य

ऽप्ययथार्थ एव प्रत्यय इति दृष्टान्तासिद्धिः। अस्यैव प्रत्ययस्य यथार्थत्वविपर्यय-त्वयोर्व्याघातात्। यदि ह्ययं यथार्थः स्यात् कथं तदा सर्वोऽप्ययथार्थः? यदि त्वयमयथार्थः तदाऽप्यस्य विषयवैपरीत्याय केनचित् यथार्थेन प्रत्ययेन भवितव्यमिति कथं न व्याघात इति ॥

तदिदमसङ्गतम्। विवादास्पदविभ्रमाद्यभ्युपगमे राद्धान्तविरोधात्।

---

निबन्धः।

**तदिदमसङ्गतमि**त्यस्य अयमर्थः — विवादास्पदीभूताः प्रत्ययाः यथार्थाः इति प्रतिज्ञावचनमेव नाङ्गान् धारयति। तथाहि — 'सिद्धं धर्मिणमुद्दिश्य साध्यधर्मो विधीयते' इत्युक्तत्वाद्धर्मिसिद्धिः तावद्वक्तव्या। तत्र धर्मिणो विवादास्पदप्रत्यया-स्त्वयाभ्युपगम्यन्ते न वेति। प्रथमेऽपसिद्धान्तमाह। न हीदमिति ग्रहणं रजतमिति स्मरणं च विहायापरस्सामानाधिकरण्यप्रत्ययो यथार्थत्वधर्मद्वयविवादालम्बनत्वेनास्ति प्राभा-कराणाम्। न च ग्रहणस्मरणयोरेव विवादास्पदपदेनाभिधानम्, तत्र यथार्थत्वे विवादाभावात्॥

अथ लोके वादिनां च सामानाधिकरण्येन अवभासमानं प्रत्ययं प्रथम-मभ्युपगम्य यथार्थत्वं साधयामः। पश्चात्तत्रैकत्वनानात्वविवादे स्मृतिग्रहणद्वैराश्यमङ्गी-करिष्यति इति न सिद्धान्तविरोधः, तर्हि यल्लौकिकप्रत्ययस्य यथार्थत्वं साध्यते, तत्किं कान्ताकरादिगतरजतविषयत्वं, किंवा तुच्छव्यावृत्तार्थविषयत्वं? न तावदाद्यं, स्पष्टं

संबन्धोक्तिः।

परिहरति — **न च सर्वोऽपी**ति। उक्तमेवार्थं प्रपञ्चयति — **यदि ही**ति। सर्वोऽपि अयथार्थः प्रत्ययः इत्यस्य प्रत्ययस्य यथार्थत्वे सर्वप्रत्ययानामयथार्थत्वं न सिद्ध्यति, अनेनैव प्रत्ययेन व्यभिचारात्; अयथार्थत्वे तु अस्यायथार्थत्वं तदा भवति, यदा तद्विषयप्रत्ययेषु कश्चित् यथार्थः स्यादित्यर्थः॥

तदेतदख्यातिमतं दूषयति — **तदिदमि**ति। ननु विभ्रमाभ्युपगमे कथं राद्धान्तविरोधः? अयथार्थव्यवहारहेतोः प्रत्ययस्य विभ्रमशब्दाभिलाप्यस्य अभ्यु-पेतत्वात्; मैवम्, अयथार्थव्यवहारहेतुपक्षीकरणे मायावादिना अधिष्ठानविषयान्तः-करणवृत्तेः तथात्वस्वीकारेण सिद्धसाधनत्वात्; नैयायिकं प्रति च ईश्वरज्ञानेन सिद्ध-

**यथार्थशब्देन च सदर्थविवक्षायां नायं सर्प इत्यादिबाधविरोधात् । तुच्छ-व्यावृत्तार्थविवक्षायां च अस्मान् प्रति सिद्धसाधनत्वात् । विवादास्पदविभ्रमाद्यनभ्युपगमे तु हेतोराश्रयासिद्धिरिति ॥**

**किञ्च अयथार्थः प्रत्ययोऽस्तीत्यस्मदीयः प्रत्ययो यथार्थः स्यात् अयथार्थो वा ? प्रथमे तेनैवायथार्थत्वसिद्धिः । चरमेऽप्यस्यायथार्थत्वे कथं सर्वप्रत्यययाथार्थ्यमिति । नैवंविधः प्रत्ययोऽस्ति, किं तर्हि ? व्यवहार-**

---

निबन्धः ।

पुरोदेशावस्थितवस्तुविषयापरोक्षप्रत्ययस्य तद्विषयत्वानुपपत्तेः । नापि द्वितीय इत्याह — **यथार्थशब्देन चेति** । नापि तृतीय इत्याह — **तुच्छव्यावृत्तेति** । तस्माल्लोकसिद्धं वादिसिद्धं वा सामानाधिकरण्यप्रत्ययमङ्गीकृत्य तस्य यथार्थत्वं साध्यते इत्यपि न शक्यं वक्तुम् । इदानीमनभ्युपगमपक्षे वा दूषणमाह — **विभ्रमादीति** ॥

इतश्च सर्वे प्रत्यया यथार्था इति प्रतिज्ञातुं न शक्यत इत्याह — **किंचेत्यादिना** । अयथार्थप्रत्ययोऽस्ति इति मदीयः प्रत्ययः तद्दृष्ट्या यथार्थो न भवति तर्हि तत्रैवानैकान्तिकमित्याह — **चरमेऽपीति** । **प्राभाकरः** स्वाभिप्रायं प्रकटयति — **नैवंविध इत्यादिना** । अयथार्थः प्रत्ययोऽस्तीति वेदान्तविदभिप्रयुक्त-

संबन्धोक्तिः ।

साधनता; तस्य च सर्वव्यवहारजनकस्य रजतव्यवहारं प्रत्यपि हेतुत्वात्, यथार्थत्वाच्च । तस्य यथार्थत्वे संप्रतिपन्नप्रत्ययवत् अयथार्थव्यवहारहेतुत्वानुपपत्तेः अयथार्थतैवाभ्युपेया । तथा सति सिद्धान्तविरोधो दुष्परिहर एवेति । इदानीं साध्यं विकल्प्य दूषयति — **यथार्थेति** । राद्धान्तविरुद्धश्चेत् विभ्रमाद्यभ्युपगमः, तर्हि स नाभ्युपेयत इत्यत आह— **विभ्रमादीति** । विभ्रमादीत्यादिशब्देन संशयो गृह्यते, तस्यापि विप्रतिपन्नतया साध्यस्य सिसाधयिषितत्वात् ॥

सर्वप्रत्ययानां च यथार्थत्वं वक्तुमयुक्तमित्याह — **किञ्चेति । प्रथम इति । अयथार्थः** प्रत्ययोस्तीत्यस्य यथार्थत्वात् तत्प्रत्ययविषयेण प्रत्ययेन अयथार्थेन भवितव्यम् इत्यर्थः । अयथार्थप्रत्ययोऽस्तीत्ययं प्रत्यय एव न भवति, किन्तु व्यवहारमात्रमिति शङ्कते — **नैवंविधः प्रत्यय इति** । व्यवहारस्यापि मूलतया तथाविधः प्रत्ययोऽभ्युपेय

मात्रमेतत् पदार्थानामसंसर्गाग्रहमूलमिति चेत्; मैवम्। व्यवहारमात्रस्य परस्परान्वितत्वेन व्यवह्रियमाणपदार्थप्रत्ययमूलत्वात्। तथाहि —

विवादाध्यासितो व्यवहारः परस्परान्वितत्वेन व्यवह्रियमाणपदार्थज्ञानपूर्वकः, व्यवहारत्वात्, मध्यमवृद्धव्यवहारवत्। न च साध्यविकलो दृष्टान्तः; तथा सति उत्तमवृद्धप्रयुक्तशब्दानामन्वितप्रत्ययाजननेन व्युत्पत्तिवैधुर्ये शब्दप्रामाण्योच्छेदप्रसङ्गात्। संवादिनि व्यवहारे संसृष्ट-

---

निबन्धः।

वाक्यश्रवणानन्तरं न संसर्गप्रत्ययो भवति। किं तु संसृष्टानामेव पदानां नैरन्तर्योच्चारणनिबन्धं संसर्गाग्रहनिबन्धं व्यवहारमात्रमेव भवतीत्यर्थः। परिहरति — **मैवमिति**। यः कश्चिद्व्यवहारः स सर्वोऽपि परस्परसंसृष्टेन व्यवह्रियमाणपदार्थानां परस्परसंसर्गज्ञानपूर्वक एव युक्त इत्यर्थः। दृष्टान्तस्य साध्यवैकल्याशंकामपाकरोति—**नचेति**। **तथा सतीति**। मध्यमवृद्धव्यवहारस्य व्यवह्रियमाणपदार्थानां परस्परसंसर्गज्ञानपूर्वकत्वाभावे सति देवदत्त गामानयेत्याद्युत्तमवृद्धप्रयुक्तशब्दानां पार्श्वस्थस्य बालस्य संसर्गज्ञानजनने व्युत्पत्तिविरहः प्रसज्येत। स खलु मध्यमवृद्धप्रवृत्तिदर्शनेन संसर्गज्ञानमनुमाय शब्दवाच्यान्वयव्यतिरेकानुविधायितया तेषां तत्र शक्तिं परिकल्पयति। मध्यमवृद्धव्यवहारस्य च संसर्गज्ञानपूर्वकत्वाभावे कुतस्त्वनुमाय सङ्गतिग्रहणम्। ततः वेदप्रामाण्यमेवोच्छिद्येतेत्यर्थः॥

संबन्धोक्तिः।

इत्याशङ्क्य, मैवम्, विवेकाग्रहमूलत्वोपपत्तेः इत्याह — **पदार्थानामिति**। नन्वर्थस्य यथार्थत्वस्य प्रत्ययत्वस्य अस्तित्वस्य च परस्परभेदाग्रहात् अयं व्यवहारः, न त्वभेदग्रहात् इत्यर्थः। नैवं, व्यवहारस्य स्वविषयज्ञानपुरस्सरत्वनियमात् इति परिहरति — **मैवमिति**॥

इममेवार्थमनुमानेन साधयति — **तथा हीति**। पदार्थज्ञानपूर्वकत्वे व्यवह्रियमाणपदार्थज्ञानपूर्वकत्वे च सिद्धसाधनता स्यादिति तद्व्यावृत्त्यर्थं परस्परान्वितत्वेनेति विशेषणम्। मध्यमवृद्धव्यवहारोऽप्यसंसर्गाग्रहादेवास्तु इत्यत आह — **न चेति**। शब्दानामन्योन्यान्वितस्यार्थज्ञानजनने यदा लोके सामर्थ्यं न गृह्यते, तदा वेदेऽपि 'स्वर्गकामो यजेत' इत्यादिवाक्येषु यागादेः स्वर्गादिना साध्यसाधनभावेन अन्वयो न

प्रत्ययोऽपि कारणमस्तु न सर्वत्रेति चेत्; कुत एतत्? कार्यवैलक्षण्यस्य व्यवहारसंवादस्य कारणवैलक्षण्यापेक्षणादिति चेत्; अस्तु तर्हि संसृष्टयोरसंसर्गाग्रहः संवादिव्यवहारस्य कारणम्, विपरीतस्तु विपरीतस्येति व्यवस्था; किं संसृष्टप्रत्ययाभ्युपगमेन? तस्मात् व्यवहारमात्रस्य संसृष्टप्रत्ययः कारणं; तद्विशेषस्तु संवादी संवादिनः इति स्वाभ्युपगतशब्दप्रामाण्यलोभादेवाश्रयणीयम्। अन्यथोन्नीतन्यायेन तदसिद्धिरिति स्थितम्॥

---

## निबन्धः।

उक्तदोषभीत्या विभागं करोति प्राभाकरः—संवादीति। सिद्धान्ती विभागकारणं पृच्छति—कुत एतदिति। व्यवहारत्वाविशेषात् सर्वत्र संसर्गप्रत्यय एव कारणमस्त्वित्यर्थः। विभागकारणमाह प्राभाकरः—कार्यवैलक्षण्यस्येति। व्यवहारत्वाविशेषेऽपि व्यवहारस्य संवादो नाम कार्यवैलक्षण्यं दृश्यते। तस्य कारणवैलक्षण्यसापेक्षत्वान्मध्यमवृद्धव्यवहारे संसर्गप्रत्ययः कारणं, न सर्वत्र। नहि घटपटयोः कार्यत्वाविशेषात् कारणविशेषः कल्पयितुं शक्यत इति भावः। कार्यवैलक्षण्यस्य कारणवैलक्षण्यमन्तरेणासंभवात्कारणवैलक्षण्यमात्राक्षेपकत्वं संभवति, नतु त्वदुक्तविभागसाधकत्वमिति परिहरति—अस्तु तर्हीति। विपरीतस्तु विपरीतस्येति। संसर्गायोग्ययोः असंसर्गाग्रहो विसंवादिव्यवहारस्य कारणमित्यर्थः। तदा च वेदप्रामाण्यभङ्गप्रसङ्गो दुर्वार आपद्येत यस्मात्तस्मादित्युपसंहारः॥

यद्यपि सामान्यमात्रज्ञानाद्विशेषमात्रज्ञानाद्वा व्यवहारासंभवात् संसृष्टवस्तुबोधादेव सर्वो व्यवहार इति नियमाद्यथार्थप्रत्ययोऽस्तीत्ययमपि व्यवहारः संसर्ग-

## संबन्धोक्तिः।

प्रतीयेत इति शब्दप्रामाण्यम्, अन्विताभिधानाभ्युपगमश्च भज्येत इत्यर्थः। यदि लोके सर्वत्र असंसर्गाग्रहादेव व्यवहारः, तदा स्यादयं दोषः; न तु तथास्माभिः अभ्युपेत इति शङ्कते – संवादिनीति। गूढाभिसन्धिराह सिद्धान्ती – कुत एतदिति। आह पूर्ववादी— कार्येति। सिद्धान्ती स्वाभिसन्धिमुद्घाटयति— अस्त्विति। विपरीतस्त्विति। असंसृष्टयोरसंसर्गाग्रह इति यावत्। किं तर्हि अभ्युपेयमिति तत्राह— तस्मादिति॥

तथापि रजतादिसमारोपसद्भावे किं प्रमाणमिति चेत्, 'एतावन्तं कालमिदमेव शुक्तिशकलं मिथ्यैव रजतमभात्' इत्युत्तरकालानुसन्धानात्मकं प्रत्यभिज्ञापरपर्यायं प्रत्यक्षं तावदेकम् । अपरं चानुमानमनन्तरन्यायसूचितम् ॥

किञ्च शुक्तिकाशकलं रजतात्मना प्रतिभासते; रजतार्थिनो नियमेन प्रवृत्तिगोचरत्वात्, सम्यग्रजतवत् । नान्तरीयकप्रवृत्तिगोचरस्य शुक्त्यादिमलस्य व्यवच्छेदाय नियमग्रहणम् ॥

किञ्च विवादाध्यासिता प्रवृत्तिः पुरोवर्तिगोचररजतज्ञानपूर्विका रजतेच्छाधीनपुरोवर्तिप्रवृत्तित्वात् सम्यग्रजतप्रवृत्तिवत् ॥

---

निबन्धः ।

ज्ञानपूर्वकः, तथापि मिथ्याज्ञानसद्भावे किं प्रमाणमित्याह — **तथापीति** । प्रत्यभिज्ञापरनामकं प्रत्यक्षविशेषं प्रमाणमाह — **एतावन्तमिति** । यो व्यवहारः स संसृष्टज्ञानपूर्वक इत्यनन्तरोक्तन्यायसूचितानुमानञ्चाह — **अपरं चेति** । रजतार्थिनश्शुक्तिशकले प्रवृत्त्यादिव्यवहारः संसर्गज्ञानादविवेकाद्वेति विवादे प्रयोक्तव्यम् — विमतो व्यवहारः संसृष्टव्यवह्रियमाणवस्तुज्ञानपूर्वकः व्यवहारत्वादुभयाभिमतव्यवहारवदित्यर्थः । **किंचेत्यादिः** स्पष्टार्थः ॥

संबन्धोक्तिः ।

युक्तिमात्रात् प्रमेयासिद्धेः तत्र प्रमाणं वचनीयमिति पृच्छति — **तथापीति** । आह सिद्धान्ती — **एतावन्तमिति** । 'सोऽयं देवदत्तः' इतिवत् प्रत्यभिज्ञानं न दृश्यत इत्यत्र आह — **इदमेवेति** । **अनन्तरन्यायसूचितमिति** । विवादपदं पुरोवर्तिरजतसंसृष्टतया प्रतीयेत, तत्संसृष्टव्यवहारविषयत्वात्, 'अयं घटः' इत्यादिसामान्यविशेषवत् इत्यनुमानमत्रोहनीयम् ॥

शुक्तिशकलं पक्षीकृत्याह — **किञ्चेति** । नियमपदव्यवच्छेद्यमाह — **नान्तरीयेति** । विमले शुक्तिकाशकले रजताभिलाषेण प्रवृत्त्युपलम्भात् न तन्मलादौ नियमेन तत्प्रवृत्तिसंभव इत्यर्थः । नियमेन प्रवृत्तिविषयत्वादित्येतावन्मात्राभिधाने घटार्थिनो नियमेन प्रवृत्तिविषयघटादिष्वनैकान्तिकता, तद्व्यावृत्त्यर्थं रजतार्थिन इति विशेषणम् । प्रवृत्तिं

**यद्वा विवादाध्यासितं रजतधीपदम्, रजतव्यवहारपदत्वात् यदित्थं तत्तथा, यथा सम्यग्रजतम् ॥**

**यः पुनराह — शुक्तिकाशकलं तदात्मना न प्रतीयते, तद्रूपेणासत्त्वात्। यत् यद्रूपेणासत् तत् तद्रूपेण न प्रतीयते; यथा घटः पटरूपेण, यथा वा शशविषाणं सद्रूपेणेति। तस्य साध्यविकलो दृष्टान्तः। शब्दप्रत्यये घटादेरपि पटादिरूपेण प्रतिभासमानत्वात्। अन्यथा परं प्रति दृष्टान्तत्वेनाभिधानस्यैवानुपपत्तेरिति ॥**

---

## निबन्धः।

यद्यद्रूपेण न प्रतीयते इति कोऽर्थः ? किं निरूप्यमाणे तदाकारेण न प्रतीयते, किंवा प्रतिभासमात्रमपि न संभवति, किं वा तत्संसृष्टत्वेन प्रतिभासो न संभवति ? तत्र प्रथमे सिद्धसाधनं, इतरयोस्तु साध्यवैकल्यमित्याह — **तस्य साध्यविकलो दृष्टान्त इत्यादिना। यथा घटः पटरूपेणेति।** शब्दोच्चारणे घटस्यापि पटरूपेण प्रतिभासो भवत्येव। इतरथा कथं मां प्रति दृष्टान्तोऽभिधीयेत। प्रतिपन्नस्य हि प्रतिषेधो वक्तव्यः। शब्दादपि चेद्घटस्य पटरूपता न प्रतीयते, कथं तन्निषेधोदाहरणमुच्येतेत्यर्थः ॥

## संबन्धोक्तिः।

पक्षीकृत्याह — **विवादाध्यासितेति**। केवलरजतज्ञानपूर्वकत्वे पुरोवर्तिज्ञानपूर्वकत्वमात्रे वाभिधीयमाने सिद्धसाधनत्वप्रसङ्गात् विशेषणद्वयं दत्तमिति मन्तव्यम्। केवलशुक्तिकाशकलप्रवृत्तौ व्यभिचारनिवारणाय रजतेच्छेति पदम्। रजतस्मरणात् प्रवृत्तिनिरासार्थं पुरोवर्तिपदम् ॥

शुक्तिकाशकलमेव पक्षीकृत्य तस्य रजतज्ञानविषयत्वं साधयति — **यद्वेति**। सप्रतिसाधनतामाशङ्क्य परिहरति — **यः पुनरिति**। 'सन् घटः' 'सन् पटः' इति घटपटयोरपि तादात्म्यावभासमाशङ्क्याह — **यथा वा शशविषाणमिति**। किं प्रमाणतो न प्रतीयते इति साध्यते, किं वा यथाकथञ्चिदिति विकल्प्य आद्ये सिद्धसाधनम्, द्वितीये तु घटः पटरूपेण इत्यत्रैव व्यभिचारः, अन्यथा प्रसक्तस्य प्रतिषेधायोगात् इत्याह — **तस्येति** ॥

एवं भ्रान्तिं प्रसाध्य तद्विषयस्यानिर्वचनीयत्वं साधयितुं विमर्शयति —

अस्तु तर्हि समारोपः। समारोप्यमाणं तु विचार्यताम्— किमसत्, किं वा सत्, किं वा उभयात्मकं, किं वा उभयविलक्षणं इति। न तावदसत्, तत्र प्रतिभासभेदप्रवृत्त्योरनुपपत्तेः। न ह्यसति नरविषाणादौ अपरोक्षावभासः कदाचिदुपलभ्यते, नापि प्रवृत्तिः। आन्तरालिकाद्वैलक्षण्या-दसत्येव क्वचिदप्येवमस्त्विति चेत्, न, वैलक्षण्याधिकरणत्वे तुच्छ-रूपासत्त्वानुपपत्तेः। तस्य च निराकारत्वात्। सद्वैलक्षण्यमात्रेणा-सत्वाभिधाने मायावादिमतप्रवेशात्॥

---

निबन्धः।

एवं तावत् भ्रमज्ञानं प्रसाध्यानिर्वचनीयत्वं स्फुटीकर्तुं विचारमारभते— **अस्तु तर्हीति**। अतस्मिंस्तद्बुद्धिस्समारोपो मिथ्याज्ञानमिति तावद्विचारे असति तस्य पक्षस्य हेयत्वमित्यत आह— **न तावदसदिति**। तत्रासति प्रतिभासभेदस्य विशेषस्यापरोक्षप्रतिभासस्य प्रवृत्तेश्चानुपपत्तेरित्यर्थः। उक्तं स्पष्टयति— **नहीति**। असत्ख्यातिवादिनो मतं पृच्छति— **आन्तरालिकादिति**। यथा घटपटादीनां सत्वाविशेषेप्यवान्तरवैलक्षण्यादसाधारणप्रतिभासप्रवृत्तिगोचरत्वं, तथा नरविषाणस्य शुक्ति-रूप्यस्य चासत्वाविशेषेप्यवान्तरवैलक्षण्याच्छुक्तिरूप्ये अपरोक्षप्रतिभासप्रवृत्तिगोचरत्व-मप्यस्त्वित्यर्थः। परिहरति— **नेति**। तुच्छं नरविषाणादि। यद्यस्य किंचि-द्वैलक्षण्यमस्ति न तर्हि तुच्छरूपमसत्वमित्युक्ते सद्वैलक्षण्यादसत्वं भविष्यतीत्याशङ्क्याह— **सद्वैलक्षण्यमात्रेणेति**॥

संबन्धोक्तिः।

**अस्त्विति**। किमसदित्यसत्ख्यातिमतानुसारेणोक्तम्, किं वा सदित्यन्यथाख्याति-मतानुसारेण, किं वा उभयात्मकमिति आर्हतमताभिप्रायमवलम्ब्य, किं वा उभय-विलक्षणमिति स्वसिद्धान्ताङ्गीकारेण? तत्र आद्यं दूषयति— **न तावदिति**। प्रतिभासभेदशब्देन अपरोक्षप्रतिभासविशेष उच्यते। उक्तमेवोपपादयति— **न हीति**। आरोपितस्यासतोऽपरोक्षप्रतिभासो न विरुध्यत इति शङ्कते— **आन्तरालिकेति**। परिहरति— **नेति**। सत्वाभावात् असत्त्वमुक्तम्, न पुनः शशशृङ्गादिवत् निः-स्वभावत्वात् इत्यत आह— **सद्वैलक्षण्येति**॥

नापि सत्, बाधविरोधात्। यत्र बाध्यते ततोऽन्यत्रास्तीति चेत्, न, तत्रास्याप्रतीतेः, कल्पनानर्थक्याच्च। न ह्यन्यत्र सत्वं अस्यात्र प्रतीतिमुत्पादयेत् विषयभेदात्। नहि भूनलिनसत्तामात्रात् नभोनलिनं प्रतिभायात्। तथा प्रतिभासे वा अन्यत्र दृष्टस्यान्यत्र सत्ता न कल्पनीया। क्लृप्तस्यैव तथाभूतस्यानेकस्य संभवात्। इह निषेधादन्यत्रास्ति घटादिवत् इति चेत्,

---

निबन्धः।

इदानीं साङ्ख्यान् दूषयति—**नापीत्यादिना**। सांङ्ख्यादिवादिनो मतं ददाति—**यत्रेति**। तर्हि भ्रान्तिप्रतिपन्नस्यान्यत्र सत्वं किं प्रतीतिसिद्धं किंवाऽनुपपत्त्या कल्प्यते? न तावदस्य भ्रान्तिप्रतिपन्नस्यान्यत्र सत्वं प्रतीयत इत्याह — **न, तत्रास्येति**। अथ यदि क्वापि रजतसत्वं न स्यात्तदेयमेव प्रतीतिः न घटतेऽतोऽनुपपत्त्याऽन्यत्र सत्वं कल्प्यत इत्याशङ्क्याह— **कल्पनानर्थक्याच्चेति**। आनर्थक्यमेवोपपादयति— **न ह्यन्यत्रेति**। अन्यत्र तस्य रूप्यस्य सत्वम् अत्रासतः प्रतिपत्तिं नोपपादयति। तस्य प्रतीत्यन्तरगोचरत्वादस्याश्च प्रतीतेरेतद्देशकालावच्छिन्नरूप्याविषयत्वादित्यर्थः। अन्यथा यदि क्वापि सत्वमन्यत्रासतोऽपि प्रतीतिमुपपादयेत्तदा भुवि कमलं सदिति नभस्यपि तद्भायात्; नच तदस्तीत्याह— **नहीति**। इदानीमभ्युपगम्याह— **तथा प्रतिभासे वेति**। क्वचित्सत्तामात्रेणान्यत्रासतोपि प्रतिभाने वा भ्रान्तौ दृष्टस्यैवान्यत्र सत्ता न कल्पनीया। उभयवादिसिद्धस्यैव रजतजातीयस्यैवान्यत्रासतोऽपि प्रतीत्युपपादकस्यानेकस्य हट्टादौ संभवात्तद्बलेनासतोपि इह प्रतिभाससंभवादित्यर्थः। तस्मादसतः ख्यात्यनुपपत्त्याऽन्यत्र सत्वं न कल्पनीयमिति सिद्धम्॥

इदानीं प्रमाणान्तरं शङ्कते— **इह निषेधादिति**। विमतमन्यत्रास्तीह निषिध्यमानत्वात् इह घटवदित्यनुमानमर्थापत्तिर्वा ग्रन्थार्थः। अनुमानस्यानैकान्तिकत्व-

संबन्धोक्तिः।

द्वितीयमतमपाकरोति— **नापीति**। सत्त्वे आत्मवद्बाध्यत्वादित्यर्थः। बाधस्थले सत्त्वाभावेऽपि अन्यत्र सत्त्वं न विरुध्यत इति शङ्कते— **यत्रेति**। नैवम्, तत्र प्रत्यक्षानुमानादिप्रमाणाभावात् इत्याह— **न तत्रेति**। तदेव प्रतिपादयति— **न हीति**। तदेव दृष्टान्तेनोपपादयति— **नहि भूनलिनामिति**। तस्य निःस्वभावत्वादेवाप्रतिभास इत्यत आह— **तथेति**। अनेकस्य शुक्तिभूतलादेरित्यर्थः।

**मैवम्** । अधिष्ठानारोपिततादात्म्ये व्यभिचारात् । यद्यन्यत्रापि नास्ति कुतस्तत्रापि न निषिध्यत इति चेत् ; अप्रसक्तेः तादात्म्यवत् । इहापि नेदं रजतमित्याकारेण तादात्म्यमेव निषिद्ध्यते न स्वरूपमिति चेन्न, तथासति वनस्पत्योरिव विविक्तयोर्द्वयोरप्यत्रैवानन्तरं प्रतीतिप्रसक्तेः । प्रतिषेधप्रत्ययस्तु

---

निबन्धः ।

माह — **मैवमिति** । शुक्ते रूप्यतादात्म्यं निषिध्यमानं न ह्यन्यत्रास्तीत्यनैकान्तिकम् । अन्यथाप्युपपत्तिश्चार्थापत्तेरित्यर्थः । इदानीमर्थापत्त्यन्तरं शंकते — **यद्यन्यत्रापि नास्तीरिति** । यथा इह रूप्यस्याभावादेव निषेधः तथा यद्यन्यत्रापि न स्यात्तत्रापि निषिध्येत । न च निषिध्यते अतो निषेधानुपपत्त्या तत्सत्वं कल्प्यत इत्यर्थः । अन्यथाप्युपपत्तिरित्याह — **अप्रसक्तोति** । यथा शुक्ते रूप्यतादात्म्यं परमार्थस्थले प्राप्त्यभावादेव न निषिध्यते, नतु सत्वात्तथा शुक्तिसंसृष्टरूप्यस्याप्यन्यत्र प्राप्त्यभावादेवानिषेधो नतु सत्वादित्यर्थः । तस्माद्रूप्यस्य अन्यदेशे सत्वे प्रमाणाभावादिह प्रतिषिध्यमानत्वान्न सत्वमिति सिद्धम् ॥

इदानीं निषिध्यमानत्वमसिद्धमित्याह — **इहापीति** । परिहरति — **न तथा सतीति** । यथा दूरस्थयोः वृक्षयोरेकोऽयं वृक्ष इति तादात्म्यभ्रमे जाते पश्चान्निकटमुपसर्पतः तन्निषेधे सति द्वौ वृक्षौ विविक्तौ प्रतीयेते, तथेहापि तादात्म्यं चेन्निषिध्येत तदा पुरोदेश एव विविक्तयोः प्रतिभासः स्यात् । नचास्ति । तस्माद्रजतस्वरूपमेव निषिध्यत इत्यर्थः । यद्यपि सामान्यविशेषयोः तादात्म्यं तथापि वृक्षादिवत (?) भेदेनाप्युपलंभो भवेत् । तदसंभवेऽपि तत्रैव दोषः । सामान्यस्य सादृश्यशून्यतया भ्रमोऽपि न संभवति । ननु तादात्म्यातिरेकेण स्वरूपमपि निषिध्यते चेत्तदा वैयधिकरण्येनापि कदाचिन्निषेधः स्यात् । इह 'नेदं रजतं नायं सर्पः' इति नियमेन समानाधि-

संबन्धोक्तिः ।

कल्पान्तरमाशङ्कते — **इहेति** । मैवम्, अनियमादित्याह — **मैवमिति** । निषेधाधीनत्वात् असत्त्वाधिगमस्य, तत्र च अनिषेधादसत्त्वं कथमिति शङ्कते — **यदीति** । निषेधाभावोऽन्यथासिद्ध इति परिहरति — **अप्रसक्तेरिति** । रजतस्य निषेध एव असिद्ध इति शङ्कते — **इहापीति** । मैवम्, वैलक्षण्यात् इति परिहरति — **नेति** । ननु तादात्म्यं निषेध्यम्, स्वरूपनिषेधे वैयधिकरण्येनापि निषेधप्रसङ्गात्

कदाचित् 'न तत्र दृष्टं सलिलमस्ति,' 'न मया तत्रानुभूतं रजतमस्ति' इति वैयधिकरण्येनापि जायत एव ॥

कुत्र चेदमन्यत्र भवेत्? भवेद्बुद्धौ देशान्तरादौ वा? यदि बुद्धौ तर्हि गुञ्जापुञ्जादौ ज्वलनादिसमारोपावसरे शरीरदाहादिप्रसङ्गः। तत्रापि तस्यातात्विकत्वान्न प्रसङ्ग इति चेत्; आयातं तर्हि अत्यन्तासत्वं, अनिर्वचनीयत्वं वा। तथाभावस्य गत्यन्तराभावात्। सन्नेवायमर्थक्रियाऽक्षम आकार इति चेत्, गुञ्जापुञ्जादावपि तर्हि तदाकारारोपेण दाहाद्यर्थी न

---

## निबन्धः।

करणौ निषेधौ दृश्येते। तदनुपपत्त्या तादात्म्यमात्रनिषेधः परिकल्प्यत इत्याशंक्याह-- प्रतिषेधप्रत्ययस्त्विति ॥

पूर्वं भ्रान्तिप्रतिपन्नस्यान्यत्र सत्वं प्रमाणाभावेन प्रतिषिद्धं। प्रामाण्येन इदानीं विशेषतः तत्प्रतिषेधाय प्रक्रमते -- कुत्र चेदमित्यादिना। प्रथमं विज्ञानवादं पराकरोति -- यदि बुद्धाविति इत्यादिना। विज्ञानवादिनो मतं पृच्छति -- तत्रापीति। बुद्धावपि ज्वलज्ज्वलनादेः असत्वात् गुञ्जापुञ्जादौ ज्वलनादिसमारोपावसरे न शरीरदाहप्रसङ्ग इत्यर्थः। अपसिद्धान्तप्रसङ्गेन परिहरति — आयातं तर्हीति। तथाभावस्येति। बहिरन्तश्च सत्वविधुरस्यात्यन्तासत्त्वे अनिर्वचनीयत्वव्यतिरेकेण गत्यन्तराभावादित्यर्थः। सन्नेवायमिति। बुद्धौ सन्नेवायं ज्वलनादिः; किन्त्वर्थक्रियाक्षमो न भवतीति न शरीरदाहप्रसङ्ग इत्यर्थः। तर्ह्यपरो दोषस्स्यादित्याशंक्याह — गुञ्जापुञ्जादावपीति। गुञ्जापुञ्जादौ समारोप्यमाणो वह्निः न बाह्यः समारोप्यते त्वत्पक्षे।

## संबन्धोक्तिः।

इत्याशङ्क्य कचिद्वैयधिकरण्येनापि निषेधदृष्टेः न तादात्म्यं निषेध्यमित्याह — प्रतिषेधेति। इतोऽपि नान्यत्र सत्त्वमित्याह — कुत्र चेति। आत्मख्यातिमतमुत्थाप्य दूषयति — यदीति। बहिरिव बुद्धावपि तस्य तात्त्विकत्वाभावात् नायं दोष इति शङ्कते — तत्रापीति। आह सिद्धान्ती — आयातमिति। अपरोक्षप्रतीतिविरोधात् असत्त्वमयुक्तमित्यत आह — अनिर्वचनीयत्वं वेति। तथाभावस्य, अन्तर्बहिस्सत्वविरहस्य इत्यर्थः। शङ्कते -- सन्नेवेति। अयमिति बुद्धिस्थो वह्निः परामृश्यते।

प्रवर्तेत, तदाकारस्य सर्वदैवादृष्टशक्तित्वात् । बाह्यसमर्थाकारेण समारोप्यमाणः पुनः प्रवर्तयतीति चेत्, गुञ्जापुञ्जादिरेव तथा समारोप्यमाणः प्रवर्तयतु । किमनेनान्तस्तात्विकेन बहिरारोपितेनासमर्थेन समर्थात्मना समारोप्यमाणेन कल्पितेन ? ॥

भवतु तर्हि देशान्तरादावेव समारोपितस्य सद्भाव इति चेन्न, तथा सति नाक्षं ग्राहकं, विप्रकर्षेण द्रष्टुमयोग्यत्वात् अन्यथाऽतिप्रसङ्गः । दोषसामर्थ्यात् दर्शने नातिप्रसङ्ग इति चेत्, दोषोऽप्यसत् अनिर्वचनीयं वा

---

निबन्धः ।

किन्त्वान्तर एव, 'यदन्तः तत्वं बहिर्वदवभासते' इत्युक्तत्वात् । तस्य च कदाचिदपि दाहादिसमर्थत्वादर्शनात् । तस्मात् समारोपे सति दाहाद्यर्थी न प्रवर्ततेत्यर्थः । इदानीं भ्रान्तस्य प्रवृत्त्युपपादनाय विशेषं शंकते — बाह्यसमर्थाकारेणेति । बुध्याकारो ज्वलनादिः गुञ्जापुञ्जादौ समारोप्यमाणः स्वयं यद्यप्यर्थक्रियाक्षमो न भवति, तथापि महानसादिगतदाहादिसमर्थाकारेण समारोप्यमाणः पुरुषस्य प्रवर्तको भवति इत्यर्थः । सुदूरमपि गत्वा बाह्याकारसमारोपश्चेदङ्गीकृतस्तर्हि किंवा विज्ञानवादाग्रहेण ? गुञ्जापुञ्जादिरेव बाह्यसमर्थाकारेण भ्रान्त्या गृह्यमाणं पुरुषं प्रवर्तयिष्यतीत्याह — गुञ्जापुञ्जादिरेवेति ॥

इदानीं सत्ख्यात्यन्यथाख्यातिवादिनोर्मतमुत्थाप्य दूषयति — भवतु तर्हीत्यादिना । ग्रन्थस्तु स्पष्टार्थः । दोषोऽपि व्यवहितमपि ग्राहयतीत्यत्र दृष्टान्तोऽस्ति ।

संबन्धोक्तिः ।

दूषयति — गुञ्जेति । तदारोपो बुद्धिस्थस्यारोपः । य एव लोकप्रसिद्धो दाहको वन्हिः तदाकारेण पुनरारोपणात् नायं प्रसङ्ग इति शङ्कते — बाह्येति । इदं पक्षगौरवदोषेण दूषयति — गुञ्जेति ॥

अन्यथाख्यातिनां मतमुत्थापयति — भवत्विति । तस्मिन् पक्षे समारोपितस्य प्रत्यक्षता न स्यात् इति परिहरति — नेति । ननु विप्रकृष्टध्रुवाद्यपि दृश्यत इत्यत आह — अन्यथेति । चक्षुषा संप्रयुक्तत्वात् तत्र न दोष इति भावः । शङ्कते — दोषेति । मैवम्, सत्यस्य दोषगम्यत्वादृष्टेः इत्याह — दोषोऽपीति ।

तादात्म्यवद्दर्शयतु दृष्टान्तानुसारात्। तत्र च गत्यन्तराभावात्। तस्मान्नात्यन्तासत् नापि सत् समारोपणीयमिति सिद्धम् ॥

सदसद्रूपसमुच्चयस्तु विरोधादेवायुक्तः। अविरोधे वा कथं भ्रान्तिबाधव्यवस्था? पूर्वोत्तरयोरुभयोरप्येकैकांशे यथार्थत्वात्। सदसद्रूपस्य सद्रूपेण प्रतीतिर्भ्रान्तिरिति चेत्, तत् किमिदानीमंशाग्रहणं भ्रान्तिः? तथा चोत्तरोऽपि भ्रान्त एव स्यात्। तत्राप्यसदंशस्यैव स्फुरणात्। सर्वज्ञानानि

---

निबन्धः।

तुच्छमनिर्वचनीयं वा भासयतीत्यत्र तादात्म्यमेवोदाहरणमस्ति। ततः तदविरोधादनिर्वचनीयं वा द्रव्यं दोषो दर्शयतीति कल्प्यतामित्युक्तं; तत्रासिद्धो दृष्टान्त इत्याशंक्याह— **तत्र च गत्यन्तराभावादिति**। न तावत्तादात्म्यमपि सदेव बाध्यमानत्वाभ्युपगमात्। अतोऽसदेव भातीति वक्तव्यम्। यद्यत्यन्तासत्त्वेऽपरोक्षतया प्रतिभासो न भवतीत्यभिहितं तदा अनिर्वचनीयमेव भातीति वाच्यं गत्यन्तराभावादिति पक्षद्वयोक्तदोषमुपसंहरति— **तस्मादिति** ॥

तृतीयप्रकारं पराकरोति— **सदसद्रूपेति**। पराभिप्रायेणाविरोधमभ्युपगम्याह— **अविरोधे वेति**। इदं द्रव्यमिति पूर्वप्रत्ययः सदंशग्राहकत्वात् यथार्थ एव नेदमित्युत्तरः प्रत्ययोऽसदंशग्राहकत्वाद्यथार्थ एव-नच यथार्थत्वे बाध्यबाधकभावोऽतिप्रसङ्गादित्यर्थः। अतिप्रसङ्गं परिहरति— **सदिति**। सदसद्रूपं रूप्यं यदि तथैव गृह्यते तदा सा यथार्थख्यातिर्भवेत्। केवलसद्रूपेण प्रतिभासोऽयथार्थख्यातिर्भवेत् भ्रान्तिरित्यर्थः। तत्र पृच्छति— **तत्किमिति**। तत्तत्र ह्येवं वदतोऽसदंशाग्रहणं भ्रान्तिरिति इदानीमुक्तं भवति। स्वमतं शंकते— **तथाचेति**। उत्तरोऽपि नेदं रजत-

संबन्धोक्तिः।

तादात्म्यमपि सदेव किं न स्यात् इत्यत आह— **तत्र चेति**। सत्त्वे बाध्यत्वायोगादित्यर्थः ॥

आर्हतमतमनूद्य दूषयति— **सदसद्रूपेति**। विरोध एवासिद्ध इत्यत आह— **अविरोधे वेति**। काऽनुपपत्तिरित्यत आह— **पूर्वेति**। तथापि यथावदप्रतीतेः भ्रम इति शङ्कते— **सदसदिति**। गूढाभिसन्धिराह सिद्धान्ती— **तत्किमिदानीमिति**।

**चैवं भ्रान्तानि स्युः। सर्वात्मना अर्थानवभासकत्वात्। नांशाग्रहणं भ्रमं ब्रूमः, किन्तु अंशान्तरव्यवच्छेदेन सदेवेदमिति ह्यवधारयत् आद्यं संवेदनमिति चेत्; न, द्वितीयरूपस्य तत्राप्रसक्तेः। अप्रसक्तस्यापि व्यवच्छेदकत्वेन भ्रमत्वे सर्वस्यापि ज्ञानस्य तथाभावः किं न स्यात्? सर्वस्यापि ज्ञानस्य कियति कियति रूपे वर्तमानस्य अप्रसक्तापररूपव्यवच्छेदेन भ्रमत्वोपपत्तेः। तदेवं न सदसद्रूपमप्यारोपणीयमभ्युपेयम्। किं तर्हि? प्रत्येकसमुच्चयरूपाभ्यां सदसद्विलक्षणमनिर्वचनीयमेव। न चैतादृशमुभयवैलक्षण्यमपि**

---

निबन्धः।

मित्यवभासो भ्रान्त एव स्यात्। तत्र हेतुमाह— **तत्रापीति**। सदसदात्मकस्य रूप्यस्य साकल्येनाग्रहणादित्यर्थः। दूषणान्तरमाह— **सर्वज्ञानानि चैवमिति**। नहि घटज्ञाने सर्वावयवज्ञानमुपपद्यत इत्यर्थः। अतिप्रसङ्गपरिजिहीर्षया शंकते— **नांशाग्रहणमित्यादिना**। असद्रूपस्य भ्रान्तिकाले प्राप्त्यभावान्न तन्निषेधेनावधारणं संभवतीत्याह— **न, द्वितीयरूपस्येति**। अथाप्राप्तस्याप्यर्थान्निषेधेन भ्रान्तित्वं, तत्राह— **अप्रसक्तस्यापीति**। इदानीं परिशेषात् सिद्धान्तमाह— **किंतर्हीति**। ननु न सन्नासन्नापि सदसदित्येवं प्रत्येकरूपनिषेधेन यदुभयवैलक्षण्यं तदप्येकस्य

संबन्धोक्तिः।

ओमित्यत्राह— **तथाचेति**। तत्राप्यंशान्तरस्फुरणादित्याह— **तत्रापीति**— अतिप्रसङ्गश्च स्यादित्याह— **सर्वेति**। अतिप्रसङ्गपरिहाराय विशेषमाशङ्कते— **नांशेति**। अंशान्तरव्यवच्छेदमेव दर्शयति— **सदेवेदमिति**। व्यवच्छेद एवासिद्ध इति परिहरति— **नेति**। अप्रसिद्धस्यापि व्यवच्छेदे को दोष इत्यत आह— **अप्रसक्तस्यापीति**। एतदेव प्रपञ्चयति— **सर्वस्यापीति**। उपसंहरति— **तदेवमिति**। प्रकारान्तरस्य अप्रसिद्धत्वात् आरोपणीयं तर्हि न सिद्ध्येदित्यभिप्रायेणाह— **किं तर्हीति**। सिद्धान्ती आह— **प्रत्येकेति**। प्रत्येकविलक्षणमित्युक्ते सदसदात्मकत्वप्रसङ्गात् आर्हतमतानुप्रवेशप्रसङ्गात्। तदर्थमाह— **समुच्चयेति**। समुचयविलक्षणमित्येवोच्यमानेऽपि एकैकस्यापि अनिर्वचनीयत्वप्रसङ्गः स्यात्; अत उक्तम्— **प्रत्येकसमुच्चयाभ्यामिति**। सदसतोरेकतरवैलक्षण्यस्यान्यतरत्वनियमात् उभयवैलक्षण्यं विरुद्धमित्याशङ्कयाह— **न चेति**। कथं तर्हि प्रत्येकसमुच्चयाभ्यां विलक्षणमित्युक्तम् इति तत्राह—

तात्त्विकमभ्युपगच्छामो येन प्रसञ्जयेम विरोधम् । सदसद्वैलक्षण्यवाचोयुक्तिर्हि प्रतियोगिनिरूपणात् यौक्तिकत्वप्रकटनफला, न त्वेवंरूपतायाः सामञ्जस्य-संपादनायेत्यवोचाम । नहि स्वरूपत एवातात्त्विकस्य तात्त्विकत्वं किमपि रूपं संभवति । नो खल्वतात्त्विकस्य सर्पस्य विसर्पणादयः तात्त्विकाः संभवेयुः । अत एवोक्तमाचार्यवाचस्पतिना ब्रह्मतत्त्वसमीक्षायाम् — 'सदसदुभयानुभयादिप्रकारैरनिर्वचनीयत्वमेव ह्यविद्यानामविद्यात्वमिति ॥

प्रमाणं पुनरत्र — विवादपदमनिर्वाच्यम् बाध्यत्वात् । यदुक्त-साध्यं न भवति, न तदुक्तसाधनम्, यथा आत्मा । न तथेदमुक्तसाधनं न भवतीति, तस्मान्नेदं नोक्तसाध्यमिति । विपर्यये तु बाधकमुक्तमेव ॥

एतदेवोपजीव्य प्रतीतिबाधान्यथानुपपत्तिः प्रवृत्तिबाधान्यथानु-

---

निबन्धः ।

विरोधादेवानुपपन्नमित्याशंक्याह — **नचैतादृशमिति** । प्रमाणं पुनः इत्यतः प्राक्तनः स्पष्टार्थः ॥

उक्तेऽर्थे केवलव्यतिरेक्यनुमानं रचयति — **प्रमाणं पुनरित्यादिना** । नाप्रसिद्धविशेषणता केवलव्यतिरेकिणि दूषणमिति निवेदितमन्यत्र । न च बाध्यत्वादिति साध्यसमोऽयं हेत्वाभास इति शङ्कनीयं, सदसदादिवैलक्षण्यलक्षणाभिधानात् । यदापि ज्ञानबाध्यत्वमनिर्वाच्यलक्षणं भवति, तदापि प्रसिद्धत्वाप्रसिद्धत्वोपाधिनाऽवैशिष्ट्य-परिहारः सव्यभिचारित्वादनैकान्तिक इतिवत् । विमतमनिर्वाच्यव्यवहारालंबनमिति प्रयोक्तव्यम् । केवलव्यतिरेक्यनुमानं नैय्यायिकाद्यनुसारेण । प्राचीनमीमांसकाः केवलव्यतिरेक्यनुमानं नानुमन्यन्ते, अर्थापत्तिञ्चानुमन्यन्ते । तान् प्रत्यर्थापत्तिद्वयं अभिधातव्यं विपक्षबाधकं बाधानुपपत्त्यादिकमेवोपजीव्येत्याह — **एतदेवेत्यादिना** ।

संबन्धोक्तिः ।

**सदसद्वैलक्षण्येति** । तत्र हेतुमाह — **नहीति** । तदेव दृष्टान्तेनोपपादयति — **नो खल्विति** । अपसिद्धान्ताशङ्कामभियुक्तवचनेन परिहरति — **अत एवेति** ।

एवं तर्केण शोधिते विषये प्रमाणमाह — **प्रमाणमिति** । विपक्षबाधक-तर्काभावात् अप्रयोजकत्वमाशङ्क्याह — **विपर्ययेत्विति** । व्यतिरेक्यनुमानं अनङ्गी-

पपत्तिश्चेत्यर्थापत्तिद्वयमपि तद्वादिनं प्रत्यभिधातव्यम्। न ह्यत्यन्तासति यथोक्तनीत्या प्रतीतिभेदप्रवृत्ती स्यातां नरविषाणवत्। नापि वस्तुनि सति बाधश्चैतन्यवदिति ॥

भवत्वेवंलक्षणमारोपणीयं तथाप्यस्यानाद्यन्तत्वे सर्वदोपलंभापाता-दबाधापत्तिः। कादाचित्कतायां तु कारणं वाच्यम्। न च प्रध्वंसातिरेकिणः कार्यस्य निमित्तमात्रादुत्पत्तिरित्युपादानमपि किञ्चिदभ्युपेयमिति चेत्; अभ्युपेयतां तर्हि कार्यवशादेव तदनुगुणं सनिमित्तमुपादानम्। निमित्तं तावत् अनादिसन्ततिवाहिनी सविषयस्य विभ्रमस्यैव वासना स्यात्।

---

निबन्धः।

नच ध्वंसातिरेकिण इत्यतः प्राक्तु स्पष्टार्थः ॥

ननु कामलादिदोष एव कारणं प्रसिद्धं, किन्तदन्वेषणेनेत्याशक्याह — **नच ध्वंसातिरेकिण इति**। तर्हि यथा विद्युदादिकार्यदर्शनात्तदनुगुणं कारणं परिकल्प्यते, तथेहापि कल्प्यतामित्याह सिद्धान्ती — **अभ्युपेयतां तर्हीत्यादिना**। किन्तदित्याकांक्षायामाह — **निमित्तं तावदित्यादिना**। न केवलं पूर्ववासनैव निमित्तं, अपरमपि

संबन्धोक्तिः।

कुर्वाणं भाट्टं प्रत्याह -- **एतदेवेति**। अर्थापत्तिमेव स्फुटयति — **नहीति। यथोक्तनीत्येति**। न ह्यसति नरविषाणादौ अपरोक्षावभासः, नापि प्रवृत्तिः इति पूर्वोदितरीत्या इति यावत्। नरविषाणस्यात्यन्तासतोऽपरोक्षतया प्रतीतिर्यथा नास्तीति व्याख्येयं, अन्यथा दृष्टान्तस्य आश्रयहीनत्वप्रसंगात्। प्रतीतिभेदोऽपरोक्षप्रतीतिरिति यावत्। बाधोपजीवनेन अर्थापत्तिप्रकारमाह -- **नापीति** ॥

प्रमाणामविद्याकार्यत्वं दर्शयितुमाशङ्कामुत्थापयति -- **भवत्वेवमिति**। तत्किमारोपितं नित्यमनित्यं वेति विकल्प्य आद्यं दूषयति -- **तथापीति**। प्रतिभासमात्रशरीरत्वात् आरोपितस्य सत्तायां प्रतीतिः स्यादेव इत्यभिप्रेत्य सर्वदोपलम्भप्रसङ्ग इति मन्तव्यम्। द्वितीयपक्षमङ्गीकृत्याह — **कादाचित्कतायामिति**। तथापि पूर्वपूर्वभ्रान्तितत्संस्काराणां सद्भावात् नाविद्यया कृत्यमित्यत आह --**नचेति**। इष्टमेवास्माकमेतदित्याह सिद्धान्ती — **अभ्युपेयतामिति**। किं तर्हि निमित्तमित्यत आह —

अपरमप्यधिष्ठानावभासाद्यन्वयव्यतिरेकानुकारि । उपादानमप्यनिर्वचनीयमेव किञ्चिदनादि कार्यानुगुणं कल्पनीयम् । नहि तावत् सत्यं संभवति । तथात्वे कार्यस्यापि सत्यतापत्तेः, उपादानोपादेययोस्तादात्म्यदर्शनात्, सुवर्णे कुण्डलमितिवत् । अत्यन्तासतो निरस्तसामर्थ्यस्य न कारणतैव संभविनी । दूरे हि तद्विशेष उपादानत्वम् । तस्मादनिर्वचनीयमेव कार्यवत्तदुपादानमपि । तच्चानाद्येव युक्तम् । सादित्वे तत्परंपरापत्तेः । आन्त्यात् कार्यात् अन्वय-

निबन्धः ।

सामान्येनाधिष्ठानावभासकमन्वयव्यतिरेकसमधिगम्यमित्यर्थः ॥

इदानीमुपादानं निर्दिशति — **उपादानमपीत्यादिना** । अनादित्वं विशेषणं प्रपञ्चयति — **तच्चानाद्येव युक्तमित्यादिना** । कारणमपि चेत्सादि स्यात्तदा तत्कारणञ्चान्वेषणीयं, आकांक्षानिवृत्त्यभावात् । अन्त्यकार्यपर्यन्तं अन्वयदर्शनमप्यापद्येत सर्वेषां कारणानाम् । तथाहि — अन्त्ये तावत् कार्ये तत्कारणस्यावश्यमन्वयदर्शनेन भवितव्यम्; यत्कार्येष्वनुगतबुद्धिवेद्यस्यैव सुवर्णादेरुपादानत्वदर्शनात् । तथा

संबन्धोक्तिः ।

**निमित्तमिति** । असतामपि न परोक्षमस्तीत्यत उक्तम् — **अनादिसन्ततीति** । तथापि भ्रमवासनैव किं निमित्तमिति, नेत्याह — **सविषयस्येति** । भ्रमवासनातो भ्रमः विषयवासनातश्च विषय इत्यर्थः। वासनापि न तदाऽस्तीत्यत उक्तम् — **अनादिसिद्धेति** । वासनैव चेन्निमित्तं भ्रमस्य सदा सद्भावः स्यादित्यत आह — **अपरमिति** । आदिशब्देन दोषा गृह्यन्ते । तस्य कारणत्वे मानमाह — **अन्वयव्यतिरेकेति** । अन्वयव्यतिरेकाभ्यां निश्चितव्यमिति यावत् । उपादानमाह — **उपादानमपीति** । अनिर्वचनीयमित्युक्ते पूर्वभ्रान्तेरेव उपादानत्वं स्यात् इत्यत आह — **अनादीति** । अनादीत्येवोक्ते प्रागभावः स्वीकृतः स्यात् इत्यत आह — **अनिर्वचनीयेति** । अनिर्वचनीयत्वमुपपादयति — **न हि तावदिति** । अन्यस्य सत्त्वेन अन्यस्य किमायातमित्यत आह — **उपादानेति** । अस्तु सद्वैलक्षण्यम्, तथाप्यनिर्वचनीयत्वं कुतः इत्यत आह — **अत्यन्तेति** । इदानीमनादित्वमुपपादयति — **तच्चेति** । तत्र हेतुमाह — **सादित्व इति** । **परंपरापत्तेरिति** । अनवस्थापत्तेरित्यर्थः। दूषणान्तरमाह — **आन्त्यादिति** । यद्वा कारणपरम्पराया दोषपर्यवसायितामाह —

दर्शनापत्तेश्च। स्वकार्यानुगतदर्शनस्यैवोपादानत्वात् सुवर्णवत्। तस्मादनाद्यनिर्वचनीयमेव रजताद्युपादानम् ॥

तच्चाधिष्ठानविद्याविरोधादविद्येति गीयते। तदेकार्थतया चाज्ञानमिति। तां च सविलासां विलापयत् अधिष्ठानज्ञानं बाधकमुच्यते। तन्नान्तरीयकसिद्धिरेव त्वभावो नेदं रजतमिति स्वातन्त्र्येणानूद्यत इति रहस्यम्॥

---

निबन्धः।

तत्कारणमपि साद्येव चेत्तर्हि तस्यापि तस्मिन्नेवान्त्ये कार्येऽन्वयो दृश्यते तत्कार्यस्यापि तत्र भावात्तत्कारणस्यापि तत्रैवान्वयो दुर्दर्शनः प्रसज्येतेत्यर्थः। यस्मान्नानिर्वाच्यस्यासदुपादानं संभाव्यते, तस्मादित्युपसंहारः। तत्र भ्रान्तप्रवृत्तिकारणं किमित्याशंक्याह — तच्चेति। एवं तावद्भ्रमं निरूप्य बाधकमपि संक्षेपतो निरूपयति — तां च सविलासामित्यादिना। सकार्यमविद्यां निवर्तयदधिष्ठानयाथार्थ्यज्ञानं बाधकं, तन्निवृत्तिश्च बाध उच्यते अपरोक्षबाधे। परोक्षबाधे तत्प्रतिबद्धस्यातत्त्वांशस्य निषेधमात्रं बाधः इति विभागः। ननु नेदं रूप्यमिति ज्ञानं बाधकं प्रसिद्धं, तत्कथमुच्यतेऽधिष्ठानज्ञानं बाधकमित्याशंक्याह — तन्नान्तरीयकसिद्ध इति। अधिष्ठानज्ञानेनोपादानाविद्यानिवृत्तिनान्तरीयकसिद्धिरेव रजताभावः साक्षिसिद्धोऽनूद्यते — नेदं रजतमिति, न त्विदं बाधकप्रमाणज्ञानमित्यर्थः॥

संबन्धोक्तिः।

भ्रान्त्यादिति। कुत इत्यत आह — स्वकार्येति। एवं विशेषणद्वयमुपपादितमुपसंहरति — तस्मादिति॥

ननु वेदान्तिनामविद्योपादानाः विभ्रमा इत्यत आह — तच्चेति। ननु अज्ञानमपि उपादानमित्यपि क्वचिदुच्यत इत्यत आह — तदेकार्थतयेति। ननु कथमधिष्ठानविद्याविरोधः 'नेदं रजतम्' इत्यभावज्ञानस्यैव बाधकत्वात् इत्यत आह — तां चेति। अभ्रमपूर्वस्यापि शुक्तिज्ञानस्य स्वविषयाविद्यानिवर्तकत्वेन बाधकत्वप्रसक्तिं निवारयति — सविलासामिति। ननु 'नेदं रजतम्' इति ज्ञानस्य स्वातन्त्र्येण बाधकत्वमन्वयव्यतिरेकसिद्धमित्यत आह — तन्नान्तरीयकेति। ननु अधिष्ठानज्ञानोपजीवित्वं अस्याप्रसिद्धमित्यत आह — इति रहस्यमिति। अयं भावः —

**सति चैवं प्रपञ्चोऽपि स्यादविद्याविनिर्मितः ।**
**अविद्यातो विभिन्नत्वे जडत्वाद्रज्जुसर्पवत् ॥**

**जाड्यदृश्यत्वहेतुभ्यां मिथ्यात्वं वा प्रसाध्यताम् ।**
**प्रागुक्त एव दृष्टान्तो मिथ्यात्वं चेह बाध्यता ॥**

**अथ अयं प्रपञ्चः प्रामाणिकः, किं वा न? आद्ये कथमविद्यामयः**

---

निबन्धः ।

उक्तनीत्या रज्जुसर्पाद्युदाहरणस्यानिर्वचनीयाविद्योपादानकत्वे सिद्धे तद्दृष्टान्तबलेन प्रपञ्चस्यापि तत्साधयितुं शक्यत इत्याह — **सति चैवमित्यादिना** । यद्यपि पूर्वोपन्यस्तानुमानबलेन स्वरूपभेदवादिनं प्रति प्रपञ्चमिथ्यात्वमपि सिध्यति, तथापि धर्मभेदवादिनं प्रति न सिध्यति इति तत्प्रतिपादनायायमुद्यम इति द्रष्टव्यम् ॥

विमतं मिथ्या दृश्यत्वाज्जडत्वाद्वा, यदेवं तदेवं, यथा रज्जुसर्पादि, तथा चेदं तस्मात्तथेति वा साध्यतामित्याह द्वितीयश्लोकेन — **जाड्यदृश्यत्वहेतुभ्यामिति** ॥

ननु मिथ्यात्वं किं तुच्छत्वमनिर्वचनीयत्वं वा साध्यते इति मिथ्यात्वानुमाने प्रयुक्ते नैयायिकाः प्रत्यवतिष्ठन्ते — **अथायमित्यादिना** । प्रामाणिकपक्षमभ्युपगम्य

संबन्धोक्तिः ।

धर्मिप्रतियोगिज्ञानपूर्वकत्वात् अभावज्ञानस्य आदित एव धर्म्यादिज्ञानात् भ्रमनिवृत्तौ अभावज्ञानमनुवादकमेव स्यात् इति ॥

एवं प्रपञ्चमिथ्यात्वसाधनाय दृष्टान्तं प्रसाध्य इदानीं तन्मिथ्यात्वं साधयति — **सति चैवमिति** । आत्मन्यनैकान्तिकत्वपरिहाराय जडत्वादित्युक्तम् । अविद्यायां व्यभिचारपरिहारार्थं अविद्यातो विभिन्नत्वे इत्युक्तम् । पूर्वमविद्याकार्यत्वप्रसाधनेन मिथ्यात्वं प्रसाध्य इदानीं मिथ्यात्वं हेतुद्वयेन साधयति — **जाड्येति** । मिथ्यात्वं नाम अनिर्वचनीयत्वम्, असद्रूपत्वं वा? तत्र आद्ये अप्रसिद्धविशेषणत्वम्; द्वितीये चापसिद्धान्त इति शंकां निवर्तयितुं मिथ्यात्वं निर्वक्ति — **मिथ्यात्वमिति** । बाध्यत्वं नाम प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम् । एतच्च शुक्तिरजतसंसर्गे परस्य प्रसिद्धमेवेति नाप्रसिद्धविशेषणतेति मन्तव्यम् ॥

स्यात् । अलीकस्यैव रज्जुसर्पादेस्तथाभावात् । उत्तरस्मिंस्तु कथं नाश्रयासिद्धं साधनमिति ? उच्यते—

प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ।
आश्रित्यायं प्रपञ्चः स्यादलीकोऽपि प्रमाणवान् ॥

अद्वैतागमवाक्यं तु तत्त्वावेदनलक्षणम् ।
प्रमाणभावं भजतां बाधवैधुर्यहेतुतः ॥

---

निबन्धः ।

परिहरति श्लोकेन—**प्रत्यक्षादिप्रमाणानामित्यादिना** । ननु तर्हि प्रमाणत्वाविशेषादागमवाक्यस्यापि व्यावहारिकमेव प्रामाण्यम् । तथाच तद्विषयस्यापि बाधे शून्यतैव तात्त्विकी स्यादित्याशंक्याह श्लोकेन —**अद्वैतागमवाक्यन्त्विति** । कतिपयपुरुषदेशकालाबाध्यार्थविषयं व्यावहारिकं प्रामाण्यं; सर्वदा अबाध्यार्थविषयं तत्त्वावेदकमिति विभागः । केवलचैतन्याज्ञानजार्थविषयं ज्ञानं प्रमाणम् । अन्यावच्छिन्नचेतनाज्ञानजार्थविषयं ज्ञानं भ्रान्तमित्यवान्तरविभागः ॥

ननु यदि प्रत्यक्षादेः व्यावहारिकं प्रामाण्यं भवेत्तदा अलीकोऽपि प्रपञ्चः देहात्मभावादिवत् प्रामाणिक इति कल्पयितुं शक्येत, नतु तदास्ति, तेषां व्यावहारिकत्वे

संबन्धोक्तिः ।

विकल्पपुरस्सरमनुमानं दूषयति— **अथेति** । अप्रामाणिकस्यैव अविद्यामयत्वमिति कुतो निश्चितं इत्याशङ्क्य प्रामाणिकस्यात्मनः तददर्शनात् अप्रामाणिकस्यैव रज्जुसर्पादेः तद्दर्शनाच्चेत्याह— **अलीकस्येति । उत्तरस्मिंस्त्विति** । प्रमाणप्रतीतस्यैव आश्रयत्वदर्शनादित्यर्थः ॥

दोषद्वयमपि समाधत्ते— **उच्यत इति** । तत्त्वावेदकप्रमाणाविषयत्वात् अलीकत्वम्, व्यावहारिकप्रमाणविषयत्वाच्च आश्रयत्वमित्युभयमविरुद्धमित्यर्थः । प्रत्यक्षादीनां प्रसिद्धप्रामाण्यानामपि व्यावहारिकं चेत्प्रामाण्यं तर्हि वेदान्तानामपि प्रमाणत्वाविशेषात् व्यावहारिकमेव प्रामाण्यमित्याशङ्क्याह— **अद्वैतागमेति** । तत्त्वावेदकप्रामाण्याभावे बाधितविषयत्वमुपाधिरित्यर्थः ॥

नन्वबाधितविषयत्वं प्रत्यक्षादीनामपि तुल्यमित्याशङ्क्य बाधाभावग्राहक-

न हि सुशिक्षितोऽपि प्रत्यक्षादिः अत्यन्ताबाध्यार्थपरिच्छेदलक्षण-प्रामाण्यं स्वतः परतो वा विज्ञातुं क्षमते । न हि तावत् प्रत्यक्षेणैव वेदनेन स्वप्रामाण्यमीदृक् विज्ञायते । परवेदनपक्षे हि तत् स्वात्मानमप्यगोचरयत् कथं स्वप्रामाण्यं गोचरयेत् ? स्वसंवेदनपक्षेऽपि स्वार्थस्यात्यन्तिकबाधमनवगम्य तु

---

निबन्धः ।

प्रमाणाभावादित्याशंक्याह — नहि सुशिक्षितोऽपीति । प्रत्यक्षादेः सर्वथा अबाध्यार्थ-बोधकत्वलक्षणं तत्वावेदकत्वं नाम प्रामाण्यम् । स्वतः इति । तेनैव प्रत्यक्षादिना । परतो वेति । प्रमाणान्तरेण वा नहि कश्चित्सुनिपुणोऽपि ज्ञातुं शक्नोति । अतस्तत्वा-वेदनसिध्यनुपपत्तिरेव व्यावहारिकत्वे प्रमाणमिति भावः । कथं न शक्यत इत्याकांक्षा-यामाह — नहि तावदिति । ईदृगत्यन्ताबाध्यार्थपरिच्छेदक्षणं स्वस्य प्रामाण्यं प्रत्यक्षेणैव संवेदनेनावगन्तुं न शक्यमित्युक्तम्। कुत इत्याकांक्षायां वक्तव्यं— तत्किं वेदनान्तरवेद्यं स्वसंवेद्यं वेति। तत्राद्यं प्रत्याह — परवेदनपक्षे हीति । स्वग्रहणमन्तरेण स्वविशेषित-प्रामाण्यग्रहणानुपपत्तेरित्यर्थः । द्वितीयं प्रत्याह— स्वसंवेदनपक्षेऽपीति । स्वविषयस्या-त्यन्तिकबाधाभावमनिश्चिन्वत्कथं तद्विशेषितं स्वस्य प्रामाण्यं प्रत्यक्षं निश्चिनुयात् ? न

संबन्धोक्तिः ।

प्रमाणासंभवात् मैवमित्याह — न हीति । वर्तमानबाधाभावो यद्यपि योग्यानुपलम्भात् सिद्धयति, तथाप्यागामिबाधाभावो नाध्यवसातुं शक्यत इत्यभिप्रेत्याह — अत्यन्तेति । कथमित्याशङ्कायां किं प्रत्यक्षादीनां प्रामाण्यं प्रत्यक्षादिभिरेवावगम्यते, किंवा प्रमा-णान्तरात् इति विकल्प्य नोभयमपि संभवतीत्यभिप्रेत्याह — स्वतः परतो वेति । आद्ये विकल्पे संवेदनं किं अस्वसंवेद्यमुत स्वसंवेद्यमिति विकल्प्य प्रथमं दूषयति — न हि तावदिति । स्वात्मानमप्यगोचरयदिति । विशिष्टग्रहणस्य विशेषणग्रहण-पूर्वकत्वात् स्वाग्रहणे तद्विशिष्टं प्रामाण्यमपि न सिध्यतीत्यर्थः । द्वितीयं पक्षं दूषयति — स्वसंवेदनपक्ष इति । तदुपहिता तेन अत्यन्तबाधेनोपहिता मर्यादा सीमा यस्य प्रामाण्यस्य तत्तथोक्तम् । प्रत्युत्पन्नसामग्रीजन्यं हि ज्ञानमबाधितविषयं सत् प्रमाणमिति प्रमाणविदो वर्णयन्ति । उक्तं हि —

'तस्माद्दृढं यदुत्पन्नं न विसंवादमृच्छति ।
ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम् ॥'

**कथं तदुपहितमर्यादात्मनः प्रामाण्यमध्यवस्येत् । न च स्वार्थस्य आत्यन्तिकबाधासत्त्वं अस्मत्प्रत्यक्षगम्यं संभवति । कालान्तरभाविनो बाधस्येदानीमयोग्यत्वेनानुपलम्भसंभवात् । परमपि प्रत्यक्षान्तरं चेदाद्यसमानयोगक्षेमं कथमत्र प्रवर्तताम् । यदा तु प्रत्यक्षस्यैवैतादृशी गतिः तदा कैव तद्गोचरव्याप्त्युपजीविनो वराकस्यानुमानादेः ॥**

---

निबन्धः ।

कथञ्चित्, 'नागृहीतविशेषणा विशिष्टे बुद्धिः' इति न्यायादित्यर्थः ॥

ननु स्वार्थस्यात्यन्तिकबाधाभावग्रहणमन्तरेण तद्विशेषितं स्वप्रामाण्यं यद्यवगन्तुं न शक्यते, तर्हि स्वार्थस्यात्यन्तिकबाधाभावमपि प्रत्यक्षमेव ग्रहीष्यतीत्याशंक्याह — **न च स्वार्थस्येति** । प्रत्यक्षस्य वर्तमानसंबन्धग्राहकत्वनियमान्न कालान्तरभावी बाधाभावो ग्राह्य इत्यर्थः । तस्मात्प्रत्यक्षेणैव स्वप्रामाण्यमीदृशमवगन्तुं न शक्यते इति स्थितम् । यच्चोक्तं परतोऽप्यवगन्तुं न शक्यत इति तत्प्रपञ्चयति — **परमपीत्यादिना** । यत्प्रमाणान्तरं प्रत्यक्षादेरात्यन्तिकाबाध्यार्थपरिच्छेदकत्वसाधनं तत्प्रत्यक्षमेवानुमानादिर्वा ? प्रत्यक्षञ्चेत्तदपि प्रथमप्रत्यक्षवत् वर्तमानमात्रग्राहकं कथमत्रात्यन्ताबाध्यार्थपरिच्छेदकत्वग्रहणे वर्तताम् ; न कथंचित् इत्यर्थः । अनुमानादिकं तु सुदूरपराहतमित्याह — **यदा त्विति** ॥

पूर्वं परतः प्रामाण्यमङ्गीकृत्य प्रमाणान्तरेणापि प्रत्यक्षादेरत्यन्ताबाध्यार्थपरिच्छेदलक्षणं प्रामाण्यमवगन्तुं न शक्यते इत्युक्तमिदानीं तदपि न संभवति इत्याह

संबन्धोक्तिः ।

इति । अवसीयतां तर्हि तदवसानपूर्वकमेव प्रामाण्यमिति, तत्राह — **नचेति** । कालत्रयावच्छिन्नवस्तुग्राहकयोगिप्रत्यक्षव्यवच्छेदार्थमस्मद्ग्रहणम् । नन्वस्ति चेत् उपलभ्येत; नोपलभ्यते चेत् असन्नेव इत्यत आह — **कालान्तरेति** । प्रामाण्यं परवेद्यमिति मते दूषणमाह — **परमपीति** । **आद्यसमानेति** । तदपि प्रत्यक्षत्वादेवावर्तमानग्राहकं न भवतीत्यर्थः । तर्हि अनुमानादिभिरेवात्यन्ताबाधो गृह्यतामिति, तत्राह — **यदा त्विति** । अबाधितविषयत्वं यदा प्रत्यक्षेणावगन्तुं न शक्यते तदा तत्सिद्धव्याप्त्याद्युपजीविनोऽनुमानादेस्तद्ग्राहकत्वं न संभवति, व्याप्तिग्राहकप्रत्यक्षस्याबाधितविषयत्वासिद्धेरित्यर्थः ॥

परतश्च प्रमाणत्वपरिज्ञानेऽनवस्थितेः ।
परिहारं प्रयत्नेऽपि न पश्यामः सभाक्षमम् ॥

---

निबन्धः ।

श्लोकेन — **परतश्चेति** । प्रत्यक्षस्य प्रामाण्यं परतश्चेत् ज्ञायते तदा परस्याप्यनिश्चितप्रामाण्यस्य निश्चायकत्वासंभवात् प्रागेव तस्य प्रामाण्यमवगन्तव्यं, तदपि परत एवेत्यनवस्थायां पूर्वप्रत्यक्षप्रामाण्यानवगमे उत्तरोत्तरप्रामाण्यानवगमाद्व्यवहारभङ्गप्रसङ्गो मूलक्षय इति भावः । यच्चोच्यते—न ज्ञानमप्रकाशकमिष्यते तस्यैवार्थप्रकाशकत्वात् । ज्ञानमगृहीतमेव विषयप्रकाशः विषयकर्मकारकतयोत्पद्यमानत्वात् । यदा च तत्प्रामाण्याप्रामाण्ययोः संशयः तदा संवादकबाधकाभ्यां प्रमाणमप्रमाणमिति वा ज्ञायते न नियमेन इत्यनवस्थाभाव इति — **तदसत्** । विज्ञानोदयसमनन्तरमेव विज्ञातो मयाऽयमर्थ इति विशिष्टसंवेदनासंभवप्रसङ्गात्, नो खलु अविज्ञाते विशेषणे विशिष्टनिश्चयो दृष्टः । नवाऽनन्तरं कश्चित्सन्दिग्धे — विज्ञातोऽयं मया नवेति । तस्माद्विज्ञानं गृहीतमेवार्थप्रकाशादिव्यवहारानिर्वर्तकं प्रायो विज्ञातो मयाऽयमर्थ इति व्यवहारो विशेषणग्रहणपूर्वकः, विशिष्टव्यवहारत्वात्, य एवं स एवं यथा दण्डीति व्यवहारः, तथा चायं, तस्मात्तथा इति । विज्ञानं प्रकाशमानमेवार्थं प्रकाशयति, साक्षात् प्रकाशकत्वात्, यदेवं तदेवं, यथा प्रदीपः, तथा चेदम्,

संबन्धोक्तिः ।

पक्ष एवायमनुपपन्न इत्याह — **परतश्चेति** । मूलक्षतेरभाव एव परिहार इत्यत आह — **सभाक्षममिति** । अयं भावः — प्रथमस्य ज्ञानस्यानिश्चयात्मकत्वात् द्वितीयं संवादज्ञानमर्थक्रियाज्ञानं वाऽपेक्ष्येत; तथा सति तथाभूतं ज्ञानमभ्युपेयम्, तत्रापि प्रथमज्ञान इव शङ्काया निरङ्कुशप्रसरत्वात् । एवं सति उत्तरोत्तरज्ञानप्रामाण्यनिश्चयाधीनः पूर्वपूर्वज्ञानप्रामाण्यनिश्चय इति एकस्यापि ज्ञानस्य प्रामाण्यनिश्चयाय अनन्तानि ज्ञानानि युगपदपेक्षणीयानीति मूलक्षतिः । अथ एतद्दोषपरिजिहीर्षया अव्यभिचारिलिङ्गसमुत्थस्यानुमानस्यानुव्यवसायस्य वा स्वत एव व्यवहारजनकस्य प्रामाण्यं स्वत एवेष्यते तदा तथैवाद्यस्याप्यङ्गीकरणीयम् । उक्तं हि —

"कस्यचित्तु यदीष्येत स्वत एव प्रमाणता ।
प्रथमस्य तथाभावे प्रद्वेषः किंनिबन्धनः ॥" इति ॥

निबन्धः ।

तस्मात्तथेति च । न प्रकाशत्वात् प्रकाशकत्वमसिद्धमिति मन्तव्यम् । अज्ञाननिवर्तकत्वेनोपपत्तेः । यथा प्रदीपस्य तमोनिवर्तकत्वेन न चक्षुस्साम्यं फलत्वादेव । किंच संवादकादपि प्रमाणत्वेन प्रागेवानवगतादनादिवाक्यवन्नार्थाश्वासः । तस्यापि तत्प्रथमत एवान्यतोऽवगन्तव्यमस्यापि तथेति कथं नानवस्था ? ॥

ननु संवादकमन्तरेण स्वत एव प्रामाण्यं यदि परिच्छिद्येत तदा सम्यग्ज्ञानोत्पत्तिसमयमेव तत्प्रामाण्यपरिच्छेदात् किमिदं प्रमाणमाहोस्वित् अप्रमाणमिति संशयो न स्यात् ; भवति च । तस्माज्ज्ञप्तौ परतस्त्वमिति । नायं दोषः । स्वस्य ज्ञानोदयसमनन्तरमेव यदा कारणान्तराद्विरोधिज्ञानान्तरसन्निपातो भवति, तदा संशयस्यापि संभवात् संवादेन च प्रामाण्यनिश्चयात् प्रतिबन्धकसंशयादिमलविगम एव क्रियते, नतु प्रामाण्यनिश्चयः । स तु स्वयमेव निश्चायकः । प्रयोगः— सम्यग्ज्ञानं प्रमाणान्तरवेद्यं वेद्यत्वाद्यदेवं तदेवं, यथा घटादीति । सोऽप्यसंबन्धः, स्वप्नादिवेद्ये व्यभिचारात् सत्वादिति प्रयोगे संविद्रूपत्वमुपाधिस्तस्मात् ज्ञप्तौ स्वतस्त्वमास्थेयम् ॥

इदानीमुत्पत्तावपि स्वतस्त्वसिद्धये प्रयुज्यते — प्रामाण्यं ज्ञानकारणमात्रजन्यवृत्तिनिष्ठं अप्रामाण्येतरत्वे सति ज्ञानैकधर्मत्वाद्यदेवं तदेवम् यथा ज्ञानत्वं तथाचेदं तस्मात्तथेति। स्वतस्त्वञ्चैतदेव यत् ज्ञानकारणमात्राधीनत्वम् । यच्चेदमनुमानं प्रमाणज्ञानं सत् मिथ्याबोधसाधारणकारणातिरिक्तकारणजन्यं अनित्यज्ञानत्वाद्यदेवं तदेवं यथा प्रमाणज्ञानमिति । तदसत् । अर्थापत्तिविरोधात् । तथाहि — यद्यतिरिक्तकारणजन्यत्वं तदा सम्यग्ज्ञानस्येन्द्रियार्थसन्निकर्षमात्रान्वयव्यतिरेकानुविधायित्वं न स्याद्विद्यते च । अतः तदन्यथानुपपत्त्या तावन्मात्रजन्यत्वं तस्याधिगम्यत इति । ननु सम्यग्ज्ञानस्य दोषासहचरितेन्द्रियार्थभावाभावानुविधायित्वेन इन्द्रियार्थसन्निकर्षमात्रान्वयव्यतिरेकानुविधायित्वं असिद्धं; न, दोषस्य सहकारित्वे प्रमाणाभावात् । निरात्मकान्न सात्मकस्य सम्यग्ज्ञानस्योदयः संभवति । कथन्तर्हि अनुपलंभादभावज्ञानोदयः, न कथंचित् । न ह्यनाद्यनन्तस्योपलम्भस्याभावो नामास्त्यस्माकं अनाद्यनिर्वाच्याविद्यां विना, किन्त्वदोषकरणम् प्रागभावप्रध्वंसाभावेतरेतराभावानामेकस्य तावन्न सम्यग्ज्ञानकारणत्वं, व्यभिचारात्। सर्वेषां च कारणत्वकल्पनायां गौरवम् । तस्माद्दोषाभावोपलक्षितार्थेन्द्रियसंप्रयोगमात्रजन्यत्वावगमात्तावत्येवार्थापत्तिविरोधः ॥

**आगमवाक्यं पुनः अनियतकालवस्तुपरिच्छेदकत्वात् आत्य-**

---

निबन्धः ।

**यच्चोद्यते**—अर्थापत्तेरविनाभावबलेनार्थावबोधकत्वं धूमादिवत् । अनुमानं च नानुमानान्तरबाधकम् । तथाहि — किं समानबलयोरनुमानयोर्विरोधः किं वा असमानबलयोः? आद्ये किं कस्य बाधकमिति निश्चयो न स्यात् । द्वितीये तु यत्कृतमन्यतरासमानबलत्वं तदेवास्तु, किं प्रत्यनुमानविरोधेन । अथ प्रतिपक्षहेतुसद्भावे सति न प्रकृतहेतोः निर्णयजनकत्वं, किन्तु संशयोत्पादकत्वमेव इति; तत् संशयस्य विरुद्धोभयविशेषस्मृतिहेतुत्वेन विरुद्धानुमानद्वयसन्निपाते प्रादुर्भावाभावात् इति ।

**तदप्यनुचितम्** । अर्थापत्तेरविनाभावबलेनावबोधकत्वाभावात् किन्त्वनुपपत्तिमात्रबलेन । तथाहि — यथा महानसादौ वह्निधूमयोरविनाभावं गृहीत्वाऽध्व-महीधरादिदेशेषु धूममुपलभमानस्य पक्षादिप्रविभागपुरस्सरमनुमानमुदेति, न तथा स्फोटादिकार्यस्य पूर्वं प्रत्यक्षेणाविनाभावोऽवगम्यते, शक्तेरतीन्द्रियत्वात् । सा चान्यत्र साधितेति नेह यत्यते संग्रहाधिकारात् ॥

ननु अनुपपत्त्यविनाभावशब्दयोः पर्यायतैव । तथा निरुपाध्युपलंभस्य चक्षुरादिकमन्तरेण कथमनुपपत्तिर्भवतु । तस्य करणव्यापारानिरपेक्षत्वमित्यस्माभिः पर्यनुयुक्तैरर्थापत्तिवादिभिरभिधेयम् — सर्वापि क्रिया करणपूर्विकोपलब्धा, यथा च्छिदादिक्रिया । तथाच रूपाद्युपलब्धिः क्रिया । तस्मान्नान्तरेण करणव्यापारं भवितुमर्हतीति । यद्येवं तदा अन्यथानुपपत्तिशब्दस्याविनाभाव एवार्थो व्यावर्तकाभावादिति । एतदप्यसारम् । अनुपपत्तिसमर्थने हेतुत्वेन सामान्यव्याप्तेरभिधानात् । नच हेतुहेतुमदभिधानयोः पर्यायत्वं मन्येथाः । तस्मात् सामग्रीभेदान्नार्थापत्तिरनुमानमिति सूक्तमर्थापत्तिविरुद्धत्वमिति । **यच्चोक्तं** नानुमानस्यानुमानान्तरेण विरोध इति तदत्यन्तानुचितं, तथा सति परमाणूनां मूर्तत्वेन अनित्यत्वानुमानस्यापि नित्यत्वानुमानेनाबाधप्रसङ्गात् । तस्मादनुमानयोरपि समानबलयोः विरोधे द्वयोरपि अनिश्चायकत्वं; बलवता दुर्बलस्य बाध एव इत्यलम् ॥

संबन्धोक्तिः ।

तर्हि वेदान्तानां तत्त्वावेदकप्रामाण्यं न सिध्यति कथितन्यायेन तत्राप्यत्यन्त-बाधाभावस्य ग्रहीतुमशक्यत्वात् इत्यत आह—**आगमवाक्यमिति । अनियतकालेति ।**

न्तिकाबाध्यत्वलक्षणमपि सत्यत्वं स्वविषयस्याध्यवस्येत् । तदवसायान्वय-व्यतिरेकाभ्यां च तत्साधनत्वलक्षणं प्रामाण्यमध्यवसीयते । तथा च श्रूयते 'सत्यं ज्ञानमनन्तं ब्रह्म' इति । तस्मादद्वैतागमवाक्यमेव तत्त्वावेदनं प्रमाणमुपपद्यते न प्रत्यक्षादीनीति स्थितम् ॥

एतेन धर्मिग्राहकप्रमाणबाधः प्रकृतस्य परास्त एव । सांव्यवहारिकस्य सत्यत्वस्य तेन सिद्धेः, तस्य च शरीरात्मभाव इवालीकत्वेना-

---

निबन्धः ।

आगमवाक्यमपि प्रमाणत्वाविशेषात् प्रत्यक्षस्यार्थस्यात्यन्ताबाध्यत्वमवसातुं न शक्नोतीति न तस्यापि तत्वावेदनलक्षणं प्रामाण्यं संभवतीत्याशङ्कयाह — **आगमवाक्यं पुनरित्यादिना** । प्रत्यक्षवत् न नियतकालं वस्त्वागमेन परिच्छिद्यते, येन कालान्तरवर्तिबाधाभावो न गृह्येतेत्यर्थः । तर्हि तस्यात्यन्तिकाबाध्यार्थपरिच्छित्तिसाधनत्वं विद्यत इति कुतोऽवसीयत इत्याशंक्याह — **तदवसायेति** । यथा गोशब्दस्य श्रवणे गवार्थप्रतीतेस्तदभावे त्वप्रतीतेरन्वयव्यतिरेकाभ्यां गोशब्दस्य तज्ज्ञानसाधनत्वमवसीयते, तथा आगमवाक्यावगमे सत्येवात्यन्ताबाध्यार्थस्य ब्रह्मणः प्रतिपत्तिर्भवति, तदभावे तु न भवतीत्यन्वयव्यतिरेकाभ्यां तस्यात्यन्ताबाध्यार्थप्रतिपत्तिसाधनत्वमवगम्यते इति। किंचागमवाक्यस्य सत्यत्वश्रवणात्तद्विषयस्य उपपद्यत एव तत्वावेदकत्वमित्याह — **तथाच श्रूयत इति** । न चेदमापेक्षिकं सत्यत्वं संकोचकाभावात् । प्रकृतं निगमयति— **तस्मादिति** ॥

संबन्धोक्तिः ।

कालत्रयवर्तिवस्तुपरिच्छेदकत्वादिति यावत् । तथा चोक्तम् 'चोदना हि भूतं भवन्तं भविष्यन्तम्' इत्यादि। सूक्ष्मं व्यवहितं विप्रकृष्टमेवंजातीयकमर्थं शक्नोत्येवानुभवितुमिति च । भवतु तर्हि, तथापि कथं तत्त्वावेदकप्रामाण्यनिश्चय इत्यत आह — **तदवसायेति** । आगमवाक्येन सह तदवसायस्य अबाधितवस्तुविषयावसायस्य यावन्वयव्यतिरेकौ ताभ्यामागमस्य तत्साधनत्वमत्यन्ताबाधितार्थाध्यवसायसाधनत्वलक्षणं प्रामाण्यमध्यवसीयेतेत्यर्थः । अथवा तदवसाय तं निश्चित्य विषयसत्यत्वं विज्ञाय तादृग्विषयपरिच्छेदजनकत्वमागमस्य अन्वयव्यतिरेकाभ्यां निश्चीयत इत्यर्थः । कथं कालत्रयाबाधितत्वलक्षणं सत्यत्वं ब्रह्मणः श्रुत्या दर्शितमित्यत आह — **तथा चेति** । **सत्यमिति**। सर्वप्रकारबाधायोग्यमिति यावत् । प्रकृतमुपसंहरति — **तस्मादिति** ॥

विरोधात् । यत्पुनः अप्रामाणिकत्वे प्रपञ्चस्य कथं नाश्रयासिद्धं साधनमिति । तदप्यसत् । प्रसिद्धिमात्रेणाप्याश्रयत्वे बाधकादर्शनात् । नैवंभूत आश्रयः प्रमाणशून्यत्वात् नरविषाणवत् इति बाधकमिति चेन्न । एतदेव हेतुं प्रति आश्रयत्वानाश्रयत्वयोः प्रकृताबाधात् । यदि तु एवंभूतमेव प्रमाणशून्यत्वं भवदीयं हेतुं प्रत्याश्रयः कथमस्मदीयं प्रति न भवेदविशेषात् । अथ भवदीयं प्रत्यपि नाश्रयः तर्हि तस्याश्रयासिद्धत्वात् असाधनत्वे कथं प्रकृतबाधकतेति । एतेनोदाहरणेऽप्याश्रयहानिशङ्का निरस्ता त्वदुदाहरणसाम्यादिति सर्वं सुस्थितम् ॥

तथापीदमुच्यताम् — किमिदं जडत्वं नाम हेतूकृतं किं वा दृश्यत्वमिति ? उच्यते । जडत्वं नाम अनात्मप्रकाशत्वं असंविद्रूपत्वं वा

---

निबन्धः ।

भवत्वेवं प्रत्यक्षादेः व्यावहारिकं प्रामाण्यं, ततः प्रकृतानुमाने किं परिहृतमित्याशङ्क्याह — एतेनेति । यथा शरीरात्मभावे व्यावहारिकसत्यत्वस्य मिथ्यात्वेन सह विरोधो नास्ति, यथा वा देहव्यतिरिक्तात्मानुमानस्य सांव्यवहारिकप्रामाण्येन मनुष्योऽहमिति प्रत्यक्षेण न बाधः तद्वदित्यर्थः । यत्पुनरित्यादिः स्पष्टार्थः । एतेनेति । प्रतिबिम्बादिवदप्रामाणिकस्यापि प्रतीतिमात्रेणाश्रयतोपपादनेन उदाहरणं प्रामाणिकञ्चेत्साध्यवैकल्यं, अप्रामाणिकञ्चेदाश्रयहानिरितीयमपि शङ्का निरस्ता भवतीत्यर्थः । अथाप्रामाणिकं नोदाहरणमप्रामाणिकत्वात् नरविषाणवदिति तत्राह — त्वदुदाहरणसाम्यादिति ॥

इदानीं हेत्वर्थं पृच्छति अव्यभिचारितया । तथापीदमुच्यतामित्यत्र हेतुत्वेनो-

संबन्धोक्तिः ।

दूषणान्तरोद्धारेऽपि उक्तन्यायमतिदिशति — एतेनेति । तथापि सत्यं चेत् कथमलीकमित्यत आह — तस्य चेति । मा भूत् धर्मिग्राहकप्रमाणबाधः, तथाप्याश्रयासिद्धिः नोद्धृतेति, तत्राह — यत्पुनरिति । उक्तमर्थं विवृणोति — यदिति । उक्तं न्यायं दृष्टान्तस्याश्रयहीनतापरिहारेऽप्यतिदिशति — एतेनेति ॥

जडत्वदृश्यत्वहेत्वोः अभिन्नत्वाभिप्रायेण पृच्छति — तथापीति जड इति अन्तर्भावितनञर्थोऽभाव उच्यते, दृश्य इति भावमात्रमिति अस्त्येव भेद इति

**पर्युदासात्मकम् । दृश्यत्वं तु स्वव्यवहारे स्वातिरेकिस्वदर्शनापेक्षानियतिर्विधिमात्रमिति विवेकः । हन्त ! एवमात्मन्यपि प्रकृतहेतुप्रवृत्तावनैकान्तिकत्वं स्यात् । मैवम् । तस्य स्वप्रकाशत्वात् संविद्रूपत्वाच्च । अत एव तृतीयाप्रसक्तेः । कुतः स्वप्रकाशत्वमिति चेत् ? 'अत्रायं पुरुषः स्वयंज्योतिर्भवति' इति श्रुतेः ॥**

---

## निबन्धः ।

पात्तो हेतुरुक्तः । उत्तरमाह — **उच्यत इति** । पर्युदासात्मकमित्यब्राह्मणत्वादिवदन्यव्यावृत्त्यात्मकं जडत्वमित्यर्थः । दृश्यत्वं व्याचष्टे — **दृश्यत्वं तु इत्यादिना** । अपेक्षानियतिः दृश्यत्वमित्युक्ते स्वप्रकाशस्यापि व्यञ्जकापेक्षानियमोऽस्त्येव स्वव्यवहारे; तदर्थमुक्तं स्वदर्शनपदं । तथापि स्वरूपभूतस्फुरणापेक्षाऽस्त्येवेति स्वातिरेकिग्रहणम् । तथाऽऽत्मनस्सोपाधिकव्यवहारे स्वदर्शनापेक्षाऽस्तीति तदर्थमुक्तं स्वव्यवहार इति । **विधिमात्रमिति** । केवलविधिरूपं तन्निषेधात्मकमिति विभागो जडत्वदृश्यत्वयोः धर्मयोरित्यर्थः । इदानीं पूर्वपक्षवादी स्वाभिप्रायं प्रकटयति — **हन्तैवमित्यादिना** । परिहरति — **मैवमिति** । असिद्धविरुद्धापेक्षया तृतीयस्यानेकान्तिकस्य प्रसक्तिर्नास्तीत्यर्थः । तस्य स्वप्रकाशत्वे प्रमाणाभावं मत्वा — **कुत इति** । आगमादित्याह— **अत्रायमिति** ॥

## संबन्धोक्तिः ।

परिहरति — **उच्यत इति** । केचित् ज्ञानस्यापि अनात्मप्रकाशत्वमिच्छन्ति; तद्व्यावृत्त्यर्थमाह — **असंविद्रूपत्वमिति** । दृश्यत्वाद्विशेषमाह — **पर्युदासेति** । इदानीं दृश्यत्वं निर्वक्ति — **दृश्यत्वं त्विति** । स्वव्यवहारे दर्शनापेक्षानियतिः स्वप्रकाशेऽप्यस्ति; अतो विशिनष्टि — **स्वातिरेकीति** । विशिष्टात्मव्यवहृतौ प्रमाणान्तरापेक्षायां स्वरूपव्यवहारोऽपि तदधीनो भवति कदाचित्; तद्व्यावर्तयति — **नियतिरिति** । विधिमात्रं भावमात्रमिति यावत् । शङ्कते — **हन्तेति** । तत्र तावत् जडत्वमसिद्धं, अनात्मप्रकाशत्वस्य असंविद्रूपत्वस्य च जडत्वस्यात्मनि स्वयंप्रकाशे संविद्रूपे च असंभवात् इत्याह — **मैवमिति** । दृश्यत्वहेतुरप्यसिद्ध इत्याह — **तत एवेति** । यद्यपि जडत्वं दृश्यत्वापेक्षया द्वितीयं, तथापि जडत्वस्य द्विधा निरुक्तत्वात् तृतीयाप्रसक्तेरित्युक्तम् । जडत्वहेतोः विपक्षवृत्तितापरिहाराय आत्मनः स्वयंप्रकाशत्वमुक्तम् । तत्र प्रमाणं पृच्छति — **कुत इति** । श्रुतिं तावत् प्रमाणयति— **अत्रेति** । पूर्वानुभवजनितवासनावासितस्यान्तःकरणस्य स्वप्ने कर्मत्वेनैवोपक्षयात् बहि-

## निबन्धः ।

नन्वन्यार्थोऽयमागमः; तथाहि — यदाऽयमात्मा सर्वपदार्थेभ्यो व्यावृत्तमात्मानं प्रतिपद्यते, तदा स्वयमेव सकलबाह्यविषयव्यासङ्गनिरोधिनोपायकलापेन स्वप्रतिपत्तिहेतुत्वाज्ज्योतिरिव ज्योतिरुपचर्यते । न तत्सारम् । स्वयमिति विशेषणेन ज्योतिष्ट्वस्यैव विशेष्यत्वप्रतीतेः । मुख्यार्थपरिग्रहे बाधकादर्शनादुपचारकल्पनायोगाच्च । नन्वहंप्रत्ययग्राह्यं प्रत्यक्षविरोधादिनोपचर्यते कथंचिदुपचारः कल्प्यते । न, भिन्नविषयत्वादहंकारसाक्षिण एव स्वप्रकाशताभिधानात् । ननु प्रमाणान्तरवेद्यः आत्मा वेद्यत्वात् पटवदित्यनुमानविरोधादुपचारः, न, भ्रान्तिवेद्ये व्यभिचारात् , अन्यतरासिद्धत्वाच्च वस्तुत्वादिति प्रयोगेऽनात्मत्वमुपाधिः, साधनवैकल्यञ्च । तस्मात् प्रमाणान्तरविरोधाभावान्नोपचारः ॥

ननु स्वप्रकाश इति कोऽर्थः ? किं स्वयमेव स्वस्य प्रकाशो ज्ञानं, उत स्वयमेव स्वात्मानं प्रकाशयति, किंवा स्वयमेव प्रकाशो ज्ञानमात्रम् ? न तावदाद्यः, प्रमाणप्रमेययोः भेदेनैव व्याप्तत्वात् । मदमूर्च्छादिदशास्वविशेषप्रसङ्गाच्च । नापि द्वितीयः, प्रमाणमन्तरेण केवलस्य प्रमेयस्य प्रमाजनकत्वानुपलब्धेः । नापि तृतीयः, तत्सद्भावे प्रमाणासंभवेनासिद्धिप्रसङ्गात् । प्रमाणमन्तरेणापि सिद्धौ खपुष्पस्यापि सिद्धिप्रसङ्गः । **अत्रोच्यते** । स्वयंसंवित्तिनिरपेक्षः प्रकाशो यस्येति स्वप्रकाशः । इतरथा सुषुप्तिसिध्यनुपपत्तेरेतावन्तं कालं सुखमहमस्वाप्समिति परामर्शात् । फलासंभवप्रसङ्गात् औपाधिकसंविदभावेन च मूर्च्छादिव्यवस्थोपपत्तेः । **यच्चोक्तं** प्रमाणाभावे खपुष्पसाम्यमिति, **तदसत्**, प्रमाणग्राह्यताया एव सत्वपदावेदनीयत्वात् । सति प्रमाणप्रवृत्तेः अन्यथाऽन्योन्यसंश्रयात् — सत्वे सिद्धे प्रमाणप्रवृत्तिः, प्रवृत्ते च प्रमाणे सत्वसिद्धिरिति । तस्मान्न प्रमाणाभावमात्रेणासत्वं वस्तुनः स्वभावत्वात् सत्तायाः ॥

ननु तथापि स्वप्रकाशकत्वबोधकागमस्य आत्मा चेद्विषयः कथं ? अस्वप्रकाशत्वे वा कथमागमगम्यः ? स्वरूपेण स्वप्रकाशत्वेऽप्यौपाधिकव्यवहारे तन्निमित्तं

## संबन्धोक्तिः ।

रिन्द्रियाणामुपरतत्वात् करणान्तरस्य चाभावात् आत्मनः स्वयंज्योतिष्ट्ववचनात् स्वप्रकाशत्वमवसीयते । साधनाधीनज्योतिष्ट्वे पुनः अत्रेति विशेषणमनर्थकं स्यात् । जाग्रदवस्थायामपि तत्संभवादित्यर्थः ॥

किञ्च अस्ति तावत् ममेदमनुकूलं इदं प्रतिकूलमिति च ज्ञानं, यद्वशादनुकूले प्रवृत्तिः प्रतिकूलाच्च निवृत्तिः। तच्चेदमवच्छेदकप्रकाशाधीनं अवच्छिन्नप्रकाशत्वात् दण्डिप्रकाशवत्। अवच्छेदकश्चायमात्मा न स्वाश्रयव्याप्यो भवितुमुत्सहते, वस्तुत्वादसिधारावत्। नहि असिधारयैवासिधारा छिद्यते। विषयसंवेदनादेव तदाश्रयः सोऽपि सिध्यतीति चेन्मैवम्। संवेदिता

---

निबन्धः।

प्रमाणापेक्षणात् आगमवेद्यत्ववन्न विरुध्यते। तथाहि —— प्रकाशभेदाभावोपाधिकं रूपमात्मनस्स्वप्रकाशत्वबोधकेनागमेनावेद्यत इति वक्ष्यते ॥

इदानीं श्रुत्यनुग्राहकं च दर्शयितुं पातनिकां करोति—— **किंचास्ति तावदित्यादिना**। ततः किमित्यत्राह—— **तच्चेदमिति**। अनयोर्विशिष्टप्रकाशः विशेषणप्रकाशाधीनो यथा दण्डीति प्रकाश इति व्याप्तिबलेन ममेदमनुकूलमित्यस्यापि ज्ञानस्य विशिष्टप्रकाशत्वाद्विशेषणभूतात्मप्रकाशाधीनत्वमात्रं सिध्यति; नतु विशेषणभूतात्मप्रकाशस्यापि स्वतस्त्वमित्याशङ्क्य परिशेषात्सिध्यतीत्याह——**अवच्छेदकश्चायमित्यादिना**। अनुकूलत्वमित्युक्ते कस्येत्याकाङ्क्षायां ममेत्यात्मावच्छेदकं विशेषणभूतः प्रतीयते। स्वस्य आश्रयज्ञानलक्षणाद्व्याप्तिस्तया व्याप्यः तस्य विषयो भवितुं नार्हति इत्यर्थः। माभून्मानसप्रत्यक्षगम्यः आत्मा, युगपदेकस्यां क्रियायां कर्तृत्वकर्मत्वविरोधात्, तथापि विषयसंविदधीनसिद्धिको भविष्यति इत्याह **प्राभाकरः — विषयसंवेदनादेवेति**। परिहरति— **मैवमित्यादिना**। घटादावनैकान्तिकपरिहाराय संवित्कर्मतामन्तरेणेति। उपसंहरति——

संबन्धोक्तिः।

इदानीं परिशेषन्यायेन स्वयंप्रकाशत्वं साधयितुं स्थलशुद्धिं तावदाह — **किञ्चेति**। किमत्र प्रमाणमित्यत आह — **यद्वशादिति**। अस्तु, एवमपि किमायातमित्यत आह — **तच्चेति**। तथापि कथमवच्छेदकस्यात्मनः स्वयंप्रकाशत्वमित्यत आह — **अवच्छेदकश्चेति**। दृष्टान्ते हि कथं स्वाश्रयवृत्तिव्याप्यत्वाभाव इत्यत आह — **नहीति**। असिधाराश्रयया छिदिक्रियया नासिधारा विषयीक्रियत इत्यर्थः। ग्राह्यतया सिद्धिः मा भूत्; ग्राहकतया सिद्धिः किं न स्यात् इति शङ्कते प्राभाकरः — **विषयेति**। संवेदनमेव संवेदितेति मते तदधीनप्रकाशत्वमस्त्येव इत्यपसिद्धान्तप्रसक्तिं निवारयति — **स्वातिरेकीति**। नच शङ्कनीयं

हि न स्वातिरेकिसंविदधीनप्रकाशः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवत् । अतः पारिशेष्यात् स्वप्रकाशतासिद्धिः ॥

यद्वा प्राभाकरं प्रति एवं प्रयुज्यते—संवेदिता स्वप्रकाशः संवित्कर्मतामन्तरेणापरोक्षत्वात् संवेदनवत् इति । विज्ञानरूपश्चायमात्मा वेदान्तेषु

---

निबन्धः ।

**अतः पारिशेष्यादिति ।** प्रसक्तप्रतिषेधेनान्यत्राप्रसक्तौ शिष्यमाणे संप्रत्ययः परिशेषः । एतदुक्तं भवति—विद्यते तावदात्मप्रकाशः । अन्यथा ममेदं विदितमिति व्यवहाराभावप्रसङ्गात् । स न मानसप्रत्यक्षसिद्धो, नापि विषयसंवित्तिनिबन्धनः । नचानुमानिकोऽपरोक्षावभासत्वात् । न च भ्रान्त्या, अभावात् । न चात्र गत्यन्तरमस्ति, तस्मात् स्वत एवेति ॥

पूर्वं सर्वान् प्रति साधारण्येन परिशेषानुमानात् स्वप्रकाशत्वं साधितं; इदानीं प्राभाकरं प्रत्यन्यथा रचनीयमित्याह — **यद्वेति** । किंच स्वप्रकाशविज्ञानाभिन्नत्वाच्चात्मा स्वप्रकाश इत्यभिप्रेत्याह — **विज्ञानरूपश्चायमित्यादिना** । यदि

संबन्धोक्तिः ।

संविदतिरिक्ततदधीनात्मप्रकाशस्यानङ्गीकारात् सिद्धसाधनमिति; प्रकाशशब्देन तद्धेतुकव्यवहारस्य विवक्षितत्वात् । अत्रशब्देनात्मस्वीकारे आत्मातिरिक्तसंविदधीनापरोक्षव्यवहारयोग्यो न भवतीति प्रतिज्ञार्थः स्यात् । तथा च साध्यविकलो दृष्टान्तः । संवेदनस्य आत्मव्यरिक्तस्यैव स्वतः संविदधीनापरोक्षव्यवहारयोग्यत्वाङ्गीकरणात् । संवेदनाभिधाने पुनः सिद्धसाधनतैव, संवेदनातिरिक्तसंविदधीनापरोक्षव्यवहारयोग्यत्वाभावस्य आत्मन्यङ्गीकारात् । तस्मादेवमत्र निरुक्तिः — आत्मा संवित्त्वानाधिकरणत्वे सति संविदधीनापरोक्षव्यवहारयोग्यो न भवतीति । तथाच नोक्तदोषद्वयप्रसङ्ग इति द्रष्टव्यम् । अपरोक्षत्वादित्युक्ते घटादौ व्यभिचारः स्यात् तद्व्यावृत्त्यर्थं संवित्कर्मतामन्तरेणेत्युक्तम् । संवित्कर्मत्वादित्येवोक्ते नित्यानुमेयादौ अनेकान्तः स्यात्; तदर्थमाह — **अपरोक्षत्वादिति** ॥

प्राभाकरमते साध्यस्याप्रसिद्धेः स्वयंप्रकाशत्वमेवासाध्यमित्याह — **यद्वेति** । किञ्च विज्ञानस्य स्वयंप्रकाशत्वमभ्युपगच्छद्भिः अनिच्छद्भिरप्यात्मनः स्वयंप्रकाशत्वमेष्टव्य-

गीयते 'विज्ञानमानन्दं ब्रह्म' 'अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्' इति च। विज्ञानं च स्वप्रकाशमिति कथं तद्रूपस्यात्मनो नात्मप्रकाशता। विज्ञानमेव तावत् कथं स्वप्रकाशमिति चेत्,

अत्र साधनश्लोकः—

विमता धीः समाधारकालस्वज्ञानहानितः।
न हीना व्यवहारेण धीत्वादविमता यथा॥

विमता विप्रतिपन्ना धीः संवित्समाधारकालस्वज्ञानहानितः स्वसमानाश्रयस्वसमानकालस्वगोचरज्ञानाभावादिति यावत्। न हीना व्यवहारेण

---

निबन्धः।

विज्ञानस्य स्वप्रकाशत्वं सिद्धं स्यात्तदा तदभिन्नत्वादात्मा स्वप्रकाश इति वक्तुं शक्येत, तदेव नास्तीति नैय्यायिकंमन्यश्चोदयति— **विज्ञानमेव तावदिति**॥

परिहरति— **अत्र साधनश्लोक इत्यादिना**। समावाधारकालौ यस्य स्वगोचरज्ञानस्य तत्तथोक्तं तस्य हानित इति विग्रहः। स्वशब्देन च धर्मिघटादिकमुच्यते॥

श्लोकं व्याचष्टे— **विमता विप्रतिपन्नेत्यादिना**। स्वपरिकल्पितानु-

संवन्धोक्तिः।

मित्याह— **विज्ञानरूपश्चेति**। ननु ब्रह्मण एव ज्ञानरूपत्वमुक्तम्, नात्मन इत्यत आह— **अयमात्मेति**। भवतु विज्ञानरूपत्वमात्मनः, स्वयंप्रकाशता तु कथम् इत्यत आह— **विज्ञानं चेति**।

तत्रानुमानमाह— **विमतेति**। विमता धीः इति स्वविषयानुव्यवसायरहितज्ञानं पक्षीक्रियते। समाधारकालस्वज्ञानहानितो न हीना व्यवहारेणेति साध्यो धर्मः। अविमते तु अपरोक्षत्वेन व्यवह्रियमाणा संवित् दृष्टान्तत्वेन उच्यते।

श्लोकं व्याचष्टे— **विमतेति**। विमता विशेषेण मता इति शङ्काव्यावृत्तये विशिनष्टि— **विप्रतिपन्नेति**।

अव्यवहार्या न भवति, धीत्वात् संवित्त्वात्, अविमता यथा अविप्रतिपन्ना घट-संविन्ममास्तीति व्यवह्रियमाणसंविद्यथेत्यर्थः ॥

एतदुक्तं भवति — विवादाध्यासिता संवित् स्वसमानाश्रयस्वसमान-कालस्वगोचरसंवेदनविरहप्रयुक्तव्यवहारविरहा न भवति संवित्त्वात् अनन्तर-

---

निबन्धः ।

व्यवसाये भागे सिद्धसाधनव्युदासायाह — विवादाध्यासितेति । व्यवहारविरहा न भवति संविदित्युक्ते घटादिसंविद्रस्त्वन्तरवेदनाभावाद्व्यवहारहीना न भवत्येवेति सिद्धसाधनं स्यात्तदर्थमाह — स्वगोचरसंवेदनविरहप्रयुक्तेति । देवदत्तस्य यदनुमान-संवेदनं यज्ञदत्तसंविद्विषयं तदभावापराधेन यज्ञदत्तसंविद्व्यवहारहीना न भवत्येवेति सिद्धसाधनं । तदर्थमाह — स्वसमानाश्रयेति । यद्देवदत्ताश्रयं पूर्वसंविद्विषयं स्मृति-संवेदनं कालान्तरभावित्वादेवाभावापराधेन पूर्वसंवेदनस्य व्यवहारहीनत्वान्नास्त्येव इति सिद्धसाधनं स्यात्तदर्थं स्वसमानकालग्रहणं । स्वसमानावाश्रयकालौ यस्य स्वगोचरसंवेदनस्य तद्विरहप्रयुक्तत्वेन व्यवहारहीना न भवतीत्यर्थः ॥

नन्वनन्तरव्यवह्रियमाणसंविच्छब्देन किं घटसंविदो ग्रहणं किंवा घटसंविद्ग्रह-संविदः? प्रथमे दृष्टान्ताभावः, पक्षे साध्यवैकल्यं च । द्वितीये तु प्रतिज्ञादृष्टान्तयोः व्याघातस्स्फुट एव । अत्रोच्यते — अस्ति तावद्घटसंविन्ममास्तीति व्यवहारकाले संविदः स्फुरणं उभयवादिसंप्रतिपन्नम् । तच्च स्वसमानाश्रयकालस्वगोचरसंवेदनाभावेन व्यवहार-हीना न भवतीत्यपि संमतमेव । अतस्तस्य दृष्टान्ततायां किमनुपपन्नं? नच तद्घट-संविदेवेति परस्य संमतं, येन पक्षनिक्षेपमर्हति । नापि ग्राह्यग्राहकभावेन घटसंविदो भिन्नामित्यस्मत्संमतं, येन प्रतिज्ञाविरुद्धमुदाहरणं स्यात् । नच तर्हि भेदावगमाभावे न दृष्टान्तसिद्धिः पक्षनिक्षेपप्रसङ्गादिति वाच्यम् । परेण भ्रान्त्या भेदेन प्रतिपन्नस्य तस्य व्याप्तिबलेन तं प्रति दृष्टान्तोपपत्तेः । नच परस्य भ्रान्तिः भेदावभासः न तत्त्वतः संविदन्तरनैरपेक्ष्यप्रतिज्ञाया विरोधोऽस्ति । चन्द्रैकत्वानुमानयोरपि विरोधप्रसङ्गात् । नच परस्याभ्रान्त एव भेदावभासः संवेदनानामस्वसंवेदनत्वे बाधकादर्शनादिति

संबन्धोक्तिः ।

बुद्धितद्वृत्त्योः व्यवच्छेदाय धीः संविदित्युक्तम् । एवं वाक्यं खण्डशो व्याख्याय समुदायार्थं कथयति — एतदुक्तमिति । विपक्षे बाधकतर्कमाह —

व्यवह्रियमाणसंविद्वदिति । अस्वसंवेदनत्वे तु संवेद्यमानघटप्रकाशसमनन्तरमेव मयेदं विदितमिति विकल्पो न भवेत् । न ह्यविदिते विशेषणे विशिष्टविकल्पः संभवति । न च वेदनान्तरं तद्गोचरमनुभूयते । अनुभवे वा तद्गोचरमप्यनुभूयेतेत्यनवस्था स्यात्, आद्यसमानयोगक्षेमत्वात् । यावती खल्वाद्यग्रहणसामग्री मनस्संयुक्तात्मसमवायलक्षणा दृष्टा, सा द्वितीयादावप्य-

---

निबन्धः ।

वाच्यमित्याह — **अस्वसंवेदनत्वेपीत्यादिना** । विशिष्टावभासः कुतो न भवेदित्यत आह — **न ह्यविदित इति** । इदं कथंभूतं विदितमिति वेदनं तावद्विशेषणम् । न चास्फुरति विशेषणे विशिष्टावभासः संभवति । नह्यप्रकाशमाने दण्डे दण्डीति विशिष्टप्रत्ययो दृष्टः । अतो विशिष्टावभासानुपपत्त्या संवेदनानां स्वसंवेदनमेव वक्तव्यमिति भावः ॥

ननु तस्य विशेषस्य संवेदनान्तरेण स्फुटं भविष्यतीत्यन्यथानुपपत्तिरित्याशंक्याह — **न च वेदनान्तरमिति** । यदि संविद्गोचरं वेदनान्तरं स्याद्योग्यत्वे सत्युपलभ्येत । तस्मादभावो विधीयत इत्यर्थः । ननूपलभ्यत एव संविद्गोचरं वेदनान्तरं इत्यत्राह — **अनुभवे वेति** । ननु घटसंविद्गोचर एव वेदनमनुभूयत इत्येतावता तद्गोचरमप्यनुभूयेतेति केयं राजाज्ञा, तत्राह — **आद्यसमानेति** । आद्यविज्ञानेन समानयोगक्षेमत्वादुत्तरज्ञानानां तुल्यसामग्रीकत्वादित्यर्थः । एतदेव स्पष्टयति —

संबन्धोक्तिः ।

**अस्वसंवेदनत्व इति** । तत्र हेतुमाह — **न हीति** । विमतमित्यत्र वेदनलक्षणविशेषणस्य भानाभावेन विशिष्टविषयानुभवोऽपि न भवेदित्यर्थः । स्वाधिकरणभिन्नकालीनभिन्नविषयज्ञानस्याभावेनाव्यवहार्यत्वाभावेऽपि पुनः समानाधिकरणसमानकालीनविज्ञानेन वेद्यत्वाङ्गीकारात् अर्थान्तरत्वप्रसङ्गात् । तत्परिहाराय समानाश्रयेत्यादिविशेषणानि । स्वशब्दस्याननुगतिपरिहाराय प्रयोगः पुनरेवं — देवदत्तस्य घटज्ञानं एतदेकाश्रयैतत्कालीनैतद्विषयज्ञानाभावेनाव्यवहार्यं न भवति ज्ञानत्वात् संप्रतिपन्नवदिति । अस्तु तर्हि वेदनान्तरात् तदनुभव इत्यत आह — **न चेति** । 'घटमनुभवामि' इत्यनुव्यवसायज्ञानमनुभूयत एव इत्यत आह — **अनुभव इति** । तत्तत्सामग्र्यभावात् उत्तरोत्तरं नानुभूयत इति नानवस्था स्यात् इत्यत आह — **आद्येति** । तदेव दर्शयति—

**विशिष्टेति कथं तदपि नानुभूयेत? न चादृष्टमात्रवैकल्यादिति शङ्कनीयम्। तन्मात्रवैकल्यात् साक्षात्कारानुत्पत्त्यनुपपत्तेः । उत्पत्तौ वा समनस्केन्द्रियसन्निकृष्टाः स्फीतालोकमध्यमध्यासीनाश्च करिनरतुरगादयोपि कदाचिन्न वीक्ष्येरन् । तथा च योग्यानुपलम्भादभावनिर्णयः क्वापि न भवेत् ॥**

**तथापि सौषुप्तप्रयत्नवदवान्तरवैजात्यादनुपलब्धिर्भवेदिति चेत् । भवेन्नाम तत्र तथा । यद्यनन्यथासिद्धं कार्यमस्ति, तद्वशेन तस्यावश्यं कल्पनीय-**

---

निबन्धः ।

**यावदित्यादिना** । मनसा संयुक्त आत्मनि समवाय एव प्रथमज्ञानोपलंभसामग्री । सा द्वितीयादावप्यविशिष्टैव सर्वज्ञानानामात्मन्येव समवायात् । अतस्तेषामप्युपलंभेन भवितव्यमित्यर्थः । ननु घटसंविद्गोचरं संवेदनं विद्यमानमपि सामग्रीसंभवेऽपि नानुभूयेतादृष्टवैकल्यादित्याशंक्याह — **न चादृष्टेति** । इतश्च सामग्रीसद्भावेऽप्यदृष्टवैकल्यादपि अनुपलंभ इति न शक्यं वक्तुमित्याह — **तथा च योग्यानुपलंभादिति** । किं विद्यमानोपि घटः अदृष्टवैकल्यान्नोपलभ्यते किंवाऽभावादेवेति सन्देहादित्यर्थः । तस्माददृष्टमात्रवैकल्यात्सामग्रीसद्भावेप्यनुपलंभो द्वितीयज्ञानस्य इति न शक्यं वक्तुम् ॥

इदानीं प्रकारान्तरेणानुपलम्भं साधयति — **तथाऽपीति** । यद्यप्यदृष्टमात्रवैकल्यादनुपलम्भो न घटते तथापि प्रथमवेदनं बाह्यार्थगोचरं, द्वितीयं स्वान्तरसंविद्गोचरमित्यवान्तरवैलक्षण्याद्विद्यमानस्यापि तस्यानुपलम्भो घटते । यथा जाग्रत्कालीनस्वात्मनि समवायवत्प्रयत्न उपलभ्यते नतु सौषुप्ते तद्वदित्यर्थः । दृष्टान्तदार्ष्टान्तिकयोः वैलक्षण्येन परिहरति—

संबन्धोक्तिः ।

**यावतीति** । अदृष्टस्यापि सहकारित्वात् मैवमित्याशङ्क्याह — **न चेति** । विपक्षे दोषमाह -- **उपपत्तौ वेति** । हेत्वन्तरवैकल्यपरिहाराय समनस्केत्यादिविशेषणोपादानम् । करिनरतुरगादिग्रहणं सूक्ष्मत्वदोषव्यवच्छेदार्थम् । ततः किमित्यत आह-- **तथाचेति ॥**

प्रयत्नत्वाविशेषे निःश्वासोच्छ्वासादिहेतोः सौषुप्तिकप्रयत्नस्य गमनागमनादिहेतोः प्रयत्नस्येव न प्रत्यक्षज्ञानग्राह्यत्वम् । एवं ज्ञानग्राहकज्ञानमालायामपि प्रत्यक्षविषयत्वं किं न स्यात् इत्याशङ्कते — **तथापीति** । मैवम् , वैषम्यात् इति परिहरति—

त्वात् । अनुपलम्भाच्च नेह तथाविधं कार्यमस्ति । 'घटो मया विदितः' इति विशिष्टवेदनमेव अत्रापि तथाविधं कार्यमिति चेत्, न, तस्य विशेषणवेदनमात्रेण चरितार्थत्वात् भेदाभेदयोरुदासीनत्वात् ॥

यद्वस्तु तत् स्वातिरिक्तेनैव वेदनेन व्याप्यमिति व्याप्तेर्भेदः कल्पनीय इति चेन्न । अनेनैव व्याप्तिसंवेदनेन व्यभिचारात् । इदं हि वस्तुमात्रं व्याप्नुवत् आत्मानमपि व्याप्नुयात् ॥

---

निबन्धः ।

**भवेन्नामेति** । तत्र दृष्टान्ते । विद्यमानस्यापि प्रयत्नस्यानुपलंभो भवेन्नाम । तेन विनाऽनुपपद्यमानहस्तचेष्टादिकार्यमस्ति । कार्यवशेन तस्यावश्यं कल्पनीयत्वात् । प्रकृते तु संवेदनविषयसंविदन्तरव्यतिरेकेणानुपपद्यमानं कार्यं नास्ति; येन तदनुपलभ्यमानमप्यस्ति इति कल्प्यत इत्यर्थः । आह पूर्वपक्षवादी — **घटो मया विदित इति** । विशिष्टानुभवोऽनन्यथासिद्धं कार्यम् । नहि कार्यं तद्विषयभूतसंविद्ग्रहणमन्तरेणावकल्पते । अतस्तदन्यथानुपपत्त्यैवानुपलभ्यमानमपि वेदनान्तरं कल्प्यत इत्यर्थः । अन्यथाप्युपपत्तिमाह — **न तस्येति** । विशिष्टसंवेदनं विशेषणस्फुरणमात्रमपेक्षते; नतु विशेषणभिन्नेन तत्स्फुरणेन भवितव्यमित्यत्र व्यापारोऽस्ति । स्वत एव च विशेषणस्य संवेदनस्य स्फुरणं भविष्यतीति भावः ॥

इदानीं व्याप्तिबलेन भेदं साधयति — **यद्वस्त्विति** । परिहरति — **नानेनैवेति** । व्याप्यस्य घटादेरतिरिक्तवेदनवेद्यत्वं व्याप्तिवेदनबलेन सिध्यति । व्याप्ति-

संबन्धोक्तिः ।

**भवेदिति** । अत्रापि किञ्चित्कार्यं भविष्यतीत्याशङ्क्य, मैवम्, तद्भावे प्रमाणाभावात् इत्याह — **अनुपलम्भादिति** । अनुपलम्भोऽसिद्ध इत्याशङ्कते — **विशिष्टेति** । विशिष्टवेदनं नाम 'विदितो घटः' इत्यादिविज्ञानं । तत् विशेषणीभूतज्ञानस्फुरणमन्तरेणानुपपद्यमानं विशेषणीभूतवेदनविषयं वेदनान्तरं कल्पयतीत्यर्थः । स्वप्रकाशतयापि तस्य स्फुरणोपपत्तेः अन्यथासिद्धं तदिति परिहरति — **न तस्येति** । किमन्याधीनं तस्य स्फुरणं, किंवा स्वत एवेति भेदाभेदयोः उदासीनं तदित्यर्थः । औदासीन्यस्फुरणस्य भेदनिबन्धनत्वव्याप्तेरिति शङ्कते — **यद्वस्त्विति** । व्यभिचारमेव स्फुटयति — **इदं हीति** ॥

**किञ्च सर्वं संवेदनं अस्वसंवेदनं, सर्वं कार्यं सकारणकं, सर्वं वस्तु सात्मकं इत्यादिसंवेदनानि स्वपरसाधारणप्रयोजकवशात् स्वात्मगोचराण्यपि बहुलमुपलभ्यन्त इति कथं न व्यभिचारपरंपरा ? परं गोचरयन्त्येव स्वात्मानमपि गोचरयतीति चेत्, घटसंवेदनमपि तर्हि घटं गोचरयदेव स्वात्मानमपि गोचरयतीति न विशेषः कश्चित् । स्वपरसाधारणप्रवृत्तिनिमित्तगोचरतयैव स्वगोचरत्वं तत्र दृष्टमिति चेन्न । अस्य वैधर्म्यमात्रत्वात् । सर्वथा च साम्यसंपादनीयत्वे प्रमाणाभावात् ॥**

---

निबन्धः ।

वेदनस्य तु वेदनान्तरवेद्यत्वं न व्याप्त्यन्तरवेदनेन सिध्यतीति व्यभिचारः ॥

व्यभिचारान्तरमाह — **किंचेत्यादिना** । सर्वं संवेदनमस्वसंवेदनमिति नैय्यायिकानां व्याप्तिसंवेदनं सर्वस्य संवेदनस्यास्वसंवेदनत्वं साधयत् स्वस्यापि अस्वसंवेदनत्वं साधयति । संवेदनत्वस्य प्रयोजकस्य स्वस्मिन् परत्र च साधारणत्वात् । नतु तस्य स्वातिरिक्तेनास्वसंवेदनत्वं सिध्यति । तथा सर्वं कार्यं सकारणकमिति विज्ञानं सर्वस्य कार्यस्य सकारणत्वं साधयत् स्वस्यापि कार्यत्वाविशेषात् स्वकारणं स्वयमेव साधयति । तथा सर्वं वस्तु सात्मकमिति व्याप्तिसंवेदनं सर्वस्य स्वात्मकत्वं बोधयत् स्वस्यापि स्वात्मकत्वं साधयति नतु तस्य स्वात्मकत्वं व्याप्तिवेदनान्तरेण सिध्यति इति कथं यद्वस्तु तत्स्वातिरिक्तेति व्याप्तिबलेन सिध्यतीति त्वदीयव्याप्तेर्न व्यभिचारपरंपरापि तु भवत्येवेत्यर्थः । तेषां न साक्षात्स्वगोचरत्वमित्याह — **परं गोचरयन्त्येवेति** ॥

सिद्धान्त्याह — **घटसंवेदनमपीति** । पुनः पूर्ववाद्याह — **स्वपरसाधारणेति** । स्वस्मिन् परत्र च साधारणप्रवृत्तं संवेदनत्वादीति विवक्षिते ह्यंशे

संबन्धोक्तिः ।

व्यभिचारस्थलान्तराण्याह — **किञ्चेति** । स्वात्मागोचरत्वे सर्वोपसंहारवती व्याप्तिरेवास्तमियादित्यर्थः । वैषम्यमाशङ्कते—**परमिति** । तुल्यमेतदित्याह—**घटेति** । संवेदनत्वकार्यत्ववस्तुत्वानि स्वपरयोः साधारणानि शब्दप्रवृत्तिनिमित्तानि । तद्गोचरतयैव तत्र स्वगोचरत्वं दृष्टम् । इह तु विज्ञानघटयोः तादृशसाधारणप्रवृत्तिनिमित्ताभावात् न तुल्ययोगक्षेमत्वमिति वैधर्म्यान्तरमाशङ्क्य परिहरति — **स्वपरेति** । स्वपरसाधारण-

**प्रदीपवच्चात्र प्रवृत्त्युपपत्तेः । यथा खलु प्रदीपः परत्र विज्ञानलक्षणं कार्यं कुर्वन् स्वात्मन्यपि स्वभावभेदादेव तत्करोति; नतु दीपान्तरमपेक्षते; तथा विज्ञानमपि परत्र व्यवहारकार्यं कुर्वत् स्वभावभेदादेव स्वात्मनि व्यवहारं कुर्यात्; विज्ञानान्तरं तु नापेक्षत इति किं न स्यात्? अत एवोक्तम् —**

**एकं कस्यचिदन्यस्य द्वयमेव प्रकाशकम् ।**
**अत्यन्तमनपेक्षस्य नैकमप्यस्तु का क्षतिः ॥**

---

निबन्धः ।

दृष्टान्तदार्ष्टान्तिकभावो भवति । विद्यते चेह स्वातिरिक्तनिरपेक्षसिद्धित्वं विवक्षितांशः । त्वया तु वैलक्षण्यमात्रं शङ्कितं । न तावता दृष्टान्तदार्ष्टान्तिकभावक्षतिरित्यर्थः । उक्तं हि –– 'किंचित्साधर्म्यादुपसंहारसिद्धेः वैधर्म्यादप्रतिषेधः' इति । अन्यथा दृष्टान्तदार्ष्टान्तिकभावोऽपि न स्यादिति भावार्थः ॥

ननु स्वपरसाधारणमेकं प्रयोजकमन्तरेणापि यदि स्वपरयोः प्रवृत्तिः कस्यचित् दृष्टा स्यात्तदा वैधर्म्यमात्रं तदिति वक्तुं शक्येत । न च तदस्तीत्याशंक्याह — **प्रदीपवच्चेति** । एतदेव स्फुटयति — **यथा खल्विति** । उक्तेऽर्थे संवादकमाह — **अत एवोक्तमिति** ॥

एकं ज्ञानमेवान्तरं ज्योतिः कस्यचित्प्रदीपादेः प्रकाशकम् । अन्यस्य घटादेः द्वयमेव बाह्यमान्तरं च ज्योतिः प्रकाशकं नैकरूपमेव सर्वस्य प्रकाशकं; किन्तु वस्तुस्वभाव-

संबन्धोक्तिः ।

प्रवृत्तिनिमित्तं स्वपरसाधारणशब्दप्रवृत्तिनिमित्तमिति यावत् । वैधर्म्यमपि व्याप्तिविरोधित्वात् दोषाय इत्याशङ्क्य प्रसिद्धव्याप्तिस्थलेऽपि तत्संभवात् मैवमिति परिहरति— **सर्वथेति** ॥

स्वपरसाधारणप्रवृत्तिनिमित्तगोचरतयैव स्वगोरत्वमित्यपि न नियमः, अन्यथापि लोके दृष्टत्वात् इत्याह — **प्रदीपवच्चेति** । उक्तमेवार्थमभियुक्तवाक्येन द्रढयति— **तदुक्तमिति** । कस्यचिदालोकादेः एकं ज्ञानमेव प्रकाशकम्, अन्यस्य पुनर्घटादेः **ज्ञानमालोकश्च** । तदेवं पदार्थानां विचित्रस्वभावत्वात् ज्ञानस्यापि स्वभावभेदादेव स्वातिरिक्तमनपेक्ष्य स्वव्यवहारहेतुत्वं संभाव्यतामिति भावः । उक्तं न्यायमनुसरन्

इति । तस्मादाद्यसंवेदनस्य वेदनान्तरवेदनीयत्वे अनवस्थाप्रसङ्गलक्षणतर्कोपकृतानुपलम्भादेव तस्याभावसिद्धौ परिशेषात् स्वप्रकाशतासिद्धिः । उक्तं च—

'असंवित्तौ वित्तेर्न खलु तदुपाधिव्यवहृतिः
प्रतीतावन्यस्यां प्रसभमनवस्था प्रसरति' ।

एवं च इदमप्यनवकाशं चोद्यम् । यदाहुरेके — 'स्वात्मनि वृत्तिविरोधान्न स्वसंवेदनं विज्ञानं' इति । व्याप्त्यादिवेदनवत् प्रदीपवच्चोपपत्तेः । न च तत्र स्वपरसङ्गतकार्यानुकूलात् स्वभावभेदादन्या स्वात्मनि वृत्तिरस्ति, या विरुध्येतेति चेत्, प्रकृतेपि तर्हि स्वपरव्यवहारानुकूलात् स्वभावभेदादन्या न काचन स्वस्कन्धारोहकल्पा वृत्तिर्या विरुध्येतेति सर्वं समञ्जसम् ॥

---

निबन्धः ।

वैचित्र्यात्सापेक्षत्वानपेक्षत्वविभागोऽपि दृष्टः । एवं च सत्यत्यन्तनिरपेक्षस्य संवेदनस्य नैकमप्यन्यवस्तु प्रकाशकं सजातीयं वा, का हानिरित्यर्थः । यस्माद्यद्वस्तु तत्स्वातिरिक्तवशेनैव सिध्यतीति नियमाभावान्न संविदः स्फुरणं भिन्नं, तस्मादित्युपसंहारः ॥

वित्तेः वेदनस्यासंवित्तावस्फुरणे सति न खलु घटो मया विदित इत्यादिकं तदुपाधिस्तदवच्छिन्ना व्यवहृतिस्संभवति, अवच्छेदकमन्तरेणावच्छिन्नव्यवहारानुपपत्तेः । अन्या तर्हि संविद्विषया प्रतीतिः अस्त्विति न वाच्यमित्याह—प्रतीतावन्यस्यां संविद्ग्राहिकायां सत्यां प्रसह्यमानाऽनवस्था प्रसरति इति । परिशेषात् स्वत एव संवित्प्रसरतीत्यर्थः । उक्तन्यायेन चोद्यान्तरमपि चूर्णितमित्याह — एवं चेति । एतेनेत्यतः प्राक्तनः स्पष्टार्थः ॥

संबन्धोक्तिः ।

उपसंहरति — तस्मादिति । उक्तेऽर्थे बाह्यानामप्यनुमतिं दर्शयति — उक्तं चेति । उक्तोदाहरणैरेव कर्मकर्तृभावविरोधोद्भावनमपि परिहृतमित्याह — एवं चेति । उक्तोदाहरणेषु न कर्मकर्तृभाव इति शङ्कते — न च तत्रेति । एवं चेदिहापि नास्तीति परिहरति — प्रकृतेऽपीति ॥

ननु अन्वयव्यतिरेकिणाऽनुमानेन संवेदनस्य स्वसंवेदनत्वसाधनात् अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गात् इति केवलव्यतिरेक्यनुमानमिष्टसिद्धिकारैः

**एतेन 'आवीतोऽप्यत्र वेदनत्वात्' इति प्राचामाचार्याणां हेतुः**

---

निबन्धः ।

एवं तावदन्वयव्यतिरेक्यनुमानेन तदनुग्राहकन्यायेन च संवित्स्वप्रकाशतां प्रसाध्येदानीं तेनैव न्यायेनानुमानान्तरमपि समर्थितं भवतीत्याह — **एतेनेति ।** एतेनैव प्रयुक्तन्यायेन आवीतः केवलव्यतिरेकी स्वप्रकाशत्वसिद्धौ वेदनत्वादिति पूर्वाचार्याणां हेतुस्समर्थित इत्यर्थः ॥

**इदमिहाकूतं** । मीमांसका मन्यन्ते—न केवलव्यतिरेकी हेतुर्भवति, तस्यातिप्रसङ्गित्वात् । तथाहि — घटो हि स्वप्रकाशः घटत्वात् । यः स्वप्रकाशो न भवति नासौ घटः यथा पटः; भूः शशविषाणविदीर्णा भूत्वात् न यदेवं न तदेवं, यथा गगनमित्यादीनामपि सदनुमानत्वप्रसङ्गान्न केवलव्यतिरेकिणो गमकतेति । संवेदनं स्वप्रकाशं संवेदनत्वात् न यदेवं न तदेवं, यथा घटादीत्यस्यापि अगमकतैवेति । अत्रोच्यते — केवलव्यतिरेक्यवतारायावतरति — घटत्वादीनां विपक्षबाधकतर्कानुकूलतर्कविधुरत्वेन व्यतिरेकाभासकतयाऽप्रयोजकपरतयाऽप्यगमकत्वोपपत्तेः । इह पुनः संविद्व्यवहार एव न निर्वहति स्वसंवेदनमन्तरेणेति विपक्षबाधकानुकूलतर्कसद्भावात् गमकत्वोपपत्तेरिति ॥

किंचावश्याश्रयणीयोऽयं पन्थाः । कथमन्यथा पृथिव्यादेः द्रव्यत्वे विमतो बौद्धः प्रबोध्यते । तथाहि — न तावत्तस्य यत्क्रियावद्गुणवद्वा तद्द्रव्यमिति विद्यतेऽन्वयकलापि । न चास्ति प्रमाणान्तरम् । अतोऽसौ केवलव्यतिरेकिप्रबोधनीयः । पृथिव्यादीनि द्रव्याणि, क्रियावत्त्वाद्गुणवत्त्वाद्वा, न यदेवं न तदेवं यथा नृश्रृङ्गमिति । यदि सोऽपि केवलव्यतिरेकिणं नानुमन्यते, कथं सत्त्वेन क्षणिकतां विश्वस्य बोधयेत् । नो खलु यत्सत्तत्क्षणिकमिति सम्मतोऽस्माकं अन्वयलेशः । जलधरादेरपि पराभिमतक्षणिकतानभ्युपगमात् । परस्य हि पूर्वापरकालकलाविकलता क्षणिकता । न तादृशी जलधरादेरभ्युपगम्यते आशुविनाशिता । तेनापि केवलव्यतिरेकिणा यत्क्षणिकं न भवति न तत्सत् यथा शशशृङ्गं, सन्तश्चामी भावा इत्यनेन क्षणिकता प्रबोधनीया । तस्मात्सर्वैरेव केवलव्यतिरेकी स्वीकर्तव्य इति स्थिते युक्तमेव केवलव्यतिरेकिणा स्वप्रकाशत्वसाधनम् ॥

संबन्धोक्तिः ।

उदाहृतमवधीरितमिति, नेत्याह — **एतेनेति** । आवीतः केवलव्यतिरेकी । वेद्यत्वेऽनवस्थादिदोषप्रदर्शनात् सपक्षाभावाच्च वेदनत्वात् इत्यनेनापि केवलव्यतिरेकिणा स्वतस्सिद्धत्वं

समर्थितः, प्रतिपक्षे बाधकदर्शनात् । एतदर्थमेव चाभिमतविशेषणपुरस्कारेणैव तत् प्रदर्शितम् । तस्मात् स्वसंवेदनसंवेदनाभेदादप्यात्मा स्वप्रकाश इति सिद्धम् ॥

एतादृशस्य सर्वस्याभिलषितस्य साधनायोक्तम् — ‘विज्ञानतनुम्’ इति । कथं पुनः विनाशिनो विज्ञानस्य नित्यात्मस्वभावता संभविनी ? न, विज्ञानस्यापि विनाशासिद्धेः । नीलादिसंवेदनसमसमयपीतादिसंवेदना-

---

निबन्धः ।

ननु पूर्वमन्यार्थत्वेन बाधकमुपन्यस्तं नाप्रयोजकपरिहारायेत्याशङ्क्याह — **एतदर्थमेवेति** । यद्यपि अन्वयव्यतिरेक्यनुमानानुग्राहकत्वेन पूर्वं तर्कः उपन्यस्तः, तथापि केवलव्यतिरेक्यनुमानेऽप्रयोजकत्वपरिहारार्थमपि चाभिमतविशेषणस्य स्वसंवेदनस्य परिग्रहेणैव तद्बाधकं प्रदर्शितमस्माभिरस्वसंवेदनत्वे त्वित्यादिनेत्यर्थः । फलितमाह — **तस्मादिति** ॥

उक्तेऽर्थे पदमवतारयति — **एतादृशस्य चेति** । विज्ञानं स्वप्रकाशं तद्रूपत्वादप्यात्मा स्वप्रकाशस्ततो नानैकान्तिकः इत्येतादृशस्य सर्वस्येत्यर्थः । विज्ञानं आत्मस्वभावं न भवति विनाशित्वात् घटवदित्याह — **कथं पुनरिति** । हेत्वासिध्या परिहरति — **न विज्ञानस्येति** । अयमाशयः—विज्ञानस्य विनाशः किं स्वतस्सिध्यति किंवा विज्ञानान्तरेण ? न तावत्तेनैव, तत्सत्ताकाले तस्य भावात् । नाप्यन्येन,

संबन्धोक्तिः ।

साधयितुं शक्यमित्यर्थः । तर्हि सपक्षोऽपि नास्ति चेत् कथमन्वयव्यतिरेकी हेतुः त्वया प्रयुक्तः इति तत्राह — **एतदर्थमिति** । **अभिमतविशेषणपुरस्कारेण** समानाधारकालेत्यादिविशेषणपुरस्कारेण इति यावत् । स्वतस्सिद्धत्वसाधन एव सपक्षाभावः, न पुनः यथोक्तविशेषणविशिष्टसाधने । तत्र मुखतः स्वतस्सिद्धत्वासाधनेऽपि अर्थादेव स्वतःसिद्धता सिद्ध्यतीत्यर्थः । **एतदर्थं**—साक्षात् स्वतस्सिद्धत्वसाधने व्यतिरेकिप्रयोगदर्शनार्थम् । संवेदनाभेदात् आत्मनः स्वयंप्रकाशत्वमुपपादितमुपसंहरति — **तस्मादिति** ॥

उक्तेऽर्थे श्लोकपदमवतारयति—**एतादृशस्येति** । शङ्कते—**कथं पुनरिति** । परिहरति — **नेति** । योग्यानुपलब्धिसिद्धं विनाशित्वमिति शङ्कते — **नीलादीति** ।

दर्शनात् विनाशप्रतीत्या तत्सिद्धिरिति चेत्; न, पीतादेस्तदुपहितस्यैव च संवेदनस्यादर्शनात्। विनाशप्रतीतेरपि घटाकाशादिवदौपाधिकगोचरत्वेनैवोपपत्तेः। आजानतश्च संवेदने भेदानुपलम्भाद्भेदसिद्धेः। प्रयोगश्च संवित् स्वान्तर्गतभेदशून्या भेदोपाधिमन्तरेणाविभाव्यमानभेदत्वात् आकाशवत् इति ॥

---

निबन्धः।

संविद्ग्रहणमन्तरेण तद्विशेषितविनाशग्रहणानुपपत्तेः। संविदश्च न संविदमन्तरेण ग्रहणं संभवतीति। प्रतीतिसिद्धो विनाशो न तर्केणापलपनीय इत्याह — **नीलादिसंवेदन इत्यादिना**। नीलादिसंवेदनसमकालं पीतादिसंवेदनं न दृश्यते इति कोऽर्थः? किं पीताद्युपरागो न दृश्यते किंवा संविदपि। न तावत्संविन्न दृश्यते, नीलोपरागेऽपि तत्स्फुरणात्। पीताद्युपरागादर्शनन्तु स्वीक्रियत एवेत्याह — **न पीतादेरित्यादिना**। या तु पीतसंविन्नष्टा इति प्रतीतिः सा घटाकाशो नष्ट इतिवदौपचारिकत्वेनापि भविष्यतीत्याह — **विनाशप्रतीतेरपीति** ॥

ननु प्रमाणान्तरेणाकाशव्यक्त्यैक्यस्य सिद्धत्वाद्विनाशप्रतीतिर्मिथ्याविनाशविषयेति कल्पयितुं शक्यते। न तथा संविद्व्यक्त्यैक्ये मानमस्ति इत्याशंक्याह — **आजानतश्चेति**। गौर्गौरितिव(त्संवि)त्संविदिति प्रत्यभिजानतः पुंसस्संवेदने भेदानुपलंभात् प्रत्यभिज्ञाप्रमाणेन व्यक्त्यैक्यसिद्धिरित्यर्थः। संविदश्च प्रत्यभिज्ञानं नाम स्वप्रकाशत्वात्तदुपाध्युपरागेष्वेकाकारपरिस्फुरणमेवेति द्रष्टव्यम्। ननु प्रत्यभिज्ञा गोत्वप्रत्यभिज्ञावदेव सामान्यविषया भविष्यति? न, निरुपाधिकसंविद्व्यक्तिभेदे प्रमाणा-

संबन्धोक्तिः।

अनुपलब्धिः उपाधितत्संबन्धयोरेव, न तु स्वरूपस्य इति परिहरति — **न पीतादेरिति**। कथं तर्हि विनाशानुभवः इत्यत आह — **विनाशेति**। युक्त्यन्तरमाह — **आजानतश्चेति**। विनाशप्रतीतेः विज्ञानस्वरूपमात्रविषयत्वमेव किं न स्यात् इत्याशङ्क्याह — **आजानतश्चेति**। आजानतः स्वभावतः; उपाधिपरामर्शं विनेति यावत्। अन्तर्गणिको भेदः स्वान्तर्भेदः। विज्ञानप्रतियोगित्वे सति विज्ञानधर्मिक इति यावत्। भेदशून्येत्युक्ते बाधः स्यात् आपाततः संवेद्यात् भेदस्वीकारात्। ततो विशेषमाह — **अन्तर्गणिकेति**। अविभाव्यमानभेदत्वात् इत्येवोक्तौ असिद्धिः स्यात् इत्यत उक्तम् — **उपाधिपरामर्शमन्तरेणेति** ॥

एवं चाभेदसंसिद्धौ संवित्स्वाभाव्यसंभवात् ।
आत्मनः स्वप्रकाशत्वमनिवार्यमिति स्थितम् ॥

तथा च कुतः प्रकृतहेतोरनैकान्तिकशङ्कावकाशः? तथापि स्वप्रकाशत्वाद्वितीयत्वादिसाधकस्य प्रमाणस्य तद्वत्यात्मन्यपि प्रवृत्तेरवर्जनीयं तस्यापि दृश्यत्वमिति कथं नानैकान्तिकं दृश्यत्वमिति चेत्; अहो! कथं विस्मरणशीलता देवानांप्रियस्य। न हि दर्शनप्रतियोगितामात्रलक्षणं दृश्यत्वं हेतुः, अपि तु स्वव्यवहारे स्वातिरिक्तस्वदर्शनापेक्षानियतिः इत्यवोचाम। न चौपाधिकात्मविकल्पे तदुपनायकप्रमाणापेक्षायामपि स्वरूपमात्रव्यवहृतौ

---

निबन्धः ।

भावात्। तदभावेऽपि सामान्यविषयत्वकल्पनायां घटाकाशादिष्वपि प्रसङ्गात्। संविद्भिन्ना भिन्नसामग्रीसाध्यत्वात्पटवदिति अनुमानेन प्रातिभासिकभेदसाधने सिद्ध-साधनता वास्तवशून्येत्यर्थः। फलितमर्थमाह श्लोकेन — एवं चेत्यादिना ॥

एवमुक्तप्रकारेण प्रत्यभिज्ञयाऽनुमानेन चाभेदस्य संविद्व्यक्त्यैक्यसंसिद्धौ सत्यामात्मनः संवित्स्वाभाव्यसंभवात्स्वप्रकाशत्वमपि चायुतसिद्धम्। स्वप्रकाशत्वे वा सिद्धे किं फलितमित्याशंक्याह — तथाचेति। तथापीत्यादिः स्पष्टार्थः ॥

नन्वेतादृशमपि दृश्यत्वमात्मनो विद्यत एवाद्वितीयादिव्यवहारे स्वातिरेकि-दर्शनापेक्षानियमादित्याशङ्क्याह — न चौपाधिकात्मविकल्प इति। अद्वितीयत्वं

संबन्धोक्तिः ।

एवं विज्ञानस्य भेदाभावेन विनाशाभावात् नित्यात्मस्वरूपत्वोपपत्तेः विज्ञान-रूपत्वेनात्मनः स्वयंप्रकाशत्वसाधनं युक्तमेवेत्युपसंहरति — एवं चेति। एवं च सति दृश्यत्वहेतोरनैकान्तिकत्वमप्यपास्तमित्युपसंहरति — तथाचेति ॥

प्रकारान्तरेणानैकान्तिकत्वमाशङ्कते — तथापीति। साधकस्य प्रमाणस्येति शेषः। सोपहासमस्योत्तरमाह — अहो इति। देवानांप्रियस्य पशोरिति यावत्। पूर्वोक्तलक्षणस्य दृश्यत्वस्य आत्मन्यभावात् नानैकान्तिकतेत्यर्थः। ननु देहव्यतिरिक्त-स्यात्मनः कर्तृत्वभोक्तृत्वप्रमातृत्वादिसाधने स्वातिरेकिदर्शनापेक्षानियतिः आत्मनो-

**तदपेक्षाऽस्तीति कुतो यथोक्तहेतोरनैकान्तिकत्वावकाशः ? विशिष्टस्फुरणेऽपि च स्वरूपमदृश्यमित्युदितमन्यत्र, नेह प्रपञ्चितं संग्रहाधिकारात् । अन्यथापि च साध्यस्य समर्थितत्वादिति ॥**

**जडता दृश्यता चास्तु सत्यस्यैवेति चेन्मतम् ।**
**मैवं मविश्यसंबन्ध धर्म्यसिद्धिप्रसक्तितः**

---

निबन्धः ।

नाम द्वैताभावोपाधिकं रूपम् । स्वप्रकाशत्वं च प्रकाशभेदाभावोपाधिकम् । तत्प्रतिभासे तत्समर्पकप्रमाणापेक्षायामपि स्वरूपमात्रव्यवहृतौ न प्रमाणापेक्षास्ति, सुषुप्तौ तद्व्यतिरेकेणापि स्वरूपस्फुरणात् । अतो न दृश्यत्वहेतोः यावत्स्वरूपे वृत्तिरित्यर्थः । ननु द्वैताद्यभावविशिष्ट आत्मा यद्यागमेन वेद्यते, तर्हि स्वरूपमपि अवश्यं वेद्यमेव वक्तव्यम् । नहि स्वरूपे अदृश्ये तस्य वैशिष्ट्यमवगन्तुं शक्यमित्यत आह — **विशिष्टस्फुरणेऽपि चेति ।** स्वयमप्यागमादनुमानाद्वा अद्वितीयत्वाकारबुद्धिवृत्तिरुत्पद्यते । तस्यामभिव्यक्तो दृगात्मा स्वाध्यस्तद्वैताभावादिविशिष्टत्वमपि साधयतीति स्वरूपेऽदृश्येऽपि वैशिष्ट्यं दृश्यमिति । नन्वात्मनोऽदृश्यत्वमेवात्र विस्तरेणोपपादनीयम् । तद्व्यतिरेकेणानेकान्तपरिहारासंभवादित्याशंक्याह — **अन्यथापि चेति ।** साध्यस्यानैकान्तिकतापरिहारस्य अन्यथापि स्वप्रकाशस्य विज्ञानाभेदेन स्वप्रकाशत्वसाधनेनापि समर्थितत्वादित्यर्थः ॥

संबन्धोक्तिः ।

ऽप्यस्तीति, नेत्याह — **न चेति ।** तथापि नित्यत्वादिसाधनप्रमाणस्य सोपाधिकात्मविषयत्वविरहेऽप्यात्मनि केवले प्रवृत्तिर्दृश्यते इत्यत आह — **विशिष्टेति ।** नैतदात्मनि व्यतिरेकोपपत्तेः तस्य स्वप्रकाशत्वेऽपि व्यतिरेकावच्छिन्नस्य स्यादेव दृश्यता । तस्य निरुपाधिकं रूपमपराधीनप्रकाशमिति सोपाधिकं तु पराधीनप्रकाशमपीति प्रपञ्चमिथ्यात्वे दर्शितमित्यर्थः । ननु तथापि तदिह वक्तव्यं, तत्सिध्यधीनत्वात् साध्यसिद्धेः इत्यत आह — **अन्यथेति ।** न हि दर्शनप्रतियोगितामात्रमित्यत्र दृश्यत्वस्य अन्यथैव निरुक्तत्वात् तेनैव अनैकान्तिकत्वपरिहारस्य प्रपञ्चमिथ्यात्वस्य वा सिद्धेः नात्र तत्साधनस्य अत्यन्तमुपयोग इत्यर्थः ॥

विपक्षे बाधकतर्काभावात् हेतोरप्रयोजकत्वमाशङ्क्य परिहरति — **जडतेति ।**

**यस्य हि जडता दृश्यता च निरूपणीया, तस्य धर्मिण एवासिद्धौ कस्य ते निरूप्येताम्? न च तदसंबद्धं संविदा सिद्धं नाम स्यात्। नो खलु तत् स्वयं सिध्येत् जडत्वादेव। नापि संविदा, तया सह संबन्धानिरूपणात्। न हि संवित्संवेद्ययोः अन्तर्बहिर्भावेन प्रकाशमानयोः संयोगादिः संभवेत्। विषयविषयिभावोऽपि संबन्धो भवन् अतीतादौ कथं भवेत्? न ह्यसति संबन्धिनि संबन्धो नाम भवेत्। न चातीताद्यपि न संविदितम्। न च**

---

निबन्धः।

इदानीमप्रयोजकत्वमाशंक्य परिहरति श्लोके—**जडता दृश्यता चेत्यादिना**। सत्यस्यैव प्रपञ्चस्य जडता दृश्यता चास्तु। किं बाधकम्? तथा विपक्षबाधकतर्काभावादप्रयोजक इतिचेन्मतम्; नैवं वाच्यं, सत्यत्वे प्रपञ्चस्य संवित्त्या संबन्धासद्भावे सति धर्मिणः प्रपञ्चस्यैवासिद्धिप्रसङ्गादित्यर्थः॥

भवतु धर्मिणोऽसिद्धिस्तथापि जडत्वदृश्यत्वे कथं सत्यत्वेन विरुध्येते इत्याशंक्याह — **यस्य हीत्यादिना**। ननु तर्हि संबन्धव्यतिरेकेणापि जडस्य प्रमाणादेव सिद्धिर्भविष्यतीत्याशंक्याह — **न च तदसंबद्धमिति**। जडस्य सिद्धिर्नाम संवित्संबन्ध एव स्वाभाविकस्फुरणासंभवात्। अतः संविदाऽसंबद्धं जडं न सिद्धं नाम स्यादित्यर्थः। असिद्धिमेवोपपादयति — **नो खल्वित्यादिना**। संबन्धानिरूपणमेव प्रकटयति — **न हि संवित्संवेद्ययोरिति**। न तावत्संयोगस्संभवति, संविदोऽद्रव्यत्वात्। नापि तादात्म्यं द्रवकठिनवर्तिविरुद्धयोस्तदनुपपत्तेः। नापि समवायः, आत्मैकगुणाभिमतस्य घटादौ समवायायोगादित्यर्थः। विषयविषयिभाव एव संबन्धो भवत्वित्याशंक्याह — **विषयविषयिभावोऽपीति**। काऽनुपपत्तिरित्याशंक्याह — **न ह्यसतीति**। संबन्धो हि

संबन्धोक्तिः।

उत्तरार्धं व्याचष्टे — **यस्य हीति**। ननु धर्मिप्रपञ्चः प्रसिद्ध एव इत्यत आह — **नचेति**। सैव प्रसिद्धिः युक्त्या निरूप्यमाणा न सिद्ध्यतीत्यर्थः। अस्तु तर्हि आत्मवत् सिद्धिः इत्यत आह — **नो खल्विति**। अस्तु तर्हि संविदा सिद्धिरिति, अत आह — **नापीति**। संयोगादीनामन्यतमः संबन्धः किं न स्यादित्यत आह — **न हीति**। अस्तु तर्हि विषयविषयिभाव एव संबन्ध इत्यत आह — **विषयेति**। कानुपपत्तिरित्यत आह — **न हीति**। मास्तु तर्हि तत्र संवित् इत्यत आह —

**संविदसंसृष्टं संविदितं चेति प्रयुज्यते, अतिप्रसङ्गात्। हेतुहेतुमद्भावश्चाना-गतादावसंभवी। सव्यभिचारश्च चक्षुरादिभिः॥**

**एतेन एकान्तःकरणसंक्रान्तावस्थ्येव संबन्ध इति निरस्तम्। असतोऽतीतादेः तत्वतः संक्रमायोगात्। सत्वे वा अतीतत्वाद्यनुपपत्तेः।**

---

निबन्धः।

संबद्धपरतन्त्र एव। कथमसौ भवेदित्यर्थः। ननु वर्तमाने तावद्विषयविषयिभावलक्षण-स्संबन्धो भवतु। नातीतादौ; को दोष इत्याशंक्य संवित्संबन्धाभावे असिद्धिरापद्येत। न च तदस्तीत्याह — **न चातीताद्यपीति**। तर्हि संवित्संबन्धाभावोऽपि सिध्यतीत्या-शङ्क्याह — **हेतुहेतुमद्भावेति**। अविद्यमानस्य जनकत्वानुपपत्तेरित्यर्थः। किंच चक्षुरादिभिरपि रूपादिज्ञानानां जन्यजनकभावोऽस्ति, न संवेदनसंवेद्यभाव इत्याह — **सव्यभिचारश्चेति**॥

यदप्याहुः सांख्याः—मुद्रामुद्रितप्रतिमुद्रितन्यायेन विषयमुद्रामुद्रितज्ञानद्वारेण विषयस्यान्तःकरणप्रविष्टस्य चिदात्मनोपलब्धिस्संभवत्येकान्तःकरणसंक्रान्तिलक्षणसंबन्धा-दिति, तदप्यतीतादौ संबन्धासंभवप्रदर्शनेन परास्तमित्याह — **एतेनेति**। नन्वतीताद्या-कारेण तस्यापि सत्वं विद्यत इत्याशङ्क्याह — **सत्वे चेति**। अयं भावः — अतीतत्वं नाम अतीतकालावच्छिन्नत्वमुच्यते। न चावच्छेदकमन्तरेणावच्छिन्नसद्भावो भागी। विशेषणस्य चातीतकालस्येदानीं सद्भावे वर्तमानतैवेति नातीतत्वादिकं स्यादिति। अतीतादिवृष्टिः वर्तते, अनागता वृष्टिर्वर्तते इत्यादिप्रयोगोऽव्यभिचरितसंसिद्ध एवास्माक-मुपपद्यते न सत्वात्, मानतो निरूपणासहत्वादिति द्रष्टव्यम्। किंच वर्तमानेऽपि विषय-

संबन्धोक्तिः।

**न चेति**। अस्तु तर्हि संविदितम्, किं संबन्धेन इत्यत आह — **न च संविदिति**। जन्यजनकभावोऽपि संबन्धोऽत्र न संभवतीत्याह — **हेतुहेतुमदिति**। सत्यपि जनकत्वे चक्षुरादेः विषयत्वादर्शनादेरपि एवमित्याह — **सव्यभिचारश्चेति**।

साङ्ख्यानामभिमतसंबन्धेऽप्युक्तं न्यायमतिदिशति — **एतेनेति**। संक्रमण-काले तदतीतत्वे स नास्तीत्यत आह — **सत्वे वेति**। तथापि संविदः सत्वात्

संविदश्चासङ्गायाः अप्रतिसंक्रमत्वात् । अन्तःकरणस्य तच्छायया तत्र संक्रमणमिति चेत्; अथ केयं तच्छायता नाम? न तावदात्मनः तादात्म्यं तात्विकम्, विरोधात् । अतात्विके तु तादात्म्ये संसर्गे वा न परमार्थतो दृश्यं दृष्टं स्यात् । असत्यत्वे तु दृश्यस्य गगनगन्धर्वनगरयोराधाराधेयभाव इव संवित्संवेद्ययोरप्यलीक एव संबन्धो भविष्यति । तद्वशाच्च तत्संविदितं भवेत् गन्धर्वनगरवदेवेति सर्वमवदातम् ॥

एतदप्युदितम् — 'असत्यभेदम्' इति । भिद्यत इति भेदः प्रपञ्चः । असत्यो भेदो यस्मिंस्तत् असत्यभेदमित्यर्थः ॥

---

निबन्धः ।

स्यान्तःकरणानुप्रवेशस्संभवति । तथापि चैतन्यस्य नान्तःकरणेऽनुप्रवेशः संभवति कूटस्थत्वादित्याह — संविदश्चेति ॥

चैतन्यस्य नान्तःकरणेऽनुप्रवेशः संक्रमस्तु भवतीत्याह पूर्ववादी — अन्तःकरणस्येति । सिद्धान्ती पृच्छति — अथेति । तर्हि केयं तच्छायता नाम? किं परमार्थतोऽन्तःकरणस्य तादात्म्यं; चित्क्रियात्वं वा, न पारमार्थिकं संभवति विरोधादिति । द्वितीयं दूषयति — अतात्विके तु तादात्म्ये इति । अन्तःकरणस्य चित्क्रियत्वे सति तन्निबन्धनैकान्तःकरणसंक्रान्तिलक्षणसंबन्धे वा तात्विके सति परमार्थतो दृश्यं दृष्टं स्यात् । दृष्टता हि नाम दर्शनसंबन्धता । नच पारमार्थिकः संबन्धोऽस्तीत्यर्थः । तस्मात्सत्यत्वे प्रपञ्चस्य संवित्संसर्गानिरूपणादसिद्धिरेव इति सिद्धम् । प्रपञ्चस्यासत्यत्वे वा कथं संबन्धसिद्धिरित्याशंक्याह — असत्यत्वे त्विति ॥

उक्तार्थानुगुणत्वेन पुनरपि पदमवतारयति — एतदप्युक्तमित्यादिना ।

संबन्धोक्तिः ।

संक्रमणमस्त्येवेत्यत आह — संविदश्चेति । संविदोऽसङ्गत्वेऽपि अन्तःकरणस्य परिणामविशेषात् तच्छायापत्तिः संक्रम इति सांख्यः शङ्कते -- अन्तःकरणस्येति । सिद्धान्ती तच्छायापत्तिं विकल्प्य दूषयति -- अथेति । परिशेषादिदं सिद्धमित्याह — असत्यत्व इति । अस्मिन्नप्यर्थे श्लोकपदं योजनीयमित्याह — एतदपीति ॥

अथैवमपि प्रपञ्चस्य मिथ्यात्वे तदन्तःपातिन्याः श्रुतेरपि तथात्वात् कथं सा ब्रह्मणि प्रमाणं भवेत् ? नायं दोषः, मिथ्याभूतस्यापि प्रतिबिम्बस्य सत्यबिम्बबोधकत्वेन प्रामाण्यदर्शनात् । स्वप्नकामिन्याश्च शुभसूचकत्वेन तथाभावात् । पठन्ति च स्वप्नाध्यायविदः --

यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने ॥

पारमर्षं चात्र सूत्रमुदाहरणीयम् -- 'सूचकश्च हि श्रुतेराचक्षते च तद्विदः' (ब्रह्मसूत्रम्, अ. ३ पा. २ सू. ४) इति । न च वचनीयं, तत्रापि प्रतिबिम्बादिज्ञानं सत्यमेव बिम्बादिज्ञानजनकतया प्रमाणं, न त्वळीको विषय इति । ज्ञानमात्रस्यानवच्छिन्नस्यातिप्रसङ्गित्वात् । विषयावच्छिन्नस्य च प्रमाणतायां तस्याप्यवर्जनीयत्वात्प्रामाण्यस्य । एतेन प्रमाणोपपत्त्यनुपपत्त्यो-रद्वैतानुपपत्तिरित्यपास्तम् । अळीकेनैव प्रमाणेन तदुपपादनादित्यलमतिप्रसङ्गेन ॥

---

### निबन्धः ।

अथैवमित्यादिः स्पष्टार्थः । कुत इत्याकांक्षायामाह — **ज्ञानमात्रस्येति** । प्रतिबिम्बेना-व्याप्तस्य ज्ञानमात्रस्य बिंबगमकत्वं चेत्तदातिप्रसंगः स्यात् । घटादिज्ञानानामपि बिंब-गमकत्वप्रसंगात्, प्रतिबिंबेनाव्याप्तत्वाविशेषादित्यर्थः । अथैतद्दोषभीत्या प्रतिबिंबेन विशेषितस्य ज्ञानस्य गमकत्वं, तत्राह — **विषयावच्छिन्नस्य त्विति** । ज्ञातधूमवत् ज्ञानप्रतिबिंबस्यैव बिंबगमकत्वान्न सत्यस्यैव गमकत्वनियम इत्यर्थः । स्वरूपेण मिथ्यात्वे-ऽपि सत्यवस्तुगमकत्वात् प्रामाण्यं कुतो न संभवतीत्यनेन शङ्कान्तरमप्युत्सारितमित्याह— **एतेनेति** ॥

### संबन्धोक्तिः ।

प्रपञ्चमिथ्यात्वे ब्रह्मणि प्रमाणासंभवं चोदयितुमाशङ्कते — **अथैवमिति** । दृष्टान्तावष्टंभेन परिहरति — **नायमिति** । तदेव कथमित्यत आह — **पठन्तीति** । तत्रापि स्वरूपेण सत्यस्यैव बोधकत्वमिति शङ्कते — **न चेति** । किं केवलं ज्ञानमेव बोधकम्, किं वा विषयविशेषितम् इति विकल्प्य नाद्य इत्याह — **ज्ञान-मात्रस्येति** । न द्वितीय इत्याह — **विषयेति** । उक्तां युक्तिं चोद्यान्तरनिरासे-

**यस्त्वेवमपि शब्दानां सङ्गतिग्रहणसमये कार्यान्वयपरतयैव तद्ग्रहात् असति कार्यान्वये न संभवति ब्रह्मणि मुख्यया वृत्त्या प्रामाण्यम् । न च लोकवदत्र लक्षणाश्रयणे पुरुषविवक्षानुगतिर्नाम कारणमस्ति । तस्मात् प्रतिपत्तिविधिनिष्ठमेव वेदान्तानामपि प्रामाण्यमिति मन्यते तत्प्रतिबोधनायेदं प्रयुज्यते --**

---

निबन्धः ।

एवं तावत्प्रपञ्चस्य मिथ्यात्वोपपादनेन प्रत्यक्षादिविरोधपरिहारेण श्रुतेरद्वितीये ब्रह्मणि प्रामाण्यमुपपाद्येदानीं कार्यपरताशंकापाकरणेन तदेवोपपादयितुं प्राभाकरमतमाह— **यस्त्वेवमपीत्यादिना** । यस्तु मन्यत इत्यन्वयः । किं तत् मन्यत इत्याकांक्षायां, एवमपि— यद्यपि त्वया प्रामाण्यमुपपादितं, तथापि असति कार्यान्वये न संभवति मुख्यवृत्त्या ब्रह्मणि प्रामाण्यं वेदान्तानामित्यन्वयः । कुत इत्याकाङ्क्षायामाह— **शब्दानामिति** ॥

अयमर्थः— उत्तमवृद्धेन देवदत्त गामानयेति प्रयुक्तशब्दश्रवणानन्तरं मध्यमवृद्धप्रवृत्तिमुपलभ्य पार्श्वस्थो बालोऽनुमिमीते -- सेयं प्रवृत्तिः प्रवर्तकज्ञानपूर्विका स्वतन्त्रप्रवृत्तित्वात्, मदीयप्रवृत्तिवत् इति । तच्च प्रवर्तकं कार्यमेव स्नानभोजनादिस्वव्यवहारे बालेनाधिगतमिति स्वात्मदृष्टान्तेन मध्यमवृद्धस्यापि तदेव कल्पयति । शब्दान्वयव्यतिरेकानुविधायितया तज्ज्ञानेन सर्वशब्दानामौत्सर्गिकं सामर्थ्यं गृह्णाति । पश्चाच्च प्रयोगान्तरेष्ववयवावापोद्धाराभ्यां कार्यसंसृष्टे स्वार्थे शक्तिमध्यवस्यतीति कथमस्माद्वेदे शुद्धसिद्धे प्रामाण्यमिति । सिद्धस्य कार्यसंसर्गाव्यभिचारात् लक्षणया सिद्धे प्रामाण्यं भविष्यतीत्याशंक्याह — **नच लोकवदिति** । गंगायां घोषः प्रतिवसतीत्यादौ पुरुषस्य तीरविवक्षा लक्षणाश्रयणे कारणं, न त्वविनाभावमात्रम् । न चापौरुषेयवेदे तदस्तीत्यर्थः । यस्मात्स्वातन्त्र्येण सिद्धे वस्तुनि प्रामाण्यं न संभवति, **तस्मादित्युप**संहरति । आत्मा प्रतिपत्तव्य इत्युक्ते कोऽसावात्मा इत्याकाङ्क्षायां अजरो-

संबन्धोक्तिः ।

ऽस्यतिदिशति — **एतेनेति** ॥

मिथ्याभूतबोधकत्वेऽपि ब्रह्मणि न वेदान्ताः प्रमाणम्, आगमस्य कार्यपरत्वात् इति शङ्कते —**यस्त्विति** । मुख्यया वृत्त्या बोधकत्वाभावेऽपि लक्षणया प्रामाण्यं किं न स्यात् इत्याशङ्क्याह —**न चेति** । अपौरुषेयत्वादेव पुरुषाभिप्रायलक्षणस्य

विवादाध्यासितानि पदानि न कार्यान्वितस्वार्थनियतसामर्थ्यानि, पदत्वात् कार्यपदवदिति। न च साध्यविकलो दृष्टान्तः। एकस्मिन् वाक्ये कृत्युद्देश्यतालक्षणकार्यद्वयासंभवेन कार्यपदस्य तादृक्कार्यान्तरान्वितस्वार्थगोचरताऽसंभवात्। साध्यमात्रस्य च भावार्थादेस्तत्त्वेनानङ्गीकारात्। विपर्यये तु योग्ये-

---

निबन्धः।

ऽमृतोऽभयो ब्रह्मेत्यादयो वेदान्ताः प्रतिपत्तिविध्यपेक्षितप्रतिपत्तव्यात्मस्वरूपसमर्पणे उपयुज्यन्त इत्यर्थः॥

प्रथमं तावल्लोके कार्यसंसृष्टस्वार्थे सङ्गतिग्रहणमिति यदुक्तम्, तत्परा-करोति — **तत्प्रतिबोधनाय इदं प्रयुज्यत इत्यादिना**। कार्याभिधायकत्वेनाभिमतलिङादिशब्दव्यतिरिक्तानां सर्वशब्दानां ग्रहणं **विवादाध्यासित**शब्देन। ननु लिङादिपदस्यापि कार्यान्वितस्वार्थाभिधायकत्वमेव। धात्वर्थस्य कार्यत्वात्तदन्वितनियोगाभिधायकत्वाल्लिङादीनाम्। अतस्साध्यविकलो दृष्टान्त इत्याशङ्क्याह— **न च साध्यविकल इति**। 'कृतियोग्यं प्रधानं यत्तत्कार्यमभिधीयते' इत्युक्त्या कृत्युद्देश्यलक्षणं कार्यं प्राभाकराणामभिमतम्। तथाविधं च कार्यद्वयमेकस्मिन् वाक्ये न संभवतीति न कृत्युद्देश्यलक्षणकार्यान्वितस्वार्थाभिधायकत्वं लिङादिशब्दानाम्। कृतिसाध्यमात्रस्य च धात्वर्थादेः शब्दशक्तिप्रतियोगिकार्यत्वेनानभ्युपगमात् न तदन्वितस्वार्थाभिधायित्वमित्यर्थः। ननु पदत्वं भवति अकार्यान्वितस्वार्थेष्वनियतं सामर्थ्यं च भविष्यति, को दोषः? तथाच विपक्षबाधकाभावादप्रयोजक इत्याशङ्क्याह— **विपर्यये त्वित्यादिना**। **विपर्यये त्विति**। कार्यपदादतिरिक्तानां सर्वपदानां कार्यसंसृष्टस्वार्थे सामर्थ्यनियमाभ्युपगमे सति प्रयोजकद्वैविध्याङ्गीकारगौरवप्रसङ्गो बाधक उन्नेय इत्युत्तरत्र संबन्धः। न त्वेकस्मिन् प्रयोजके संभवति द्वैविध्याङ्गीकारेण गौरवं दूषणं भवति।

संबन्धोक्तिः।

कारणविशेषस्याभावात् न लक्षणा स्यादित्यर्थः। परिशेषादिदमायातमित्याह — **तस्मादिति**॥

लोके वेदे च कार्यान्विते शक्तिः क्वचित्क्वचिदस्तीत्यत आह— **नियतेति**। सर्वेषां पदानां कार्यान्वितस्वार्थबोधकत्वमिति ये मन्यन्ते तान् प्रति कथमयं दृष्टान्त इत्यत आह — **न चेति**। ननु भावार्थकार्यान्वयोऽस्तीत्यत आह — **साध्येति**।

तरान्वितस्वार्थमात्रस्य सर्वपदसामर्थ्यप्रयोजकतायां संभवन्त्यां कार्यपदातिरिक्तानां कार्यान्वितस्वार्थे सामर्थ्यम्, कार्यपदस्य तु स्वरूपे अन्यान्विते वेति प्रयोजकद्वैविध्याङ्गीकारे गौरवप्रसङ्गो बाधक उन्नेयः ॥

यद्वा कार्यं न समस्तपदसामर्थ्यप्रतियोगि अन्वयव्यतिरेकित्वात् पदार्थान्तरवत् । अत्रापि सत्यसति च कार्ये योग्यतामात्रेण परस्परं पदार्थानामन्वयोपपत्तौ कार्यस्यापि समस्तपदसामर्थ्यप्रतियोगिताकल्पने गौरवमेव दूषणं स्यात् ॥

यद्वा विवादाध्यासितः शब्दव्युत्पत्तिगोचरः प्रमेयत्वात् उभयाभिमतप्रमेयवत् । विपर्यये तु व्युत्पत्तिदशायां योग्यान्वितस्वार्थे पदसामर्थ्य-

---

### निबन्धः ।

न चैकं प्रयोजकं संभवतीत्याशङ्क्याह — **योग्येतरान्वित इति** ॥

इदानीं कार्यस्य समस्तपदसामर्थ्यव्यावर्तकत्वं न भवति अन्वयादन्यत्वात् । यदन्वयादन्यत्, न तत्समस्तपदसामर्थ्यप्रतियोगि यथेतरसिद्धपदार्थ इत्यर्थः । यदत्र वक्तव्यं तदुक्तमन्यत्रैव । इहापि विपक्षे बाधकमाह — **अत्रापीत्यादिना** । शुक्लां गामानय, नीलमुत्पलमित्यादौ सत्यसति च कार्ये योग्यतामात्रेण क्रियया कारकाणां, विशेषणस्य च विशेष्येणान्वयसंभवे सति कार्येणैव सर्वपदार्थानामन्वयः, अतः कार्यान्वितस्वार्थाभिधान एव सामर्थ्यमिति नियमकल्पने गौरवमेव दूषणमिहापीत्यर्थः ॥

इदानीं योग्येतरान्विते स्वार्थे शक्तिसाधनाय प्रयुङ्क्ते— **यद्वेत्यादिना** । कार्यातिरिक्तस्सर्वोऽपि सिद्धपदार्थो योग्येतरान्वित इह विवादाध्यासित उच्यते ।

### संबन्धोक्तिः ।

तत्त्वेन-कृत्युद्देश्यलक्षणकार्यत्वेन । इदानीं विपक्षे बाधकं तर्कमप्रयोजकत्वपरिहाराय दर्शयति — **विपर्यये विति** ॥

पूर्वं पदानि पक्षीकृत्यानुमानमुक्तम्; इदानीं कार्यं पक्षीकृत्यानुमिनोति — **यद्वेति** । सामर्थ्यप्रतियोगि सामर्थ्यविषय इति यावत् । विषयसामर्थ्यनिरूपकत्वात् प्रतियोगित्वव्यपदेशः । अत्रापि विपक्षबाधकतर्कमाह — **अत्रापीति** । इदानीं

मङ्गीकृत्य कार्यस्यापि तत्र दर्शनमात्रेण योग्यकार्यान्वित इति प्रयोजकोपादाने भावार्थरूपस्यैव च कार्यस्यान्वयिनस्तदा दर्शनात् योग्यभावार्थरूपकार्यान्वय-प्रयोजकमुपादेयं स्यात्। तथा च वेदे भावार्थातिरेकिनियोगकार्यान्वयो न स्यादिति दूषणम्॥

एवं स्थिते सिद्धेऽप्यर्थे प्रामाण्याय प्रयुज्यते—विवादाध्यासितो मुख्यया वृत्त्या शब्दप्रमेयः प्रमेयत्वात् उभयाभिमतप्रमेयवत्। विपर्यये तु तत्र तत्र

---

निबन्धः।

**उभयाभिमतप्रमेयवदिति**। लिङादिशब्दाभिधेयकार्यवदित्यर्थः। प्रमेयत्वं भवतु, योग्येतरान्वितस्वार्थस्य व्युत्पत्तिविषयत्वं च न भविष्यति। किन्तु कार्यान्वितस्यैव शब्दशक्तिविषयत्वमित्याशङ्क्याह — **विपर्यये त्वित्यादिना**। पदार्थमात्रज्ञानात् प्रवृत्तेरनुपपत्तेः योग्यसंसृष्टपदार्थज्ञानमनुमिनोति बालः। तस्य च शब्दान्वयव्यतिरेकानु-विधायितासामान्येन प्रथमं तत्र स्वसामर्थ्यमङ्गीकृत्य पश्चाच्च केन योग्येन संसृष्टस्वार्थाभि-धाने पदानां शक्तिरिति वीक्षायां कार्यस्य सर्वत्राव्यभिचारमात्रेण त्वयाऽन्विते शक्तिः परिकल्प्यते तर्हि लोके सर्वत्र धात्वर्थस्यैव अव्यभिचारात्तदन्वितस्वार्थे सर्वपदानां सामर्थ्यं भवति। तदा च को दोष इत्यत आह— **तथा च वेद इति**॥

**ननु** योग्यभावार्थरूपकार्यान्वयस्य प्रयोजकत्वोपादाने बहुविशेषणत्वमापद्यते। कार्यान्वितमात्रस्य प्रयोजकत्वोपादाने तु लाघवं, तर्हि ततोऽपि लघीयोऽन्विततत्वमात्रस्यैव प्रयोजकत्वं उपादीयतां, योग्यत्वेतरयोः उपलक्षणत्वात् न प्रयोजकविशेषणत्वमिति द्रष्टव्यम्। तस्माल्लोके न समर्थपदानां कार्यान्वितस्वार्थमात्रेषु सामर्थ्यग्रहणम्। किं तु अन्वितस्वार्थमात्रे इति स्थितम्। भवत्वेवं लोके, वेदे सिद्धेऽर्थे नास्त्येव मुख्यया वृत्त्या प्रामाण्यमित्याशङ्क्याह —**एवं सिद्धेऽपीत्यादिना**। विपक्षबाधकमाह — **विपर्यये**

संबन्धोक्तिः।

**सिद्धवस्तु** पक्षीकृत्यानुमानमाह — **यद्वेति**। विपक्षे बाधकतर्कं दर्शयति — **विपर्यये त्विति**॥

एवं पदानां सिद्धेऽपि सामर्थ्यं प्रसाध्य इदानीं सिद्धेऽपि वाक्यस्य प्रामाण्यं दर्शयितुं सिद्धं वस्तु पक्षीकृत्यानुमानमाह — **एवं स्थित इति**। लक्षणया

दृश्यमानोपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिङ्गभङ्गप्रसङ्गः, पूर्वोक्तरीत्या मुख्यत्वसंभवे लक्षणाश्रयणं च बाधकमिति ॥

एतच्च पराभिमतं कार्यमङ्गीकृत्य अवोचाम। वस्तुतस्तु तदनङ्गीकारेऽपि प्रयुज्यते—वेदः सिद्ध एवार्थे प्रमाणम्, प्रमाणत्वात् चक्षुर्वत्। पराभिमतकार्यविपरीतश्च सिद्धोऽर्थो विवक्षितः, न निष्पन्नादिः। तथा च भविष्यदनुमानेन नानैकान्तिकत्वम्। नापि विधिवाक्येन बाधितविषयत्वं, तत्रापि प्रयत्न-

---

निबन्धः।

त्विति। मुख्यासंभवेन च लक्षणाश्रयणं विद्यते। संभवति चेह योग्यान्वितस्वार्थे सामर्थ्याभिधानान्न मुख्यया वृत्त्या प्रामाण्यम्। तस्मिन् सति लक्षणाश्रयणं च बाधकमित्यर्थः। ननु सर्वस्यैव वेदस्यालौकिके नियोगे चोदनासूत्रे प्रामाण्यं स्थापितं, तत्कथं सिद्धे संभवति, विरोधादित्याह— **एतच्च पराभिमतमिति**॥

ननु परिनिष्पन्नार्थस्सिद्ध उच्यते, प्रमाणान्तरगोचरो वा। तत्र प्रामाण्यप्रसाधने विशिष्टमेघोदयदर्शनाद्वर्षिष्यति वृष्टिरिति यदनुमानं तत्रानैकान्तिकं स्यादित्याशंक्याह— **पराभिमतकार्येति**। कालत्रयावच्छिन्नं प्रवर्तकं पराभिमतं कार्यं, तद्विपरीते भविष्यदनुमानस्य प्रामाण्यादित्यर्थः। ननु तथापि भागे बाधितविषयत्वं, विधिवाक्यभागस्य पराभिमते कार्ये प्रमाणत्वादित्याशङ्क्याह— **नापीति**। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यनेन स्वर्गकामस्य ज्योतिष्टोमोऽभिलषितसाधनमिति प्रतिपाद्यते।

संबन्धोक्तिः।

प्रमेयत्वव्यावर्तनार्थमाह— **मुख्ययेति**। ननु ब्रह्मणि लक्षणैकसमाधिगमे हेतुरनैकान्तः, तथा इक्षुक्षीरगुडादीनां माधुर्यभेदेऽपि। 'इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्। तथापि न तदाख्यातुं सरस्वत्यापि शक्यते॥' इति न्यायात इति चेत्। नायं दोषः; मुख्यया वृत्त्या शब्दप्रमेय इति तात्पर्यात्, शब्दप्रतिपाद्यत्वस्येह विवक्षितत्वात्। अस्यानुमानस्य विपक्षे बाधकतर्कमाह— **विपर्यये त्विति**॥

पूर्वं कार्यमङ्गीकृत्य सिद्धेऽपि प्रामाण्यं समर्थितम्। इदानीं सिद्ध एव प्रामाण्यमित्याह— **एतच्चेति**। भविष्यदनुमानादौ अनैकान्तिकत्वमाशङ्क्य परिहरति— **परेति**। हेतोः कालात्ययापदिष्टतां परिहरति— **नापीति**। विपक्षे वेदैकदेशस्याप्रामाण्य-

परतन्त्रश्रेयस्साधनविशेषात्मनो वाक्यार्थस्याभ्युपगमात् । विपर्यये तु पराभिमतकार्यस्येन्द्रियासङ्गतेः लिङ्गाद्यभावाच्चासिद्धौ तत्र सङ्गतिग्रहणानुपपत्तेः, अगृहीतसङ्गतिकानां पदानामपि बोधकतानुपपत्तिर्बाधिका । न च ममेदं कर्तव्यमिति ज्ञानादेव तत्सिद्धिरिति वाच्यम् । चिकीर्षाया एव केवलं एवं प्रतिभासात् । तदतिरेकिणः प्रमाणविज्ञातस्य एवंविधस्य सद्भावे प्रमाणाभावात्, ततः प्रमेयभेदासिद्धेः । चिकीर्षायाश्च प्रयत्नपरतन्त्रश्रेयस्साधनावबोधादेव लौकिककार्यज्ञानकारणभावेनाभ्युपगमात् उत्पत्त्युपपत्तौ तदर्थमपि कार्यज्ञानकल्पनानु-

---

### निबन्धः ।

कृतियोग्याभिलषितसाधनज्ञानादेव प्रवृत्तिरपि संभवतीत्यर्थः । विधिभागस्य नियोगनिष्ठत्वाभ्युपगमेऽप्रामाण्यमेव प्रसज्यत इत्याह — **विपर्यये त्वित्यादिना** । अयमर्थः — प्रतीतेस्तावत्कार्ये सङ्गतिग्रहो वक्तव्यः, कार्यप्रतीतिश्च न प्रत्यक्षेण, तस्य वर्तमानग्राहकत्वात् । नाप्यनुमानेन, तद्व्याप्तलिङ्गाभावात् । नाप्यर्थापत्त्या, तद्व्यतिरेकेणानुपपत्त्यभावात् । प्रवृत्तेश्च कृतियोग्येष्टसाधनज्ञानादुपमानस्य च सादृश्यमात्रापेक्षया उपपत्तेः । तस्मात्पराभिमतकार्यप्रतीतिकारणाभावादप्रतीते सङ्गतिग्रहायोगात् अगृहीतसङ्गतिकानां च शब्दानां बोधकत्वासंभवात् अप्रामाण्यमेव प्रसज्यते इति ॥

ननु यद्यपि बाह्यप्रत्यक्षग्राह्यत्वं तस्य नोपपद्यते इति, तथापि मानसावसेये तस्मिन् सङ्गतिग्रहो भविष्यतीत्याशङ्क्याह — **नच ममेदं कर्तव्यमिति** । इदं यदि प्रमाणज्ञानं स्यात्तदा प्रमाणप्रसादाद्भवेत् प्रमेयविशेषसिद्धिः । न त्विदं प्रमाणज्ञानं, किं तु चिकीर्षालक्षणोऽभिलाष इत्यर्थः । ननु चिकीर्षापि न संभाव्यते व्यतिरिक्तकार्यज्ञानं विना । अतः तदन्यथानुपपत्तिरेव प्रमाणमित्याशङ्क्याह — **चिकीर्षायाश्चेति** । लौकिकालौकिककार्यज्ञानकारणत्वेन त्वयाभ्युपगतं यत्कृतियोग्येषु साधनज्ञानं तत एव

### संबन्धोक्तिः ।

प्रसङ्गो बाधक इत्याह — **विपर्ययेति** । कथं सङ्गतिग्रहणासंभवः, मानसप्रत्यक्षसिद्धे सङ्गतिग्रहणोपपत्तेः इत्याशङ्क्याह — **न चेति** । अस्तु तर्हि तदतिरिक्तमेव प्रमाणमित्यत आह — **तदतिरेकिण इति** । ननु चिकीर्षायाः कार्यत्वात् तत्करणत्वेन कार्यज्ञानं कल्प्यतामित्याशङ्क्याह — **चिकीर्षाया इति** । ननु तर्हि प्रयत्नपरतन्त्रस्यैव श्रेयस्साधनस्य चिकीर्षाहेतुत्वाभ्युपगमात् अतीतादौ च तदसंभवात् कृतियोग्यं कार्यं त्वयैवाभ्युपगतमिति

पपत्तेः । कृतियोग्यतामात्रस्य तु कार्यस्य कृत्यन्वयव्यतिरेकावसेयस्यानिष्टादावपि संभवेनाप्रवर्तकत्वाल्लिङाद्यर्थतानुपपत्तिः । कृत्युद्देश्यतापि तु तदतिरेकिणी फलाद्य-धिकरणा मनसाऽवसीयत एवेत्यपि प्रलापमात्रम् । तस्या उभयसिद्धचिकीर्षा-गोचरतामात्ररूपाया एवानुभवात्, विपर्यये प्रमाणस्यादर्शनात् । वाङ्मात्रस्य च विप्रतिपन्नं प्रति अप्रतिपादकत्वात् । तस्मात् पराभिमतकार्यस्यैवाप्रमाणकत्वात् तत्र सङ्गतिग्रहणानुपपत्तेः न कर्मभागोऽपि तद्बोधकः ; किं पुनर्ब्रह्मभाग इति सिद्धम् ॥

यत्तु वेदान्तानामपि प्रतिपत्तिविधिनिष्ठत्वमिति तदप्यसत् । ब्रह्मणि

---

## निबन्धः ।

चिकीर्षाया अपि उत्पत्त्युपपत्तौ संभवन्त्यां न चिकीर्षोत्पत्त्यर्थमपि कार्यज्ञानमभ्युपगन्तव्य-मित्यर्थः । उक्तं हि —

'तत्किं स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत् ।
फलसाधनता तत्र कारणं तेन कार्यते ॥ इति ।

किंलक्षणं तत्कार्यं यत्कर्तव्यबुद्धेः गोचरः ? किं कृतियोग्यतामात्रलक्षणं, किं वा कृत्युद्देश्यलक्षणं ? प्रथमं प्रत्याह— **कृतियोग्यतामात्रस्य त्विति** । ननु कृतियोग्यता-तिरिक्ता कृत्युद्देश्यतैव कार्यलक्षणं, नचेदं मानहीनं, कृतिर्हि प्रयत्नः फलं तत्साधनं चोद्दिश्य जायत इति मनसाऽवसीयत एवेत्याशंक्याह— **कृत्युद्देश्यता त्वित्यादिना** । फलतत्साधनयोः कृत्युद्देश्यता नाम चिकीर्षागोचरतैव चकास्तीत्यर्थः । चिकीर्षातिरिक्ता तत्र कृत्युद्देश्यता भातीत्यत्र च प्रमाणं नास्तीत्याह— **विपर्यये प्रमाणस्येति** । नन्वति-रिक्ता मयाऽनुभूयत इति वाक्यमेव प्रमाणमित्याशंक्याह — **वाङ्मात्रस्येति** । प्रकृत-मुपसंहरति — **तस्मादिति** ॥

## संबन्धोक्तिः ।

तत्राह — **कृतियोग्यतेति** । ननु न वयं कृतियोग्यतामात्रं कार्यं ब्रूमः; किन्तु कृत्युद्देश्यत्वे सति कृतियोग्यम्; तथा सति लक्षणस्य नातिव्याप्तिरित्यत आह— **कृत्युद्देश्यतेति** । **फलाद्यधिकरणेति** । सुखदुःखप्राप्तिपरिहारतत्साधनेषु अनुगतेति यावत् । ननु कार्यवादिनां कृत्युद्देश्यता प्रसिद्धैवेत्यत्राह — **वाङ्मात्रस्य चेति** ॥

हि प्रतिपत्तयः तिस्रः संभवेयुः-शाब्दी भावनात्मिका साक्षात्काररूपा चेति। तत्र शाब्द्यास्तावत् शब्दादेवोत्पत्तौ विधिवैयर्थ्यम्। अनुत्पत्तौ चाशक्यत्वं अविज्ञात-स्वरूपत्वात्। भावनायास्तु भाव्यसाक्षात्कारहेतुभावस्य अन्वयव्यतिरेकगम्यत्वात् अनर्थक एवात्रापि विधिः। साक्षात्काररूपा पुनः परमानन्दगोचरभावात् फल-मेवेति कथं तत्रापि विधेरवकाशः स्वर्गवत्॥

किञ्च यत् पुरुषप्रयत्नपरतन्त्रं कर्तुमकर्तुमन्यथा कर्तुं शक्यं तद्विधेयं, यथा ज्योतिष्टोमः। प्रतिपत्तिस्तु प्रमाणादिमात्रपरतन्त्रो न तादृगिति कथं सा विधीयेत? तस्मात् 'आत्मा द्रष्टव्यः' इत्यादयो विधिसरूपा वेदान्ते भासमानाः शब्दाः कथञ्चिदर्हार्थत्वेन 'विष्णुरुपांशु यष्टव्यः' इत्यादिवत् अर्थवादतया व्याख्येयाः। अन्यथा उपक्रमोपसंहारगतसिद्धात्मतत्वाख्यानैक-रूप्यविरोधादिति॥

---

### निबन्धः।

यत्त्वित्यादिः स्पष्टार्थः। विष्णुरुपांशु यष्टव्य इत्यादिवदित्यस्यायमर्थः—'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति। विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय' इत्यत्राजामित्वोपक्रमोप-संहारैकरूप्यावगतोपांशुयागप्रतिपादनपरे वाक्ये यथा मध्ये श्रूयमाणा विष्णुरुपांशु यष्टव्य

### संबन्धोक्तिः।

आत्मा द्रष्टव्यः इत्यादेः प्रतिपत्तिविधिनिष्ठत्वमुक्तमनूद्य दूषयति— **यत्त्विति**। कथमित्याकाङ्क्षायां तद्दर्शयितुं संभाविताः प्रतिपत्तीः दर्शयति — **ब्रह्मणीति**। तत्र आद्यायाः प्रतिपत्तेः विधेयत्वमनुपपन्नमित्याह — **तत्रेति**। कुत इत्यत आह— **अविज्ञातेति**। शब्दात् ज्ञानस्यानुत्पत्तौ तस्याप्रसिद्धत्वात् शाब्दज्ञानं कुर्यादिति विधिः न घटत इत्यर्थः। द्वितीयं प्रतिपत्तिविधिं दूषयति— **भावनाया इति**। तृतीयं दूषयति — **साक्षादिति**॥

प्रत्येकं दूषणमभिधाय सामान्येन दूषणमाह — **किञ्चेति**। कथं तर्हि आत्मा द्रष्टव्यः इत्यादयो विधय इति, तत्राह — **तस्मादिति**। **विष्णुरुपांशु यष्टव्यः इत्यादिवदिति**। अजामित्वोपक्रमोपसंहाराभ्यामधिगतैकवाक्यत्वानुरोधेन उपांशु-

तस्मादद्वैतविज्ञानसुखरूपे प्रमाणताम् ।
ब्रह्मणि प्रविपद्यन्ते वेदान्ता इति साम्प्रतम् ॥

अथैवमनेकपदार्थसंभेदात्मनि वाक्यार्थे कथमद्वैतपरमागमवाक्यं प्रमाणं स्यात्, अद्वैतभेदयोरत्यन्तविरोधात् । अत्रोच्यते — द्विविधं तावद्वेदान्तवाक्यम् । एकं पदार्थनिष्ठं, अपरं तस्यात्मतादात्म्यरूपवाक्यार्थनिष्ठमिति ।

---

निबन्धः ।

इत्यादयो न विधायका इष्टा वाक्यभेदप्रसङ्गात्तथाऽत्रापि 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इत्यात्मप्रतिपादनेनोपक्रमात् 'एतावदरे खल्वमृतत्वम्' इत्युपसंहारादेकस्मिन्नात्मप्रतिपादनपरे वाक्ये सति वाक्यभेदपरिहाराय द्रष्टव्यादयो न विधय एष्टव्याः । किन्तु 'अर्हे कृत्यतृचश्च' इति स्मरणादर्हार्थत्वेनार्थवादतया व्याख्यातव्या इति ॥

उक्तार्थजातफलं श्लोकेन संगृह्णाति — तस्मादिति । यस्मात् प्रागुक्तन्यायेन न प्रत्यक्षादिविरोधोऽद्वैतागमस्य, नापि कार्यशेषता तस्मादित्यर्थः । अद्वैतं च तद्विज्ञानसुखरूपं च तत्तस्मिन् ब्रह्मणि वेदान्ताः प्रामाण्यं प्रतिपद्यन्त इति ॥

अखण्डवाक्यार्थमुपश्रुत्य संसर्गो वाक्यार्थः इति मत्वा अद्वैतिनः आक्षिपन्ति— अथैवमित्यादिना । नच साध्यविकलो दृष्टान्त इत्यतः प्राक्तनः स्पष्टार्थः । ननु

संबन्धोक्तिः ।

याजमन्तरा यजति' इत्ययमेव विधिः, न तु वाक्यभेदापादकविष्ण्वादिरूपयागत्रयं विधीयते, किंतु अर्थवादः । एवम् 'आत्मा द्रष्टव्यः' इत्यर्थवाद इत्यर्थः । विधिपरत्वे काऽनुपपत्तिरित्यत्राह—अन्यथेति । उक्तमर्थं श्लोकेनोपसंहरति — तस्मादिति ॥

यदुक्तम्, अद्वैते ब्रह्मणि वेदान्ताः प्रमाणमिति, तदाक्षिपति — अथेति । संभेदः संसर्गः । विभिन्नपदार्थसंसर्गात्मकवाक्यार्थपराणां नानाशब्दानामद्वैते प्रामाण्यमनुपपन्नमित्यर्थः । अखण्डैकरसे वस्तुनि वेदान्तवाक्यानां प्रामाण्यं दर्शयितुं वेदान्तवाक्यानामपि महावाक्यावान्तरवाक्यभेदेन द्वैविध्यं दर्शयति — द्विविधमिति । पदार्थनिष्ठमिति । 'सदेव सोम्येदमग्र आसीत्' 'कतम आत्मा' इत्यादितत्त्वंपदार्थविवेचकं वाक्यजातम् । महावाक्यं तु 'तत्त्वमसि' इति, 'अयमात्मा ब्रह्म' इत्यादि । वाक्यत्वा-

तत्राद्यस्याखण्डार्थतायामनुमानमुच्यते — विज्ञानादिवाक्यमखण्डार्थनिष्ठं लक्षण-वाक्यत्वात् पृथुबुध्नोदराकारो घट इत्यादिवाक्यवत्। न च साध्यविकलो दृष्टान्तः स्यात्। घटप्रातिपदिकार्थमात्रं पृच्छन्तं प्रति तावत एव प्रतिपाद्यत्वात्। अन्यथा 'आम्रान् पृष्टः कोविदारानाचष्टे' इति अनवधेयवचनत्वप्रसङ्गात्। न च पृथुत्वादिकं घटपदार्थः किन्तु तद्धर्मः, पृथुत्वं घटस्येत्यादिप्रयोगदर्शनात्। तथा चानिष्टव्यवच्छेदेनैक एव घटप्रातिपदिकार्थः पृथुत्वादिभिरनेकैरुप-लक्षणात्मभिः पदार्थैरुपलक्षणीय इत्यखण्डार्थतासिद्धिः एवं विज्ञानानन्दादि-

---

निबन्धः।

पृथुबुध्नोदराकारो घट इत्यनेनापि पृथुबुध्नत्वादिधर्मविशिष्ट एव घटोऽवबुध्यते। अतोऽखण्डार्थत्वाभावात् साध्यविकलो दृष्टान्त इत्याशंक्याह — नच साध्यविकल इति। घटप्रातिपदिकार्थे पृष्टे यद्यन्य एव विशिष्टोऽर्थः प्रतिपाद्यते तदा प्रश्नाननुरूपत्वात् अनुपादेयवचनत्वमेव स्यादित्यर्थः। ननु तर्हि पृथुत्वादीनां घटप्रातिपदिकार्थत्वात् पर्यायतैव स्यादिति आशंक्याह -- न च पृथुत्वादिकमिति। प्रवृत्तिनिमित्तभेद-मन्तरेणैकस्मिन्नर्थे प्रवृत्तिः पर्यायता। प्रकृते तु प्रवृत्तिनिमित्तभेदान्न पर्यायतेत्यर्थः। तर्हि कथमखण्डार्थतालाभ इत्याशंक्याह — तथा चेति। अपर्यायत्वे सति मुख्यया वृत्त्याऽभिधाने प्रश्नाननुरूपत्वप्रसङ्गादनिष्टपृथुत्वादिनिषेधेनैक एव घटप्रातिपदिकार्थे

संबन्धोक्तिः।

दित्युक्ते 'गामानय' इत्यादिवाक्ये व्यभिचारो मा भूदिति विशिनष्टि—लक्षणेति। पृथुबुध्नो-दराकारवाक्येऽप्यखण्डार्थनिष्ठत्वमासिद्धमित्यत आह — न चेति। तर्हि एकेनैव पदेन घटप्रातिपदिकार्थसिद्धेः पदान्तरवैयर्थ्यमित्यत आह — न चेति। (तर्हि घटप्राति-पदिकार्थसिद्धेः पदान्तरवैयर्थ्यमित्यत आह — न चेति।) तर्हि घटप्रातिपदिकार्थप्रति-पत्तौ तेषां क उपयोग इत्यत आह — तथापीति। पृथुत्वादिधर्माणामपि प्रतिपाद्यत्वे तद्विशिष्टस्यानेकरसताप्रसङ्ग इत्यत आह -- उपलक्षणात्मभिरिति। तेषामपृथुत्वादि-धर्मकशरावोदञ्चनादीनां लक्ष्यत्वेनानुशिष्टानां व्यवच्छेदेन स्वलक्षणया घटप्राति-पदिकार्थप्रतिपादन एव तात्पर्यमित्यस्त्येव उपयोग इत्यर्थः। दार्ष्टान्तिकमाह — एवमिति॥

वाक्येऽपि विज्ञानत्वादिसामान्यान्यनिष्ठाविज्ञानादिव्यवच्छेदेन तदाधाररूपामेकामेवानन्दव्यक्तिं ब्रह्मत्वेन लक्षयन्तीति। विपक्षे त्वत्रापि लिलक्षयिषिताद्वितीयार्थासिद्धिप्रसक्तिर्बाधिका ॥

द्वितीयेऽप्यखण्डार्थत्वसिध्यर्थमुच्यते — तत्त्वमसिवाक्यमखण्डार्थनिष्ठम्, अकार्यकरणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणत्वात् सोऽयं देवदत्त इत्यादि-

---

निबन्धः ।

उपलक्षणरूपैः पदार्थैरुपलक्षणीय इत्यतोऽखण्डार्थता सिध्यतीत्यर्थः । दार्ष्टान्तिकमाह — **एवं विज्ञानानन्दवाक्येऽपीति** । अयमर्थः—विज्ञानशब्देन तावद्विज्ञानपरसामान्यमुच्यते । तथाऽऽनन्दशब्देन चानन्दत्वापरसामान्यमुच्यते । अतः प्रवृत्तिनिमित्तभेदान्न पर्यायता। नाप्यखण्डार्थत्वानुपपत्तिः, विज्ञानपदेनाविज्ञानत्वव्यवच्छेदेन लक्षिताया एव व्यक्तेरानन्दपदेनाप्यनानन्दत्वव्यवच्छेदेन लक्ष्यमाणत्वात् । ननु संबन्धानुपपत्तिभ्यां लक्षणं प्रवर्तते ? सत्यम्, इहापि विद्यते संबन्ध आध्यासिकः, एकस्यां स्वप्रकाशसुखव्यक्तौ परापरसामान्याध्यारोपात् । अनुपपत्तिरप्यस्ति मुख्यार्थपरिग्रहे ब्रह्मप्रातिपदिकार्थस्य बुबोधयिषितस्यासंभवादिति युक्तैव लक्षणा । विपक्षबाधकमाह — **विपक्षे त्विति** ॥

एवं तावदवान्तरवाक्यस्याखण्डार्थत्वमुपपाद्येदानीं महावाक्यस्याखण्डार्थत्वमाह — **द्वितीयेऽपीत्यादिना** । समानाधिकरणत्वादखण्डार्थत्वे साध्ये नीलमुत्पलमित्यादौ व्यभिचारः स्यात्, तत्र गुणगुणिभावेन भेदस्य विद्यमानत्वात् । तद्व्यवच्छेदार्थमाह — **द्रव्यनिष्ठत्वे सतीति** । एवमपि हिरण्यं कुण्डलमित्यादौ व्यभिचारः स्यात्तदर्थमाह — **अकार्यकारणात्मकेति** । ननु सोयं देवदत्त इत्यनेन तदेतद्देशकाल-

संबन्धोक्तिः ।

इदानीं महावाक्यस्य अखण्डार्थतासिद्ध्यर्थमाह — **द्वितीयेऽपीति** । समानाधिकरणत्वादित्येवोच्यमाने शुक्लः पटः इत्यादौ व्यभिचारः स्यादिति विशिनष्टि— **द्रव्येति** । तथापि मृद्घटः इत्यादौ व्यभिचारः तदर्थं अकार्यकरणेति । द्रव्यपदं विहाय वस्तुग्रहणे सति नीलो घटः इत्यत्र व्यभिचारः तदर्थं द्रव्येति । (इत्यत आह... **अकार्येति** । अकार्यकारणात्मकवस्तुनिष्ठत्वे सति समानाधिकरणत्वादित्युक्तेऽपि सन् घटः इत्यादौ व्यभिचारमाशङ्क्याह — द्रव्येति ।) कार्यकरणद्रव्यनिष्ठत्वादित्ये॰

**वाक्यवत् । न च साध्यविकलो दृष्टान्तः, तदेतद्देशकालोपलक्षणीयस्य एकस्यैव देवदत्तस्य स्वयं प्रत्यभिज्ञातस्य विभेदविभ्रमनिरासेन परस्मै प्रतिपाद्यमानत्वात्, अपरस्य तत्र कस्याप्यंशस्य विधित्सितस्यासंभवात् । एकत्वस्यापि वस्तुसहभाविनः प्रागेव सिद्धत्वात् । आरोपितभेदाभावमात्रस्य त्वतिरेकिणः प्रतिभासेऽपि**

---

निबन्धः ।

विशिष्टो देवदत्तो बोध्यते । अतस्साध्यविकलो दृष्टान्त इत्याशंक्याह — **न च साध्यविकल इति** । तदेतद्देशकालोपलक्षितो देवदत्तः तत्तद्देशादिभेदकृतभेदभ्रमनिराकरणेन परस्मै प्रतिपाद्यते न तु विशिष्ट इत्यर्थः । ननु उपलक्षणविशेषणयोः को भेदः ? उच्यते-विशेष्ये स्वोपसर्जनतया प्रतीतिमुत्पादयत्तस्य व्यावर्तकं विशेषणम् । यथा—दण्डो देवदत्तस्य । विशेष्यानुपसर्जनतया तस्यान्येभ्यो व्यावर्तकमुपलक्षणं । यथा—काको गृहस्येति । ननु तद्देशादिविशिष्टस्य एतद्देशादिमत्त्वमेव कस्मान्न प्रतिपाद्यते, तत्राह — **अपरस्य तत्रेति** । भेदभ्रमनिवृत्तिव्यतिरेकेणापरस्य कस्यचिदपि वैशिष्ट्यांशस्य बोधयितुमिष्टस्य तत्रासंभवाद्विशिष्टयोः भिन्नत्वादित्यर्थः । तर्ह्यैक्यमेव देवदत्तस्याज्ञातं तेन विज्ञाप्यते, ननु भेदभ्रमनिवृत्तिः प्रमाणफलमित्याशंक्याह — **एकत्वस्यापीति** । पदार्थाभिज्ञासमय एव सिद्धत्वादित्यर्थः । ननु भेदभ्रमनिवृत्तिश्चेत्प्रमाणफलं तर्हि द्वितीय-

संबन्धोक्तिः ।

बोध्यमाने कुण्डे बदराणि इत्यत्र व्यभिचारो मा भूदिति समानाधिकरणत्वादित्युक्तम् । **देवदत्तस्य** तदेतद्देशकालवैशिष्ट्यं तद्देशकालोपलक्षितस्यैतद्देशकालवैशिष्ट्यं वा तत्र प्रतिपाद्यम्, न त्वखण्डैकरसमित्यत आह — **न चेति** । एकश्चेत्प्रतिपाद्यः, तर्हि देवदत्तपदेनैवालमित्यत आह — **तदेतदिति** । कथमेकत्वावगम इत्यत आह — **स्वयमिति** । तस्य प्रत्यक्षसिद्धत्वात् अप्रतिपाद्यत्वमाशङ्क्याह — **भेदेति** । व्यवहिताव्यवहितदेशाभ्यामेकस्य युगपद्वैशिष्ट्यायोगात्, व्यवहितदेशाद्युपलक्षितस्वरूपस्य च एतद्देशकालादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेनाप्रतिपाद्यत्वात् एतद्देशादिविशिष्टस्य च व्यवहितदेशाद्युपलक्षितस्याबुभुत्सिततयाऽप्रतिपाद्यत्वात् उक्तविलक्षणं न किञ्चिदपि प्रतिपाद्यमित्याह— **अपरस्येति** । तर्हि एकत्वमेव प्रतिपाद्यतामित्यत आह — **एकत्वस्येति** । अभिज्ञाप्रत्यक्षेण च एकोऽयं देवदत्त इति सिद्धमित्यर्थः । तथापि नाखण्डैकरसं प्रतिपाद्यम्, भेदशून्यताया अपि प्रतिपत्तेरित्यत्राह — **आरोपितेति** । कथं तर्हि एकरसत्ववाचोयुक्तिः

विरोधाभावात् भावांश एव विभागानभ्युपगमात् । तत्त्वमसिवाक्येऽप्यनयैव दिशाऽखण्डार्थताभ्युपगमादिति । विपर्यये त्वत्रापि विवक्षितार्थासिद्धिर्दूषणमिति सर्वं निर्मलम् ॥

एवमानन्दरूपोऽयं विज्ञानत्वात् स्वयंप्रभः ।
विष्णुरात्माऽऽत्मनः श्रुत्या विमोक्षाय निरूप्यते ॥

---

निबन्धः ।

भेदाभावस्य प्रतिभासान्नाखण्डार्थतासिद्धिरित्याशंक्याह — **आरोपित इति** । सत्य एवास्माभिः भेदो नाभ्युपगम्यते न तु कल्पितोऽपीत्यर्थः ॥

इदानीं दार्ष्टान्तिके योजयति — **तत्त्वमसिवाक्येऽपीति** । तत्त्वमिति सामानाधिकरण्येन तत्त्वंपदार्थयोस्तावदेकत्वमवभासते । तच्च मुख्ययोर्न संभवति । तथा हि — साभासमायोपाधिज्ञानानन्दाद्वितीयं ब्रह्म तत्पदाभिधेयम् । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यादिना प्रकृतस्य जगत्कारणस्य तदा परामर्शात् । त्वंपदेन च साभासकार्यकरणसंघातोपाधिसांसारिकप्रत्यक्चैतन्यमभिधीयते । नच तयोरैक्यं संभाव्यते, विरुद्धधर्माक्रान्तत्वात् । संसर्ग एव तयोर्वाक्येन बोध्यत इति च वक्तुं न शक्यते । मुख्यसामानाधिकरण्ये विरोधाय गौणसामानाधिकरण्यप्रसङ्गाच्च । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः मुख्यं सामानाधिकरण्यम् । भिन्नप्रवृत्तिनिमित्तानां शब्दानां नानारसेऽर्थे वृत्तिर्गौणं सामानाधिकरण्यम् । तस्मात् मुख्यार्थपरिग्रहेऽनुपपत्त्या शबलपदार्थाभ्यां स्वरूपसमारोपितत्वसन्निधिभ्यामेकस्वरूपं लक्ष्यत इत्यर्थः । तदुक्तम् —

संबन्धोक्तिः ।

इत्यत्राह — **भावांश इति** । दार्ष्टान्तिकमाह — **तत्त्वमसीति** । इति नाखण्डार्थत्वविरोध इति शेषः ॥

उक्तार्थोपसंहारव्याजेन मोक्षवादं प्रस्तौति — **एवमिति** । आनन्दरूपत्वेऽपि तदनुभवाभावात् अपुरुषार्थत्वमाशङ्क्याह — **स्वयंप्रभ इति** । तस्य हेतुः — **विज्ञानत्वादिति** । विष्णोरेवंभूतत्वेऽपि श्रोतुः किमायातमित्यत्राह — **आत्मेति** । ननु श्रुतेस्तत्र तात्पर्यं नास्तीत्याशङ्क्य, मैवम्, तत्प्रतिपादनस्य फलवत्त्वेन तात्पर्यवत्त्वादित्याह — **विमोक्षायेति** ॥

कः पुनरयं मोक्षो नाम? नित्यनिरतिशयसुखाभिव्यक्त्यात्मा निश्शेषदुःखोच्छेदः। स चाविद्यास्तमय एव। न ह्यविद्यातोऽन्या स्वसंवेदनस्य सुखस्यानभिव्यक्तिर्नाम। साऽपि कथमनभिव्यक्तिरिति चेत्, अभिव्यक्ति-कार्यस्य 'अस्ति, प्रकाशते' इति व्यवहारस्य प्रतिबन्धेन तद्विरुद्धस्य 'नास्ति,

---

निबन्धः।

"सामानाधिकरण्यं च विशेषणविशेष्यता।
लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यगात्मनाम्॥"

इति। इदानीं आत्मनिरूपणस्य मोक्षफलत्वं दर्शयत्यनेन श्लोकेन—**एवमानन्द-रूपोऽयमित्यादिना**॥

इदानीं मोक्षस्वरूपं पृच्छति—**कः पुनरिति**। उत्तरमाह—**नित्य-निरतिशय इति**। एवंविधश्च मोक्ष उत्पाद्यत्वादिधर्मको न भवति। किंचाविद्या-निवृत्तिरेवेत्याह—**सा चाविद्यास्तमय इति**। उक्तं हि—

"एकात्माप्रतिपत्तिर्या स्वात्मानुभवसंश्रया।
साऽविद्या संसृतेर्बीजं तन्नाशो मुक्तिरात्मनः॥"

नन्वभिव्यक्तिव्यावृत्तिरनभिव्यक्तिः। सा कथमविद्यानिवृत्तिरित्याशंक्याह—**न ह्यविद्यातोऽन्य इति**। यस्य हि स्वसत्तैवाभिव्यक्तिः कथं तस्यान्या वास्तवी स्यादनभिव्यक्तिः। नहि प्रकाशस्वभावे सवितरि वस्तुतः तमः संभवति यदि प्रमाणतो न संभवति। पूर्ववाद्याक्षिपति—**सापि कथमिति**। अभिव्यक्त्यभावो हि अन-भिव्यक्तिः। नचाविद्या भवतामभाव इति भावः। परिहरति—**अभिव्यक्ति-कार्यस्येत्यादिना**। प्रतिबन्धो नाम स्वप्रकाशत्वेनान्योऽस्ति प्रकाशते चेति प्राप्तव्यव-हारस्य प्रागभावस्थिरीकरणम्। यथास्त्यग्न्यङ्गुलिसंयोगे प्राप्तस्य स्फोटादिकार्यस्य मन्त्रादिना

संबन्धोक्तिः।

इदानीं मोक्षस्वरूपं निरूपयितुं पृच्छति—**कः पुनरिति**। उत्तरमाह—**नित्येति**। नन्वविद्यानिवृत्तिस्त्वन्मतेऽपि मुक्तिरित्यत आह—**स चेति**। उक्तमेवो-पपादयति—**न हीति**। नन्वविद्या कथमनभिव्यक्तिः? अनभिव्यक्तेरभिव्यक्त्य-भावत्वादिति चोदयति—**सापीति**। इह नञर्थो नाभावः, किन्तु तद्विरुद्धत्वमिति

न प्रकाशते ' इति व्यवहारस्य कारणत्वात् । कार्यविरोधं पुरस्कृत्य पर्युदासेन न तु प्रसज्यप्रतिषेधाभिप्रायेण, स्वसंवेदनस्य नित्यस्य तदसंभवात् ॥

एवं दुःखमपि स्वात्मनि न स्वाभाविकं भवति, आनन्दस्वभावविरोधात् । नाप्यागन्तुकं वास्तवं, अद्वैते कारणान्तरासंभवात् । ' द्वितीयाद्वै भयं भवति ' इति श्रुतेः । कार्याणां चागन्तुकानां तदधीनत्वनियमात् । तस्मादाध्यात्मिकादिदुःखत्रयमप्यविद्यात्मकमेव । न च कारणनिवृत्तिमन्तरेणापि

---

निबन्धः ।

प्रतिबन्धो नाम प्रागभावस्थिरीकरणम् । अभिव्यक्तिकार्यविरोधित्वादभिव्यक्तेरन्याऽनभिव्यक्तिरिति परित्यागेन पर्युदासेनाविद्यानभिव्यक्तिशब्देनोच्येत इत्युक्तं; न त्वभिव्यक्त्यभावोऽनभिव्यक्तिरित्यभिप्रायेणेत्याह — नतु प्रसज्येति । ननु कथं नित्यसंवित्क्रियेऽविद्या संभवति? यदि प्रमाणतो न संभवति तदभ्युपगम्यत एव । यदि प्रतीतितो न संभवतीत्याक्षेपस्तदाह — न जानामीति । आद्ये अनुभवविरोधः । प्रपञ्चितमिदमन्यत्र ॥

एवं सुखानभिव्यक्तेरविद्यात्मकत्वं प्रसाध्येदानीं दुःखाभासस्यापि अविद्यात्मकत्वं साधयितुमुपक्रमते — एवं दुःखमप्यात्मनीत्यादिना । अद्वैते वस्तुनि द्वितीयं दुःखकारणं नास्तीत्यत्र प्रमाणमाह—द्वितीयाद्वै भयं भवतीति । न च तदस्तीत्यर्थः । कारणं विनापि वास्तवदुःखं भविष्यतीत्याशंक्याह — कार्याणाञ्चेति । यस्मात्

संबन्धोक्तिः ।

विरोधप्रदर्शनपुरस्सरं दर्शयति — अभिव्यक्तीति । तत्र हेतुमाह — स्वसंवेदनस्येति ॥

भवत्वेवं सुखाभिव्यक्तेः अविद्यानिवृत्तिरूपता; दुःखनिवृत्तेस्तु तदात्मकता कथम् इत्याकाङ्क्षायां दुःखं स्वाभाविकम्, आगन्तुकं वेति विकल्पपुरस्सरं दुःखस्य अविद्यात्मकत्वं प्रसाध्य तन्निवृत्तेरपि अविद्यानिवृत्तिरूपतां प्रदर्शयति — एवमिति । अद्वितीयत्वमेव कथमित्यत्राह — द्वितीयादिति । ' अभयं वै ब्रह्म ' इति श्रुतेः ब्रह्मणो निर्भयत्वावगमात् भयकारणं द्वैतं ब्रह्मणि श्रुत्या निषिध्यत इत्यर्थः । तथाऽप्यविद्याकार्यतयाऽविद्यात्मकत्वं कुत इत्यत्राह — कार्याणामिति । तथाप्यविद्यानिवृत्तिव्यतिरेकेण

कार्यस्यात्यन्तिकी निवृत्तिर्भवति। तस्मादविद्यानिवृत्तिरेवानतिशयसुखाभिव्यक्तिरशेषानर्थनिवृत्तिश्चेति गीयते। अनभिव्यक्तिपदवेदनीयाविद्यानिरासात्मकत्वादशेषानर्थनिष्पादकतदुपादाननिवृत्त्यात्मकत्वाच्च ॥

भवत्वेवं अविद्यास्तमयो मोक्षः, भवतु चायमशेषदुःखोच्छेदरूपत्वात् पुरुषार्थः। सुखस्वभावस्त्वत्र कथं पुरुषार्थः स्यात्? आत्मातिरेकिण एव तस्य तथा दर्शनात्। न, प्रतीचः प्रकाशमानस्य अनतीतस्य तथाभावात् व्यतिरेकस्या-

---

निबन्धः।

स्वाभाविकं आगन्तुकं वा दुःखं न संभवति वास्तवं तस्मादित्युपसंहारः। आध्यात्मिकं दुःखज्वरपीडादि। आधिदैविकं विद्युत्प्रपातातिशीतातिवातादि। आधिभौतिकं व्याघ्रचोरादिकृतमित्यर्थः। ननु भवत्वविद्याविवर्तो धर्मोपस्थापितं दुःखमविद्यात्मकमेव, तथापि अविद्यानिवृत्तिव्यतिरेकेणैव तन्निवृत्तिर्भविष्यति इत्यतो नाविद्यास्तमय एव दुःखोच्छेद इत्याशंक्याह——न च कारणनिवृत्तिमिति। उपसंहृते अर्थे हेतुमाह—अनभिव्यक्तीति। अनभिव्यक्तिपदवेदनीया याऽविद्या तन्निवृत्तिरूपत्वात् सुखाभिव्यक्तेः। तथाऽशेषानर्थस्य निष्पादकं यत्तदुपादानं तन्निवृत्तिरूपत्वादात्यन्तिकदुःखोच्छेदस्येत्यर्थः ॥

इदानीं दुःखाभाव एव मोक्षः पुरुषार्थ इति मत्वा सुखभोगस्यापुरुषार्थत्वं शंकते वैशेषिकः— भवत्वेवमित्यादिना। अहं सुखीति स्वातिरिक्तस्यैव सुखस्य पुरुषार्थत्वदर्शनान्न स्वरूपसुखं पुरुषार्थः इत्यर्थः। सुखापरोक्षं पुरुषार्थो ननु

संबन्धोक्तिः।

संसारदशायामिव दुःखस्य निवृत्तिः किं न स्यादित्यत्राह — न चेति। स्वसमानाधिकरणदुःखप्रागभावासमानकालीना दुःखनिवृत्तिः आत्यन्तिकशब्देनेह विवक्ष्यते। अतः सिद्धमस्मदुक्तमित्युपसंहरति—तस्मादिति। उक्तमेव हेतुद्वयं स्मारयति—अनभिव्यक्तिरिति ॥

दुःखनिवृत्तेः मोक्षपुरुषार्थत्वमङ्गीकृत्य सुखस्य पुरुषार्थतां निराचष्टे — भवत्विति। काऽनुपपत्तिरित्यत्राह — आत्मातिरेकिण इति। परिहरति — नेति। प्रतीच इत्यन्यसंबन्धित्वं निराचष्टे। तन्मते प्रत्यग्भूतत्वं सुखस्य संसार-

प्रयोजकत्वात्, अन्यथा परसुखस्यापि पुमर्थत्वप्रसङ्गात्। आत्मसमवेतं तत् तथेति चेत्, न, अतीतस्यापि तस्य तथात्वापत्तेः। अनतीतमात्मसमवेतं तथेति चेत्, न, समवायस्य संबद्धासंबद्धविकल्पासहत्वेन दुर्निरूपत्वात्। संबद्धत्वे

---

### निबन्धः ।

व्यतिरेक इति मन्वानस्समाधत्ते — **न प्रतीच इत्यादिना** । अतिरेकश्चेत्पुरुषार्थ-प्रयोजकः तदा परकीयमपि सुखं पुरुषार्थः स्यादिति अतिप्रसङ्गं परिहरति — आत्म-समवेतं सुखं पुरुषार्थ इति चेद्भवति तर्ह्यतीतस्यापि सुखस्य पुरुषार्थत्वमापद्येत इत्याह — **नातीतस्यापीति** । पुनरपि विशिनष्टि — **अनतीतमिति** । तदपि न शक्यते वक्तुमज्ञातस्यापि प्रसङ्गात् । अथ प्रकाशोऽप्यपेक्ष्यते तर्हि प्राप्ताप्राप्तविवेकेनापरोक्ष-सुखप्रकाश एव पुरुषार्थे समवायमात्रेण प्रकाशोऽपि न संभाव्यते मनसाऽऽत्मगत-परिमाणादेरग्रहणात् । किंच समवायोऽपि नास्तीत्याह — **समवायस्येत्यादिना** । समवायः किं समवायिभ्यां संबद्धः उतासंबद्धः ? उभयथापि न निरूपयितुं शक्यत इत्यर्थः । तत्र संबन्धपक्षे दोषमाह — **संबद्धत्व इत्यादिना** । समवायस्य

### संबन्धोक्तिः ।

दशायामपि विद्यते । तथापि तदविद्यावृतं न पुरुषार्थ इत्यत्र आह — **प्रकाशेति** । तथाऽपि 'सुखमहमस्वाप्सम्' इत्यात्मविशेषणतया प्रत्यभिज्ञाप्रत्यक्षस्य सुखस्याती-तत्वेन पुरुषेणानर्थ्यमानत्ववत् मोक्षसुखस्यापि अपुरुषार्थत्वमाशङ्क्याह — **अनतीत-स्येति** । अनतीतेत्येवोच्यमाने परसुखस्यापि वर्तमानस्य पुरुषार्थता स्यादित्यत आह — **प्रकाशमानस्येति** । तथापि योगात् परसुखस्य साक्षात्क्रियमाणस्येव अपुरुषार्थता-प्रसक्तिमाशङ्क्याह — **प्रतीच इति** । लोके सुखं मे स्यात् इति सर्वेषामभिसन्धि-दर्शनात् पुरुषार्थत्वान्वयव्यतिरेक एष्टव्य इत्यत आह — **व्यतिरेकस्येति** । विपक्षे दोषमाह — **अन्यथेति** अतिप्रसङ्गदोषं परिहरति पूर्ववादी — **आत्मेति** । आह सिद्धान्ती — **नेति** । अनतीतत्वमपि तर्हि विशेषणमस्त्विति शङ्कते — **अनतीतमिति** । अन्यासंबन्धमपरोक्षं सुखं न पुरुषार्थः । तथात्वे स्वसंबन्धिताभावापराधेनापुरुषार्थत्वा-दर्शनात् इति केवलव्यतिरेकाभावात् इति परिहारसंभवेऽपि तत्स्पष्टमिति मत्वा तदवधीर्य परिहारान्तरमाह — **न समवायस्येति** । विकल्पासहत्वमेव विशदयति — **संबद्धत्व इति** ।

प्रत्यक्षपराहतसंबन्धपरंपराप्रसङ्गात् । संबन्धिनोर्विभक्तयोरविच्छेदेन प्रत्यक्षयोः संबन्धस्याप्रत्यक्षतानुपपत्तेः । असंबद्धत्वे च तयोरयमिति व्यवस्थानुपपत्तेः । निरूप्यनिरूपकभावस्य च संबन्धान्तरगर्भत्वात् । अन्यथा सौधसितिम्नोऽपि परिणतताळफलकालिम्ना निरूपणापातात् । नाशस्यापि नाशिनां तदीयतया अध्यस्तस्यैव निरूपणमित्यव्यभिचारात् ॥

तस्मात् प्रत्यक्षप्रकाशमानमनतीतं सुखं पुरुषार्थ इति वाच्यम् ।

---

## निबन्धः ।

समवायिभ्यां संबन्धान्तराभ्युपगमे तस्यापि संबन्धान्तरस्यापरं संबन्धान्तरं वक्तव्यमिति प्रत्यक्षपराहता संबन्धपरंपरा प्रसज्येतेत्यर्थः । संबन्धस्याप्रत्यक्षत्वान्न प्रत्यक्षपराहति-रित्याशंक्याह -- **संबन्धिनोरिति** । संबन्धिनोस्सुखात्मनोर्भिन्नयोः सुख्यहमित्य-वच्छेदेन दण्डीतिवत् संसृष्टत्वे प्रत्यक्षयोः सतोः संबन्धस्याप्रत्यक्षत्वानुपपत्तेरित्यर्थः ॥

इदानीमसंबद्धत्वपक्षे दूषणमाह — **असंबद्धत्वे चेति** । समवायस्य समवायिभ्यां संबन्धाभावे तयोस्समवाय इति कस्मात्? अन्यस्य किं न स्यादित्यर्थः । इतश्चासंबन्धपक्षोऽनुपपन्न इत्याह — **निरूप्य इत्यादि** । विद्यते निरूप्यनिरूपकभावो नाशनाशिनोः संयोगादिसंबन्धमन्तरेणापीत्याशंक्याह -- **नाशस्यापीत्यादिना** । यस्मात्समवाय एव निरूपयितुं न शक्यते तस्मान्नात्मनि सुखस्य समवायः पुरुषार्थत्वोपयोगीत्युपसंहरति -- **तस्मादिति** । अनतीतमतीतादन्यद्वर्तमानमनागतं वा

## संबन्धोक्तिः ।

परंपरायां दूषणमाह— **प्रत्यक्षेति** । ननु विद्यमानस्य अनुभवनियमाभावात् संबन्धपरंपरा-ननुभवो न दोषाय इत्यत्राह — **संबन्धिनोरिति** । मिथो मिश्रीभूतक्षीरनीरसंबन्ध-व्यवच्छेदार्थं विविक्तयोः इति विशेषणम् । गन्धतद्वतोर्विविक्तयोरपि गन्धे तद्वति वा गृह्यमाणे क्वचित् तत्संबन्धाप्रत्यक्षवदप्रत्यक्षत्वं किं न स्यात् इत्यत्राह — **अविच्छेदे-नेति** । संबन्धिनोरप्रत्यक्षत्वे संबन्धस्य प्रत्यक्षत्वं न सिध्यतीत्यत्राह — **प्रत्यक्षयोरिति** । द्वितीयविकल्पे दूषणमाह — **असंबद्धत्व इति** । तन्निरूप्यनिरूपकत्वं व्यवस्थाहेतुः इत्यत्राह — **निरूप्येति** । विपक्षे दोषमाह — **अन्यथेति** । नन्वभावे व्यभिचार इत्यत्राह — **नाशस्येति** । तत्राप्यनिर्वचनीयो मूलसंबन्धो विद्यत इत्यर्थः ॥

अतः पुरुषार्थत्वप्रयोजकमेतदेव इत्युपसंहरति — **तस्मादिति** । अनतीत-

वर्तमानेऽपि प्रमानुवृत्तेरनागतस्य चार्थ्यमानतया पुरुषार्थत्वात् । एतावता चोपपत्तौ किमतिरेकग्रहणेन ? दर्शनकथंतासंबोधमन्तरेण द्रष्टृत्वादेव तदाश्रयणे दुःखानुषङ्गोऽपि सर्वपुरुषार्थानुबन्धी तत्त्वे प्रयोजकः स्यात् । ततश्च न जात्वयं मोक्षाय प्रवर्तेत । अत्यल्पमिदमुच्यते; स्वर्गार्थमप्ययं न प्रवर्तेत, ऐहिकस्यैव पुरुषार्थत्वदर्शनात् । आमुष्मिकं सुखं भवदप्यपुरुषार्थो न दृश्यत इति चेत्, प्रत्यक्प्रकाशमानमनतीतं सुखं भवदप्यपुरुषार्थः क्व दृश्यते? येनातिरेकोऽप्यपेक्ष्यते ॥

तत्सिद्धमेतत् विवादाध्यासितः पुरुषार्थः प्रत्यक्प्रकाशमानानतीता-

---

निबन्धः ।

सुखं पुरुषार्थ इत्यत्र हेतुमाह — वर्तमानेत्यादिना । प्रमाणान्तराविरुद्धो निरुपाधिकप्रेमगोचरः पुरुषार्थः । पुरुषेणार्थ्यमानो वा पुरुषार्थ इत्यर्थः । इदानीं व्यतिरेकस्य पुरुषार्थोपयोगित्वेन ग्रहणं व्यर्थमित्याह — एतावता चेति । ननु यत्नानन्दः पुरुषेणार्थ्यते तत्र सर्वत्र लोके व्यतिरेकस्य दृष्टत्वात्सोऽपि पुरुषार्थोपयोगीत्याशंक्याह — दर्शनकथन्तेति । किंचात्यल्पमिति तुच्छत्वमिदमुच्यते । लोके भेदस्य दृष्टत्वान्मोक्षेऽपि न भेदेन भवितव्यमिति कथमित्यत आह — स्वर्गार्थमपीति । स्वर्गस्यापुरुषार्थत्वस्यादर्शनात्प्रवृत्तिः घटत इत्याह — आमुष्मिकमिति । समरसमाधिरित्याह — प्रत्यक्प्रकाशमानमिति ॥

उक्तार्थे प्रमाणं निगमयति — तत्सिद्धमेतदित्यादिना । आनन्दत्वादित्युक्तेऽतीते व्यभिचारः स्यात्तदर्थमनतीतग्रहणम् । परकीयानन्दे व्यभिचारपरिहारायाह —

संबन्धोक्तिः ।

मिति विशेषणस्य व्यावर्त्यं दर्शयति — वर्तमानेऽपीति । तथापि व्यतिरेकोऽपि प्रयोजकोऽस्तु, लोके व्यभिचाराभावात् इत्यत्राह — एतावतेति । दूषणान्तरमाह — दर्शनेति । ततः किमित्यत आह — ततश्चेति । दूषणान्तरमाह — अत्यल्पमिति । केवलव्यतिरेकाभावात् मैवमिति शङ्कते पूर्ववादी — आमुष्मिकमिति । तुल्यमेतत्प्रकृतेऽपीत्याह सिद्धान्ती — प्रत्यगिति ॥

उक्तमर्थं प्रयोगेणोपनिबध्नाति — तदित्यादिना । एतदर्थविवक्षयैवानन्द-

नन्दत्वात्, तादृग्विषयानन्दवत् इति। तस्मादानन्दसंकीर्तनमप्यत्र सोपयोगमेव। अन्यथा सकलदुःखोच्छेदवत् सकलसुखोच्छेदस्यापि संभवात् अप्रवृत्तिरेवात्र प्रेक्षावतां भवेत्। अत्यन्तदुःखोद्विग्नानां भवेदेवात्र प्रवृत्तिः, मरण इव पृथग्जनानामिति चेत्, मैवम्, दृष्टान्तवैषम्यात्। तीव्रपापरोगग्रस्तां दुःखमयीमिव मूर्तिमुद्वहन्तः सुखलेशमप्यलभमानास्तथा प्रवर्तन्तां नाम। संसारिणः पुनरल्पदुःखानुविद्धमनेकविधमपि हैरण्यगर्भाद्यानन्दं लभमानाः कथं तथा निर्विषयमोक्षे प्रवर्तेरन्? न ह्यजीर्णभयादाहारपरित्यागः, भिक्षुकभयाद्वा स्थाल्यनधिश्रयणम्, यूकाभयाद्वा परिधानविमोकः शीतार्तस्येति। तस्मात्,

---

## निबन्धः।

**प्रत्यक्प्रकाशमानमिति**। अपरोक्षतया प्रकाशमानानन्दत्वादित्यर्थः। विपक्षे दोषमाह—**अन्यथेत्यादिना**। दुःखोच्छेदस्य संभवोद्घटते प्रवृत्तिः बुद्धिमतामित्याह—**अत्यन्तदुःखोद्विग्नानामिति**। पृथग्जनानामतिरोगगृहीतप्राकृतजनानामित्यर्थः। परिहारः स्पष्टार्थः। ननु हैरण्यगर्भादिभोगस्य क्षयो भविष्यतीति भीत्या तत्परित्यागेन मोक्षे प्रवृत्तिः भविष्यतीत्याशंक्याह — **न ह्यजीर्णभयादिति**। पदार्थं श्लोकेन उपसंहरति— **तस्मादिति**॥

## संबन्धोक्तिः।

पदमाद्यश्लोके प्रयुक्तमित्याह— **तस्मादिति**। सकलदुःखोच्छेदरूपत्वादेव मोक्षस्य पुरुषार्थता किं न स्यादिति नैयायिकमतमाशङ्क्याह— **अन्यथेति**। शङ्कते— **अत्यन्तेति**। पृथग्जनाः शास्त्रासंस्कृतमतयः। तत्र सुखलेशस्याप्यप्राप्तिनिश्चयात् प्रवृत्तिः; इह तु यज्ञदानादिक्रियाभिः संपादितविविधानन्दोपभोगिनां तद्विरहिणि मोक्षे प्रवृत्तिरनुपपन्नेत्याह— **मैवमिति**। सुखाभावे कारणमाह— **दुःखमयीति**। ननु सांसारिकं सुखं दुःखपक्षनिक्षिप्तमेव, दुःखमिश्रत्वात् विषकबलितवत् इत्याशङ्क्य, मैवम्, इह दुःखादभ्यधिकस्यैव विविधस्य सुखस्य लाभसंभवात् इति सदृष्टान्तमाह— **न हीति**। ततो यदुक्तम् 'अविद्यास्तमयो मोक्षः' इति, तदुपपन्नमेवेति श्लोकेनोपसंहरति— **तस्मादिति**। आत्मस्वभावस्यानतिशयस्य सुखस्याविद्यावच्छिन्नत्वात् दुःखस्य च आत्मनि अविद्याकृतत्वात् तन्निवृत्तौ उभयविधपुरुषार्थः संभवतीत्यर्थः॥

अविद्यास्तमयो मोक्षो नित्यानन्दप्रतीतितः ।
निश्शेषदुःखोच्छेदाच्च पुरुषार्थः परो मतः ॥

स चायं केवलज्ञानसाध्यः स्यात्, अविद्यास्तमयत्वात् रज्ज्वविद्यास्तमयवदिति। न हि रज्जुसाक्षात्कारेऽपि तदविद्यास्तमयः कदाचिद्विलम्बते, येन तत्र सहकार्यन्तरापेक्षा अभ्युपेयेत । विपर्यये तु यन्मात्रात् यज्जातीयं दृष्टं तज्जातीयस्यैव कदाचित् तदतिरिक्तादप्युपपत्तौ तस्य कारणलक्षणं व्याहन्येत, व्यतिरेकासंभवात् । तस्मादद्वैतात्मसाक्षात्कार एव मोक्षकारणम् । अत एवोक्तं 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति । 'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते' इति, 'ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते' इति च ।

---

निबन्धः ।

स च मोक्षः केवलज्ञानलभ्यः किंवा समुच्चितलभ्यः इति सन्देहे सिद्धान्तेनैव प्रक्रमते - **स चायमित्यादिना** । दृष्टान्तस्य साध्यवैकल्यं परिहरति –**नहीत्यादिना** । ननु रज्ज्वविद्यास्तमयः केवलज्ञानाद्भवतु । मोक्षे त्वविद्यास्तमयः केवलज्ञानान्न भविष्यति । को दोष इत्याशंक्याह — **विपर्यये त्वित्यादिना** । यावन्मात्रात्कारणाद्यादृशं कार्यं दृष्टं तादृशस्यैव कदाचित्कारणान्तरादप्युत्पत्तौ तस्य कारणलक्षणं व्याहन्येत, तस्मिन् असति न भवतीति व्यतिरेकाभावात् । इह च सर्वत्रैवाविद्यास्तमयः केवलज्ञानात् दृष्टः । यदि मोक्षे केवलज्ञानं न स्यात्तदाऽन्वयव्यतिरेकाभ्यामवगतं यदविद्यानिवृत्ति-

संबन्धोक्तिः ।

एवं मोक्षस्वरूपं प्रदर्श्य सांप्रतं तत्साधनं निरूपयति—**स चेति** । केवलेति विशेषणं केवलकर्मणां समुच्चितानां विज्ञानाभ्यासस्य च साधनत्वव्यावृत्त्यर्थम् । दृष्टान्तस्य साध्यवैकल्यं परिहरति — **नहीति** । विपक्षे बाधकतर्कं दर्शयति — **विपर्यये त्विति** । दृष्टमिति प्रमाणसिद्धस्योपलक्षणम् । अन्यथा श्रुत्यादिप्रमाणप्रतिपन्नस्य कारणत्वव्याकोपप्रसङ्गात् । कथमित्यत आह — **व्यतिरेकेति** । तावन्मात्रस्यैव कारणत्वाध्यवसाये तदतिरिक्तस्यापि कारणतायां तस्यैव कारणत्वं केवलव्यतिरेकाभावान्न सिद्ध्येदित्यर्थः । उक्तेऽर्थे श्रुतिस्मृती प्रमाणयति — **अत एवोक्तमिति** ॥

कर्मणां पुनरधिष्ठाननिकटोपसर्पणादिवत् परंपरयैवोपयोगः। तथा च श्रूयते 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति। विविदिषासाधनत्वेन कर्मणामुपयोगो न तु साक्षान्मोक्ष इत्यर्थः। 'अश्वेन जिगमिषति' इतिवत् व्याख्यानेऽपि वेदनसाधनतैव स्यात् न तु मोक्षसाधनता। स्मर्यते च —

---

निबन्धः।

हेतुत्वं तस्य ज्ञानस्य तद्विरुध्यते इति भावः। इदानीमागमोपि प्रमाणमित्याह — **अत एवोक्तमित्यादिना**॥

तर्हि किं सर्वथैव कर्मणामनुपयोग इत्याशंक्याह — **कर्मणां पुनरिति**। यथा दूरवर्तिनीं रज्जुं सर्पं मन्यमानस्य निकटोपसर्पणलक्षणं कर्म संप्रयोगद्वारेण तत्त्वज्ञानोत्पत्तावुपयुज्यते, तथाऽग्निहोत्रादीनां कर्मणामपि सत्वशुद्धिपरंपरया तत्त्वज्ञानोत्पत्तावुपयोग इत्यर्थः। परंपरयोपयोगे प्रमाणमाह — **तथाचेत्यादिना**।

सुबन्धोक्तिः।

ननु 'तमेतं वेदानुवचनेन' 'कर्मणैव हि संसिद्धिम्' इत्यादिश्रुतिस्मृतिशतैः कर्मणामपि मोक्षसाधनत्वं प्रतीयत इत्यत आह — **कर्मण इति**। कुत एतदित्यत आह — **तथा चेति**। श्रुतेरर्थमाह — **विविदिषेति**। ननु 'विविदिषन्ति' इति वर्तमानापदेशे साध्यसाधनभावानवगतौ आनर्थक्यप्रसङ्गात्; अपूर्वार्थत्वेन च विद्यास्तुतित्वानुपपत्तेः विधिपरमिदं वाक्यम्; सविधिके च वाक्ये विध्यवच्छिन्नभावनारूपवाक्यार्थानुप्रवेशपूर्वक एव पदानां परस्परसंबन्धः; अन्यथा 'दध्ना होमः' इतिवत् विध्यसंस्पर्शेन आनर्थक्यस्य तादवस्थ्यं स्यात्। सा च भावना 'तमेतम्' इति पदान्तरोपात्तात्मस्वरूपावस्थानलक्षणमोक्षभाव्यावच्छिन्ना; न पुनर्धात्वर्थ एव भाव्यभावं भजते, तस्यासमीहितत्वात्; तथा च अन्यार्थप्रवृत्तभावनाभाव्यत्वलक्षणः करणभाव एव भावनायां धात्वर्थस्य। तथा च लब्धश्रौतवेदनलक्षणधात्वर्थकरणिकायां भावनायां वेदानुवचनयज्ञादीनां करणत्वेनानुप्रवेशासंभवात् तदपेक्षितकरणोपकारद्वारेण तेषां संबन्धः। तेन वेदनं वेदानुवचनादिभिरुपकुर्यादिति वाक्यार्थः संपद्यते, न पुनः विविदिषासंयोगो वेदानुवचनादीनाम् इत्यत आह — **न तु साक्षादिति**। अयं भावः — श्रुत्यन्तरसिद्धशमाद्यङ्गनिबन्धनोपकारैरपेक्ष्यात् तद्द्वारेण वेदानुवचनादीनां

'धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते' इति ।

'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः ।
कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ॥' इति ।

'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥'

---

निबन्धः ।

नन्वश्वेन जिगमिषति इत्यत्र नाश्वस्य करणस्येच्छयाऽन्वयः । किन्तु फलेन । तथाऽत्रापि विविदिषन्तीति सन्वाच्येच्छया न करणयज्ञादीनामन्वयः । किन्तु फलेन मोक्षेणेत्याशंक्याह —**अश्वेन जिगमिषतीतिवदिति** । तत्रापि अश्वस्येष्यमाणगमनक्रियासाधनत्वमेव नतु ग्रामप्राप्तिसाधनत्वं, गमनस्यैव तत्र निरपेक्षकारणत्वात्तथेहापि इष्यमाणज्ञानसाधनत्वमेव यज्ञादीनां, नतु मोक्षसाधनता, श्रुतेः भङ्गप्रसङ्गादिति । ग्रन्थशेषस्त्वतिरोहितार्थः ॥

अवताद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुरासुरनराकारमधुपार्चितपङ्कजः ॥

अनुभूतिस्वरूपाख्यो यतिश्चक्रे निबन्धनम् ।
प्रमाणरत्नमालाया विद्वदानन्ददायकम् ॥

इति अनुभूतिस्वरूपाख्ययतिना प्रणीता
प्रमाणरत्नमालाव्याख्या संपूर्णा ॥

---

संबन्धोक्तिः ।

संबन्धानुपपत्तौ विधेयधात्वर्थकरणभावद्वारेणैव वेदानुवचनादेः भावनानुप्रवेशात् । एवं च 'वेदानुवचनेन' इति तृतीयाया मुख्यसाधकतमार्थतोपपत्तेः; उपकृत्येति च व्याख्याने साध्याहारयोजनापातात् इति । यत्तूच्यते — नेच्छाया वेदानुवचनादिभिः संबन्धः, किन्तु इष्यमाणस्य वेदनस्यैवेति, तत्राह — **अश्वेनेति** ॥

इत्थं समुत्थिते परम्परासंबन्धे प्रमाणमाह — **स्मर्यते चेति** । एक इति

इति च । निषिध्यते च साक्षात्कारणभावः कर्मणाम् — 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति । एके संसारविरक्ताः अमृतत्वमानशुः । केन? कर्मादित्यागेन, न तु कर्मादिनेति योजना । न तु एके त्यागेन अपरे त्वन्यथा यान्ति । 'नान्यत्र सर्वसंत्यागात् मोक्षं विन्दन्ति मानवाः' इत्यादिविरोधप्रसङ्गात् । त्यागस्य च विज्ञानद्वारेणैव मोक्षकारणताऽभिमतेति 'ज्ञानादेव तु कैवल्यम्' इत्यादेरविरोध एव । अत एवोक्तम् —

'अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ।
ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ॥'

केवलस्य तु त्यागस्य ब्रह्मलोकप्राप्तिहेतुतैवेति 'संन्यासाद्ब्रह्मणः स्थानम्' इत्यादिवचनादवसेयम् ॥

ये तु विज्ञानकर्मणोः समुच्चयाय पठन्ति —

'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥'

इति, तदप्येकैकनिन्दयाऽपि क्रमसमुच्चयपरमेव, अविद्यया मृत्युं तीर्त्वा पश्चात्

---

संबन्धोक्तिः ।

केषांचिदेव ग्रहणात् अपरेषां कर्मभिः अमृतत्वप्राप्तिरुक्ता इत्याशङ्क्य विवक्षितार्थे श्रुतिं योजयति — **एक इति** । कथं निर्णीयत इत्यत्राह — **नान्यत्रेति** । तर्हि त्यागस्यापि मोक्षसाधनत्वात् ज्ञानस्यैव मोक्षसाधनत्वमिति नियमो भज्येतेत्यत्राह — **त्यागस्य चेति** । तत्र संवादिकां श्रुतिमुदाहरति — **अत एवेति** । सङ्गत्यागस्य पूर्वकालता मार्गणलक्षणवेदनस्य चोत्तरकालता छित्वा इति क्त्वाप्रत्ययेन अधिगम्यत इत्यभिप्रायः । केवलस्य त्यागस्य फलान्तरसाधनत्वावगमादप्येवमित्याह — **केवलस्येति** ॥

इदानीं ज्ञानकर्मसमुच्चयप्रतिपादकवाक्यानां गतिं वक्तुं तान्युदाहरति—

विद्ययाऽमृतमश्नुते इति पौर्वापर्यश्रवणात् । सह वेदेति वेदन एव सहत्वश्रवणात् । केवलविद्यानिन्दा तु प्राचीना अपरिपक्वविद्याविषया भविष्यति ॥

अत्रैषा अक्षरयोजना-अन्धं तमः संसारं प्रविशन्ति, ये अविद्यामूलत्वात् विद्याविपरीतत्वाद्वा अविद्यां कर्म उपासते आद्रियन्ते अनुतिष्ठन्तीत्यर्थः । ततः तस्मादपि तमसः भूय इव बहुतरमिव ते तमः प्रविशन्ति ये उ ये तु विद्यायां अपरिपक्वात्मज्ञानलक्षणायां रताः आसक्ताः, तन्मात्रेण कृतकृत्यंमन्याः यथास्वविहिताशेषकर्मत्यागिन इत्यर्थः ॥

एतदुक्तं भवति — विद्यायाः परिपाकात्प्रागेव यथास्वविहितं नित्यादिकर्म त्यजन्ति तेषामुपात्तदुरितक्षयाभावात् विहिताकरणनिमित्तस्य च पाप्मनः प्रत्यहमुपचीयमानत्वात् अशुद्धान्तःकरणानां विद्यापरिपाकस्य शुभविषयप्राप्तेरपि कारणाभावेनासंभवात् आत्यन्तिकः सद्य एव पातः स्यादिति । कस्तर्हि अमृतत्वं भजतीत्यत आह — विद्यां च परिपक्वात्मज्ञानलक्षणां, अविद्यां च कर्मलक्षणां तदुभयं यः सह उपायोपेयभावेन वेद जानाति, असौ अविद्यया कर्मणा मृत्युं विद्योत्पत्तिप्रतिबन्धकं पापं तीर्त्वा विद्यया परिपक्वब्रह्मसाक्षात्कारलक्षणया अमृतं निर्वाणं अश्नुत इति । तदिदमत्र तत्वम् — आत्मविद्यापरिपाकात्प्राक् यथास्वं

---

संबन्धोक्तिः ।

ये त्विति । कुतः क्रमसमुच्चयपरत्वमित्यत्राह — अविद्ययेति । तर्हि सहशब्दविरोध इत्यत आह — सहेति । विद्याया एव मोक्षसाधनत्वे 'ततो भूयः' इति कथं तन्निन्देत्यत्राह — केवलेति । केवलशब्दज्ञानविषया सा इत्यर्थः । उक्तेऽर्थे श्रुतेः तात्पर्यं व्याख्यानेन स्पष्टयति — अत्रेति ॥

ननु विविदिषासंन्यासोऽपि श्रूयते तत्कथमपरिपक्वात्मविद्यायां निरतानामधःपात इति तत्राह — एतदुक्तमिति । मुमुक्षूणामपि इतराश्रमविहितकर्मत्याग एव श्रूयते, न तु स्वाश्रमविहितस्य ध्यानशौचादेरपि; ततः तेषामपि परित्याग एवात्र निन्द्यत इत्यर्थः । उत्तरमन्त्रमवतारयति — कस्तर्हीति । उपायोपेयभावेनापि समुच्चयस्याङ्गीकारात् केवलविद्याया मोक्षसाधनत्वं न सिद्ध्येदित्याशङ्क्य विद्यायाः

विहितं कर्मानुष्ठेयम् । विद्या तु परिपक्वा कर्मनिरपेक्षैव मोक्षं साधयिष्यतीति ॥

यत्तु 'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने' इत्यादि; अत्रापि साक्षात् ज्ञानं, तद्द्वारेण च कर्मेति गमयितव्यम् । अन्यथा 'ज्ञानादेव तु कैवल्यम्' 'नान्यः पन्था विद्यते' इत्यादिविरोधप्रसङ्गात् । यत्पुनः,

'यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम् ।
एवं तपश्च विद्या च संयुक्तं भेषजं महत् ॥'

इत्याहत्य समुच्चयपरं प्रतिभाति, तत्सर्वं परिपक्वात्मविद्याव्यतिरिक्ताया विद्यायाः कर्मणां च तदुत्पादे समुच्चयं प्रतिपादयतीत्यभ्युपेयम् । तथा ह्युक्तम् --

'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ॥
अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ।' इति ।

यत्तु 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति, तत्र संसिद्धिः तत्त्वावबोध एव भविष्यति । 'सिद्धिं प्राप्तो यथा ब्रह्म तथाऽऽप्नोति निबोध मे' इति प्राप्तव्यस्य पृथगभिधानादिति सकलमनाकुलम् । तस्मात्,

अविद्यास्तमयो मोक्षो भवेद्विद्यैकहेतुकः ।
युक्त्या श्रुतिस्मृतिभ्यां च स्वीकर्तव्यो मनीषिभिः ॥

---

संबन्धोक्तः ।

स्वोत्पत्तावेव कर्मापेक्षा, न तूत्पन्नायाः फलं प्रत्यपीत्याह — तदिदमिति । अत्र प्रमाणमाह — तथाहीति । उक्तमर्थं श्लोकेनोपसंहरति --- तस्मादिति ॥

ननु कथमविद्यास्तमयो मोक्षः, विकल्पासहत्वात् । तथाहि — स किं सन्, उत असन् ,उत सदसदात्मकः, आहोस्वित् तद्विलक्षणः, अन्यो वा अनन्यो वा ? नाद्यः, तस्यात्मनोऽन्यत्वेऽद्वैतव्याघातात् । अनन्यत्वे च अनादितया ज्ञानवैयर्थ्यप्रसङ्गात् । नापि द्वितीयः, असतोऽपि तुच्छत्वे पूर्वोक्तदोषापातात् । प्रध्वंसत्वे च तत्प्रतियोगिनो ज्ञानस्याभावत्वप्रसङ्गात् । तथात्वे च घटादिवदेव ज्ञानानिवर्त्यत्वप्रसङ्गात् । नापि तृतीयः, असंभवात् । संभवे च पक्षद्वयोक्तदोषप्रसङ्गात् । नापि चतुर्थः, तस्याज्ञान-

सदादिभ्यश्च भिन्नोऽस्य प्रकारः परिशेषितः ।
यथाऽयमुपपद्येत तथैव परिकल्प्यताम् ॥

प्रमाणमाला गुणसङ्गतेयमपेतदोषा विहिताऽऽदरेण ।
प्रसाधयन्ती परमं पुमांसं प्रकल्पतां प्रार्थितसिद्धये वः ॥

आत्मस्वभावमधिगम्य मुकुन्दमेषा मानाभिधाननवरत्नमनोज्ञमाला ।
आनन्दबोधयतिना निधिना गुणानां आनन्दहेतुरकलङ्कधियां व्यधायि ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दबोधाचार्यविरचितं

**प्रमाणमालाख्यं प्रकरणं** संपूर्णम् ॥

---

संबन्धोक्तिः ।

तत्कार्ययोः अन्यतरत्वेऽनिर्मोक्षप्रसङ्गात् । नान्यः तस्याप्रसिद्धेः, असंभवात्, अन्यानन्यत्वादिविकल्पोपहतत्वाच्च । तस्मात् न अविद्यास्तमयो मोक्षः इत्यत आह — **सदादिभ्य इति** । अविद्यानिवृत्तेः लोकवादिप्रसिद्धायाः स्वरूपेणापलपितुमशक्यत्वात् सदसदादिप्रकाराणां च त्वयैव निरस्तत्वात् परिशेषन्यायप्रसिद्धत्वाच्च पञ्चमप्रकारा साऽभ्युपेया भवद्भिरपीति भावः । ननु अस्मिन्नपि कल्पेऽन्यानन्यत्वादिविकल्पाः संभवन्तीति, तत्राह — **यथायमिति** । भेदाभेदादिप्रकाराणामपि सदादिप्रकारेष्वेव दृष्टत्वात् न पञ्चमप्रकारायामविद्यानिवृत्तावनुप्रवेश इति भावः ॥

पान्तु विनोदविदारितदैत्योरःकुलिशपञ्जरास्त्रिजगत् ।
वज्रोपमापवादादधोमुखा नरहरेर्ननु नखराः ॥

सेयं प्रमाणमालायाः संबन्धोक्तिरविस्तरा ।
चित्सुखाख्येन यतिना रचिता खचिता गुणैः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्य-

**श्रीचित्सुखाख्यमुनिना** विरचिता

**प्रमाणमालातात्पर्यटीका** समाप्ता ॥

---

श्रीवाणीविलासमुद्रणालयः, श्रीरङ्गम् ।